अनाशकं मरणपर्यन्तमशनवर्जनसङ्कल्पेन स्थितिः । तस्मात् योनिवर्त्तते पूर्वं सङ्कल्प्य कतिचित् कालं स्थित्वा पश्चान्निवर्तते स चातुर्वर्ण्यव्यवस्थितोऽपि चण्डालो भवति । मृत्वा पुनरागमनात् तस्य निन्द्यत्वम् । इद च चण्डालत्वं न जात्या । अपि तु कर्मणैव । तदेवाह वर्जनीयः प्रयत्नत इति ।

---

१. B. and D. read तत्रेदानी for तत्रेद प्रायश्चित्तम् २. B. and D. substitute नच for ननु. ३. J. omits -मात्रस्य and G. substitutes निषिद्धत्वात् for निमित्तत्वात्. ४. Except A and I. all others do not repeat पृथक्. ५ Except A. I. and J. all others read अवगतम् for अपगतम्. C. also reads the same, but corrects in the margin अपगतम् ६. We follow here A. and I., while all others read प्रत्यापद्यते

लुप्तधर्मास्तु चण्डालाः परिव्राजक-तापसाः ।
तेभ्यो जातान्यपत्यानि चण्डालैः सह वासयेत् ॥
जल्प-ऽग्निपतने चैव प्रव्रज्या-ऽनाशके तथा ।
प्रत्यावसितवर्णानां प्रायश्चित्तं कथं भवेत् ?॥
ब्राह्मणानां प्रसादेन तीर्थाभिगमनेन च ।
गवां च शतदानेन वर्णाः शुद्ध्यन्ति ते त्रयः ॥
ब्राह्मणस्त्व प्रवक्ष्यामि गत्वाऽरण्यं चतुष्पथम् ।
सशिखं वपनं कृत्वा त्रिसन्ध्यमवगाहनम् ॥
सावित्र्यष्टसहस्रं तु जपेच्चैव दिने दिने ।
मुच्यते सर्वपापेभ्यो ब्राह्मणत्वं च गच्छति ॥
भैक्षार्थी विचरेद् ग्रामं गृहान् सप्त, वने वसन् ।
तां च भिक्षां समश्नीयादब्दार्धेन विशुद्ध्यति' ॥

इति। अत्रैव व्रतान्तराण्याह वसिष्ठः—

'जीवन्नात्मत्यागी कृच्छ्रं द्वादशरात्रं चरेत् । (१९)
त्रिरात्रं वाऽप्युपवसेन्नित्यं स्निग्धेन वाससा ।
प्राणानात्मनि संयम्य त्रिः पठेदघमर्षणम् ॥ (२०)
अपि वैतेन कल्पेन गायत्रीं परिवर्त्तयेत् । अपि
वाऽग्निमुपसमाधाय कूष्माण्डैर्जुहुयाद् घृतम्'। (२१)
( व. स्मृ. २३. १९–२१ )

---

१ I. reads -ऽनशने for -ऽनाशके २ B and D. substitute त्राव्यावसित- for प्रत्यावसित-. ३. I substitutes दश- for शत-, while B and D. omit,

..... तीर्थाभिगमनेन च ।
गवां च शतदानेन.. ... .. ॥.

४. G. and J. read गृहात् for गृहान् ५. C. F. and J. read जीवन्मृत्वाऽऽत्मत्यागी, G. जीवन्मुक्तात्मत्यागी and H. जीवन्वाऽऽत्मत्यागी all for जीवन्नात्मत्यागी. ६. We follow here H. I. and the text, while B. D E. H. and J. add वा and C. F त्वा before द्वादशरात्र and G. omits it substituting दशरात्रं for द्वादशरात्र. ७ A substitutes च for वा. ८. We follow here A. and the text, while I. reads अग्निं समाधाय and others अग्निमुपाशय for अग्निमुपसमाधाय.

इति । तत्र जप-होमौ विद्वद्विशेषेण विकल्पनीयौ । द्वादशरात्र-त्रिरात्रौ त्वविद्वद्विषयेशक्ताशक्तभेदेन व्यवस्थापनीयौ ।

मूलवचने प्रव्रज्याशब्देन पूर्वं महाप्रस्थानगमनं व्याख्यातम् । अथ वा परिव्रज्या तेन विवक्ष्यते । तथा च सति परिव्रज्यातः प्रच्युतस्य ब्राह्मणस्य प्रायश्चित्तमुक्तं भवति । तदिदं श्रद्धालोः पुनरुपनयनादिपुरःसरं पारिव्रज्यं जिघृक्षोर्वेदितव्यम् । यस्तु पुनः पारिव्रज्यं न जिघृक्षति तस्य मरणान्तं राजदासत्वादिकम् । यत्त्वत्र नारदः—

'राज्ञ एव तु दासः स्यात् प्रव्रज्याऽवसितो द्विजः* ।
न तस्य प्रतिमोक्षोऽस्ति न विशुद्धिः कथञ्चन' ॥
(ना. स्मृ. ५. ३५)

इति तत् क्षत्रिय-वैश्यपरम् । यदाह कात्यायनः—

'प्रव्रज्याऽवसिता यत्र त्रयो वर्णा द्विजातयः ।
निर्वासं कारयेद्विप्रं दास्यं क्षत्र-विशौ नृपः'† ॥

---

* प्रायश्चित्तार्थत्वादस्मिन् दास्ये भृतिः पारितोषिकादिकं च न ग्राह्यम्। न तस्य प्रतिमोक्षोऽस्ति इत्यनेन राजदास्य एव तस्य मरणं भवेत् । मरणपर्यन्तं तस्य कदापि शुद्धिर्नास्ति । मरणेनैव स शुद्धो भवतीत्यभिप्रायः ।

† उपरितनेन नारदवचनेनोक्तस्य राजदास्यस्य व्यवस्थेयम् । तत्र ब्राह्मणस्य निर्वासनम् । न दास्यम् । तत्प्रकारः समनन्तरोक्तेन दक्षवचनेन प्रदर्शितः ।

---

१ I. reads विद्वद्विषयौ कल्पनीयौ, G. reads विद्वद्विषयेण- and H. विद्वद्विशेषे विषयौ विकल्पनीयौ. २. We follow here A. and I; while all others read च विद्वद्विषये for त्वविद्वद्विषये, while B. and D. omit -त्रिरात्रौ and read द्वादशरात्र. ३ C. F. and J. substitute प्रतिमोक्षो I. प्रतिशोधो for प्रतिमोक्षो, while B. and D —

... ... ... प्रवज्यासहितो द्विज ।
न तस्य प्रति होमोऽस्ति ..... ॥.

४. Except A; all others omit तत् क्षत्रिय वैश्यपरम् । यदाह. ५ C. and F. read प्रव्रज्या च सितो and B and D प्रव्रज्यासहितो both for प्रव्रज्यावसिता. ६. G. H. I. and J. read -विशो for -विशौ.

इति। दक्षः—

'पारिव्रज्यं गृहीत्वा तु यः स्वधर्मे न तिष्ठति।
श्वपदेनाङ्कयित्वा तं राजा शीघ्रं प्रवासयेत्'॥
(द. स्मृ. ७. ३४)

इति। याज्ञवल्क्यः—

'प्रव्रज्याऽवसितो राज्ञो दासः स्यात् मरणान्तिकम्'*।
(या. स्मृ. २. १८३)

इति॥ ५–६–७–८॥

अथाचारकाण्डशेषत्वेन स्नानभेदानाह—

स्नानानि पञ्च पुण्यानि कीर्तितानि मनीषिभिः।
आग्नेयं वारुणं ब्राह्मं वायव्यं दिव्यमेव च॥ ९॥

इति॥ ९॥

आग्नेयादीनामुपदिष्टानां पञ्चानां क्रमेण स्वरूपं विविनक्ति—

आग्नेयं भस्मना स्नानमवगाह्य तु वारुणम्।
आपो हिष्ठेति च ब्राह्मं वायव्यं गोरजः स्मृतम्॥१०॥
यत्तु सातपवर्षेण तत् स्नानं दिव्यमुच्यते।
तत्र स्नात्वा तु गङ्गायां स्नातो भवति मानवः॥११॥

* इदमपि क्षत्रिय-वैश्ययोरेव दास्यं विधत्ते। तदपि अनभ्युपगतप्रायश्चित्तस्यैव।

१. I. reads राज्यात् for राजा. २. The text reads दास आमरणान्तिकम् for दास स्यान्मरणान्तिकम् ३. L. does not insert the following verse —
स्नानानि पञ्च पुण्यानि कीर्तितानि मनीषिभिः।
आग्नेयं वारुणं ब्राह्मं वायव्यं दिव्यमेव च॥
४. G. E. and I. read उदिष्टानां for उपदिष्टानां. ५. M. reads रजसा for गोरजः.

इति । भस्मस्नानं द्विविधम् । पादादिकं मूर्धादिकं च । तत्र पादादिकं विरक्तविषयम् । संहारक्रमत्वात्* । तच्च कूर्मपुराणे दर्शितम्—

'आग्नेयं भस्मनाऽऽपादमस्तकादिहधूलनम्' ।
(कू. पु. प. १. २. १८. १३)

इति । मूर्धादि लिङ्गपुराणे दर्शितम्—

'ईशानेन शिरोदेशं मुखं तत्पुरुषेण तु ।(३७)
उरोदेशमघोरेण गुह्यं वामेन सुव्रतैः ॥
सद्येन† पादौ, सर्वाङ्गं प्रणवेन तु शोधयेत्' ।
(लिं. पु. १. २६. ३७–३८)

इति । जलावगाहनरूपं तु वारुणस्नानं प्रथमाध्याये—

'सन्ध्या स्नानं जपो होमः'
(प. स्मृ. १. ३९)

---

* तत्र तावत् स्नान-'न्यासादिषु द्वौ क्रमौ विहितौ । सृष्टिक्रमः संहारक्रमश्च । भगवता जगत्स्रष्ट्रा मूर्धानमारभ्य सृष्टिः क्रियते संहर्त्रा च पादमारभ्य संहारः क्रियते इति श्रुति-स्मृत्यादिषु दर्शनात् तान्त्रिकैर्न्यासादिषु क्रमद्वयमादृतम् । तत्र गृहस्थानां सृष्टिक्रमः विरक्तानां संहारक्रम इति व्यवस्था ।

† सद्येन 'सद्योजातं प्रपद्ये' इति मन्त्रेणेत्यर्थः ।

---

१ B. and D. omit the following :—

'आग्नेयं भस्मनाऽऽपादमस्तकादिहधूलनम्' ।

इति । मूर्धादि लिङ्गपुराणे दर्शितम् ।

२. H. and I. read सुव्रत. for सुव्रता this is not grammatically incorrect but a quoted line and address to several Rishis. ३. G. and J. read सव्येन for सद्येन. ४. B. and D. omit the following —

जपो होम "—इत्यत्र प्रपञ्चितम् । आर्द्रा तु तिसृभिरापो हि ष्ठेत्यृग्भिः । पाद-हृदय मूर्धप्रदेशेषु कुशोदकैर्मार्जनम् । तदुक्तं कूर्मपुराणे—

' आर्द्रां तु मार्जनं ..... ।'.

इत्यत्र प्रपञ्चितम्। ब्राह्मं तु तिसृभिरापो हि ष्ठेत्यृग्भिः पाद-हृदय-मूर्धप्रदेशेषु कुशोदकैर्मार्जनम्। तदुक्तं कूर्मपुराणे—

'ब्राह्मं तु मार्जनं मन्त्रैः कुशैः सोदकबिन्दुभिः।
(कू. पू. १. २. १८. १३)

इति। तच्च त्रिःकृत्वोऽभ्यस्तेषु स्थानेषु कर्त्तव्यम्। तत्प्रकारश्च बौधायनेन दर्शितः—

'भुवि मूर्ध्नि तथाऽऽकाशे मूर्ध्न्याकाशे तथा भुवि।
आकाशे भुवि मूर्ध्नीति मन्त्रस्नानं विधीयते' ॥
(बौ. स्मृ. १. २. १०. ११)

इति। सायंकाले गोषु मार्गेष्वागच्छन्तीषु वायुना समुत्थिते गोपादरजस्यवस्थानं वायव्यम्। आतपयुक्तेन वर्षोदकेन देहस्याप्लावनं दिव्यस्नानम्। तदिदं पूर्वोक्तेभ्यः प्रशस्तम्। एतेन यौगिक-सारस्वते अपि द्वे स्नाने उपलक्ष्येते। यौगिकं योगेन विष्णुचिन्तनम्। तदाह व्यासः—

'ब्राह्ममाग्नेयमुद्दिष्टं वायव्यं दिव्यमेव च ॥ (९)
वारुणं यौगिकं तद्वत् षोढा स्नानं समासतः।
ब्राह्मं तु मार्जनं मन्त्रैः कुशैः सोदकबिन्दुभिः ॥ (१०)

---

१. B. and D. read तत्र त्रिषु तेभ्यस्तेषु स्नानेषु, C. and F. तत्र त्रिषुप्तेभ्यस्तेषु, E. and H तत्र त्रिष्टुप् तभ्यस्तेषु स्नानेषु, G. त्रिविष्कृतिभ्य स्नानेषु and J. तत्र त्रि कृत्वोऽभ्यस्तेषु स्थानेष all for तच्च त्रि कृत्वोऽभ्यस्तेषु स्थानेषु. २ J. substitutes स्यात् for इति and for the same G आदि. ३. B. D. E G. H. read गच्छन्तीषु for आगच्छन्तीषु ४. Except A. I. and J. all others omit द्वे. ५ B and D. substitute तच्च, J. तत्र. H. तत्तत् for तद्वत्. C. and F. चातुर्विधयौगिक तत्तत् for वारुणं यौगिकं तद्वत् ६ These three lines appear only in A. and the text, while all others omit: but the contents of the same are quite necessary here.

आग्नेयं भस्मना स्नानं वायव्यं गोरजः स्मृतम् ।
यत्तु सातपवर्षेण तत् स्नानं दिव्यमुच्यते ॥ ( ११ )
वारुणं चावगाहस्तु मानसं त्वात्मवेदनम् ।
यौगिकं स्नानमाख्यातं योगाद्[1] विष्णुविचिन्तनम्' ॥(१२)
( ल. व्या. स्मृ. १. ९–१२ )

इति । विद्वदाशिषा सम्पादितं सारस्वतं स्नानम् । तदाह बृहस्पतिः—

'वायव्यं गोरजः प्रोक्तमस्तं गच्छति गोपतौ ।
विद्वत्सरस्वतीप्राप्तं[2] स्नानं सारस्वतं स्मृतम्' ॥
( बृ. स्मृ. ३. ४९ )

इति । विद्वदुक्तिप्रकारमाह व्यासः—

'स्वयमेवोपपन्नाय विनयेन द्विजातये* ।
तज्ज्ञैः[3] सम्पादयेत् स्नानं शिष्याय च सुताय च ॥
दाक्षायणमयैः कुम्भैर्मन्त्रवज्जाह्नवीजलैः ।
कृतमङ्गलपुण्याहैः स्नानमस्तु तदर्थिनाम् ॥
( व्या. स्मृ. १. १४–१५ )

आदौ तावत् प्रभासे बहुगुणसलिले मध्यमे पुष्करे वा
गङ्गाद्वारे प्रयागे कनखलसलिले[4] भद्रकर्णे गयायाम् ।

---

* विनयेन स्वयमेवोपपन्नायैव द्विजातये । उपपत्त्यभावेऽपि पुत्राय शिष्याय च ज्ञानसम्पादिका उक्तिर्देयेति भावः । तामेवोक्तिमाह दाक्षायणमयैरिति । दाक्षायणं सुवर्णम् । तन्मयैः कुम्भैः । सन्निहत्यां कुरुक्षेत्रे ।

---

१. B. and D. read योगो विष्णुविचिंतनम्, J. योगात् द्विष्णु विचिंतयेत् and the text योगैर्विष्णुविचिंतनम् २ B. and D. read -प्रोक्तं for -प्राप्त. ३. B. D. G. and J read तत for तज्ज्ञ. ४ We follow here A. C. F. and J.; while others read -सहिते for -सलिले.

राहुग्रस्ते च सोमे दिनकरसहिते सन्निहत्यां[1] विशेषात्
एतैर्विख्याततीर्थैस्त्रिभुवनविदितैः स्नानमच्छिद्रमस्तु[2]' ॥
(ल. व्या. स्मृ. १. ७)

इति स्नानानि[3]। एतेषु सप्तसु स्नानेषु वारुणं मुख्यमितराणि षड्[4] स्नानानि गौणानि। मुख्य-गौणभेदेन शङ्खवचनमाचारकाण्ड एवोदाहृतम्*। तत्र[5] गौणस्नानान्यशक्तविषयाणि। तदुक्तं कूर्मपुराणे[6]—

'अप्रायत्ये† समुत्पन्ने[7] स्नानमेवं समाचरेत्।
ब्राह्मादीनि तथाऽशक्तौ स्नानान्याहुर्मनीषिणः' ॥
(कू. पु. १. २. १८. ११)

इति ॥ १०–११ ॥

वारुणस्नाने[8] तर्पणस्य पूर्वभावित्वं वस्त्रनिष्पीडनस्योत्तरभावित्वमुपपत्तिपुरस्सरं विदधाति—

स्नातुं[9] यान्तं द्विजं सर्वे देवाः पितृगणैः सह।
वायुभूतास्तु गच्छन्ति तृषार्त्ताः सलिलार्थिनः ॥ १२ ॥
निराशास्ते निवर्त्तन्ते वस्त्रनिष्पीडने कृते।
तस्मान्न पीडयेद्वस्त्रमकृत्वा पितृतर्पणम् ॥ १३ ॥

इति। स्नातुं गच्छन्तं येऽनुगच्छन्ति[10] ते सर्वे पूर्वं वस्त्रे निष्पीडिते

---

* प्रथमाध्याये स्नानप्रकरणे २६८ पृष्ठे तदग्रे च द्रष्टव्यमिदम्।

† अप्रायत्यं अशुचित्वम्।

---

१. I. reads सन्निपात्यां C. D. and G -विशेषै for विशेषात् २. B. and D omit स्नानानि गौणानि, while G. I. omits स्नानानि. ३. B. C. D. and F. substitute नच for तच. ४. The text reads असामर्थ्ये for अप्रायत्ये. ५ C. F. and I. read एवं for एव. ६. B. D. G H. and J read उपपत्तिः पराशरो for उपपत्तिपुरस्सरं, while G. omits -पुर.सरं. ७. M. reads स्नानार्थं विप्रमायान्तं देव्यः for स्नातुं यान्तं द्विज सर्वे देवा. ८ K. reads अनुगच्छान्ति and M. हि गच्छन्ति for तु गच्छन्ति ९. I. reads तृष्णार्त्ते for तृषार्त्ता-

सन्ति निराशाः गच्छन्ति—इत्येषोपपत्तिः। अस्मिन्नर्थे योगियाज्ञवल्क्यादिस्मृत्यन्तरवचनानि पूर्वमेवोदाहृतानि* ॥१२–१३॥

तर्पणवेलायां तिलाः पाणितले विलोमप्रदेशे प्रान्तरे वा स्थापनीयाः न तु सलोम्नि पाणिपृष्ठे,—इत्यभिप्रेत्य तत्र स्थापने पत्यवायमाह—

रोमकूपेष्ववस्थाप्य यैस्तिलैस्तर्पयेत् पितॄन् ।
पितरस्तर्पितास्तेन रुधिरेण मलेन च ॥१४॥

इति। अस्मिन्नर्थे देवलवचनं पूर्वमेवोदाहृतम् ॥ १४ ॥

स्नानवेलायां केशधूननादि प्रतिषेधति—

अवधूनोति यः केशान् स्नात्वा यस्तूत्सृजेन्मलम्† ।
आचामेद्वा जलस्थोऽपि स बाह्यः पितृ-दैवतैः‡ ॥१५॥

---

* आचारकाण्डे प्रथमेऽध्याये स्नानप्रकरणे द्रष्टव्यानीमानि वचनानि।

† बी. संज्ञकं डी. सज्ञकं च पुस्तकद्वयं वर्जयित्वा अन्येषु सर्वेष्वप्यादर्शपुस्तकेषु 'स्नात्वा प्रस्रवतो द्विजः' इति, जी. के एल् संज्ञितपुस्तकेषु 'प्रस्रवते' इति च पाठो दृश्यते। तथापि नायं माधवाचार्य-धरणीधरादीनां सम्मतः। 'इत्थमेव पाठः सर्वत्र। परन्तु, "यश्च स्नानानन्तरमार्द्रवस्त्रो मल-मूत्रे विसृजेत्" इति व्याख्यादर्शनात्, प्रस्रवते द्विजः—इति पाठ एव समीचीनः प्रतिभाति'—इति वदन् वगदेशीयास्यातिकसोसायटीमुद्रितपुस्तकसम्पादनकर्ता चन्द्रकान्ततर्कालङ्कारस्त्वत्र भ्रान्त एव। केवलं प्रस्रवते इत्यनेन व्याख्यानस्य कथं सङ्गतिरिति स एव प्रष्टव्यः।

‡ केचित् 'पितृ-दैवते' इति पाठमाश्रित्य दैव-पित्र्यकर्मणि स बाह्यः वर्ज्यः भवतीति व्याचक्ष्यु.।

---

१ Except A. and I. all others read इति तेषाम्; while. I. इत्येव for इत्येषा. २. C F. E and H read स्नानकर्द्रपाणिपृष्ठे for सलोम्नि पाणिपृष्ठे. ३. K. and L. read तिलैस्तर्पयते for य स्तिलैस्तर्पयेत्; while M does not insert the whole verse, and G reads -कूपे च सस्थाप्य for -कूपेष्ववस्थाप्य ४ I. K and L. read तर्पितास्तेन ते सर्वे for पितरस्तर्पितास्तेन ५ B. and D. read अथ for अव - Except B. and D others read this line as follows —
अधूनोति य. केशान् स्नात्वा प्रस्रवतो द्विज ।,
while G K and L read प्रस्रवते and J. reads -स्त्वार्द्रो विसृजेन्मलम् ६. K. and L. read पितृ दैवते for पितृ-दैवतै

इति। स्नात्वेत्येतत् पदं काकाक्षिवद् उभयतः सम्बद्ध्यते। तथा च सति यः स्नानानन्तरमार्द्रान् केशानवधुनुयात् यश्च स्नानानन्तरमार्द्रवस्त्रो मल-मूत्रे विसृजेत् यश्च नाद्यादावस्नानकाले जलमध्ये स्थित्वा आचामेत्, स त्रिविधोऽपि पुरुषः पितृभिः दैवतैश्च बाह्यः कृतः। पैतृकं दैविकं चानुष्ठानमनुष्ठातुमनर्ह इत्यर्थः॥ १५॥

आचमनकाले शिरःप्रावरणादीनि निषेधति—

शिरः प्रावृत्य कण्ठं वा मुक्तकच्छ-शिखोऽपि वा।
विना यज्ञोपवीतेन आचान्तोऽप्यशुचिर्भवेत्॥ १६॥

इति। वस्त्रेण शिरः कण्ठं वा प्रावृत्य नाचामेत्। तथा मुक्तकच्छो वा मुक्तशिखो वा यज्ञोपवीतरहितो वा नाचामेत्॥१६॥

आचमने नियामान्तरमाह—

जले स्थलस्थो नाचामेत् जलस्थश्च बहिःस्थले।
उभे स्पृष्ट्वा समाचान्त उभयत्र शुचिर्भवेत्॥ १७॥

इति। यो हि पद्भ्यां जलमस्पृष्ट्वा शुद्धस्थल एवोपविश्य ईषत्प्रह्वो जल एव बिन्दून् पातयन्नाचमति स जल-स्थलयोरुभयोर्न शुद्ध्यति। यश्च तद्वैपरीत्येन जले पादद्वयमवस्थाप्य स्थले बिन्दून् पातयन्नाचामति, सोऽपि नोभयत्र शुद्ध्यति। अत्रस्तथा नाचान्तव्यम्। किन्त्वेकेन पादेन स्थलमप-

१. H does not insert इत्यर्थः २. H. reads मुक्तकक्ष शिखोऽपि for मुक्तकच्छ-शिखोऽपि. ३ J. reads यश्चायज्ञोपवीती स for विना यज्ञोपवीतेन ४. K and L. read समाचामेत् for समाचान्त. ५ B and D read उभयत्राशुचिर् for उभयत्र शुचिर्. ६. G and I. do not insert ईषत्-. ७. G omits the following portion —

यश्च तद्वैपरीत्येन जले पादद्वयमवस्थाप्य स्थले बिन्दून्
पातयन्नाचामति सोऽपि नोभयत्र शुद्ध्यति।,

रेणैं जलं स्पृष्ट्वा समाचामेत् । तथाचोभयत्र शुद्ध्यति । एतच्च स्नात्वा य आर्द्रवस्त्रस्तद्विषयम् ॥ १७ ॥

द्विराचमननिमित्तान्याह—

स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे ।
आचान्तः पुनराचामेद्वासो विपरिधाय च ॥ १८ ॥

इति ॥ १८ ॥

*आचमनप्रतिनिधित्वेन श्रोत्रस्पर्शे निमित्तान्याह—

क्षुते निष्ठीवने चैव दन्तोच्छिष्टे तथाऽनृते ।
पतितानां च सम्भाषे दक्षिणं श्रवणं स्पृशेत् ॥ १९ ॥

इति ॥ १९ ॥

श्रोत्रस्पर्शस्य शुद्धिहेतुत्वमर्थवादपुरःसरमुपपादयति—

प्रभासादीनि तीर्थानि गंगाद्याः सरितस्तथा ।
विप्रस्य दक्षिणे कर्णे सन्तीति मनुरब्रवीत् ॥ २० ॥
अग्निरापश्च वेदाश्च सोम-सूर्या-ऽनिलास्तथा ।
सर्व एव तु विप्रस्य श्रोत्रे तिष्ठन्ति दक्षिणे ॥ २१ ॥

इति ॥ २०–२१ ॥

---

* आचमनानुकूल्यमाह—इत्यवतारयति धरणीधरः ।

---

while J. omits—

स जलस्थलयोरुभयोर्न शुद्ध्यति । यश्च तद्विपरीत्येन जले पादद्वयमवस्थाप्य स्थले बिन्दून् पातयन्नाचामति, सोऽपि नोभयत्र शुद्ध्यति ।

१. J. and M. substitute भुक्ते for भुक्त्वा and I. रथ्याप्रसर्पणे for रथ्योपसर्पणे २. K. reads जलस्थश्च बहिःस्थले for वासो विपरिधाय च. ३ M. reads निष्ठीवते for निष्ठीवने. ४. Except A. all others omit अर्थवादपुरःसरम् ५ We follow here A K and L, while all others omit the verse. ६ M reads this verse as follows—

ब्रह्मा विष्णुश्च रुद्रश्च सोम सूर्योऽनिलस्तथा ।
ते सर्वे ह्यपि तिष्ठन्ति कर्णे विप्रस्य दक्षिणे ॥.

अरुणोदयात् पूर्वं स्नानं निषेधति—

भास्करस्य करैः[1] पूत दिवा स्नानं प्रशस्यते।
अप्रशस्तं निशि स्नानं राहोरन्यत्र दर्शनात्॥ २२॥

इति। ग्रहणस्नाने[2] रात्रिस्नानस्य प्रतिप्रसवं विवक्षित्वा* राहोरन्यत्र दर्शनादित्युक्तम्॥ २२॥

स्नानदृष्टान्तेन दानादीनामपि प्रतिप्रसवमाह—

स्नानं[†] दानं जपो होमः कर्त्तव्यो राहुदर्शने।
अन्यदा त्वशुची रात्रिस्तस्मात् तां परिवर्जयेत्[‡]॥२३॥

इति। यद्यपि रात्रौ दानादिप्रतिषेधो न मूलवचने प्रस्तुतः

---

एवमेव पुत्रजन्मनिमित्तकं पित्रादिमरणनिमित्तकं च स्नानं रात्रावपि भवत्येव। पराशरेणैव तदभ्यनुज्ञातमग्रे।

† स्नानं ग्रहणनिमित्तकम्। तच्च स्पर्श-मोक्षकालयोः कर्तव्यम्। दानं जन्मराश्यादिदुष्टस्थानस्थितग्रहणनिमित्तकपीडादिपरिहारार्थम्। तच्च मुक्त्यनन्तरमेव भवति। पुरश्चरणादिसङ्कल्पपूर्वको मन्त्रजपः। स च स्पर्शादिमोक्षान्त एव। होमः ग्रहणपीडापरिहारार्थकः तस्यामेव रात्रौ कर्तव्यः। पुरश्चरणाङ्गस्तु द्वितीयदिन एव।

‡ नायं श्लोको धरणीधरेण गृहीतो नापि व्याख्यातः।

---

१. M. reads दिवाकरकरैः for भास्करस्य करैः. २ C. E. F. and H. omit the following —

ग्रहणस्नाने रात्रिस्नानस्य प्रतिप्रसवं विवक्षित्वा राहोरन्यत्रदर्शनादित्युक्तम्॥ २२॥ स्नानदृष्टान्तेन दानादीनामपि प्रतिप्रसवमाह—
स्नानं दान जपो होम कर्तव्यो राहुदर्शने।
अन्यदा त्वशुची रात्रिस्तस्मात्तां परिवर्जयेत्॥ २३॥ इति।;

while B. D. and G. substitute सोमग्रहणे for ग्रहणस्नाने. ३. C E. F. H K. L. and M. do not insert this verse, but the author has commentated this.

तत्रापि शास्त्रान्तरसिद्धं प्रतिषेधं हृदि निधायाऽयं प्रतिप्रसवे इति द्रष्टव्यम्। अन्यदा राहुदर्शनरहिते काले रात्रिः स्नानादिष्वशुचिः तस्मात् स्नानादिकं चिकीर्षुस्तां रात्रिं परिवर्जयेत्॥२३॥

सोमग्रहणकालस्य दानाद्यर्हत्वमुपपादयति—

मेरुतो वसवो रुद्रा आदित्याश्चैवं देवताः।
सर्वे सोमे प्रलीयन्ते तस्माद्दानन्तु तद्ग्रहे॥२४॥

इति॥ २४॥

राहुदर्शन इव खलयज्ञादावपि रात्रिदानमभ्यनुजानाति—

खलयज्ञे विवाहे च संक्रान्तौ ग्रहणे तथा।
शर्वर्यां दानमस्त्येव नान्यत्रैवं विधीयते॥ २५॥

इति॥ २५॥

पुनरपि राहुदर्शनं दृष्टान्तत्वेनोदाहृत्य पुत्रजन्मादौ रात्रिदानमभ्यनुजानाति—

पुत्रजन्मनि यज्ञे च तथा चात्ययकर्मणि।
राहोश्च दर्शने दानं प्रशस्तं नान्यदा निशि॥२६॥

---

१. E. G H. and J substitute प्रतिषेध. for प्रतिप्रसव. २. B. and D. read अन्यथा and G अन्यत्र for अन्यदा. ३. I. reads मारुतो, but it seems to be incorrect. ४ B. and D substitute अपि C. E. F J K. and L. अथ for एव. ५ We follow here A. and M., while all others substitute सग्रहे for तद्ग्रहे ६ B. D. and G. read अनुजानाति for अभ्यनुजानाति and for the same C and F. read इत्यनुजानाति. ७ M. reads ग्रहणेषु च for ग्रहणे तथा ८. Except A and I. all others substitute तु for एवं; while M. reads दानमेतेषु नान्यत्रेति विनिश्चय for दानमस्त्येव नान्यत्रैव विधीयते. ९. I reads दृष्टान्तेन for दृष्टान्तत्वेन.

इति। अत्ययकर्म मरणम्। तस्मिन् प्रस्तुते सति गोदान्न-तिलपात्रादिदानं* निश्यपि कर्त्तव्यम्॥ २६॥

'नान्यदा निशि' इत्ययं निषेधो दान इव स्नानेऽप्यस्तीत्य-भ्युपेत्य पूर्व-पश्चिमयामयोः स्नानस्य प्रतिप्रसवमाह—

महानिशा तु विज्ञेया मध्यस्थं प्रहरद्वयम्।
प्रदोष-पश्चिमौ यामौ दिनवत् स्नानमाचरेत्॥ २७॥

इति। निशि निषेधो महानिशाविषयः। महानिशाशब्दश्च द्वितीय-तृतीययामावभिधत्ते। तथा च सति प्रथम-चतुर्थयामौ दिनवत् स्नानादियोग्यौ। तस्मात्तत्र स्नानादिकमाचरेत्। एत-च्चापद्विषयम्। अन्यथा 'भास्करस्य करैः' (प. स्मृ. १२. २२) इत्यनेन विरुद्ध्येत्। काम्य-नैमित्तिके स्नाने तु महानिशाया-मप्यनिषिद्धे। तदाह देवलः—

'महानिशा तु विज्ञेया मध्यस्थं प्रहरद्वयम्।
तस्यां स्नानं न कुर्वीत काम्य-नैमित्तिकादृते'†॥

इति॥ २७॥

---

* तच्च मरणनिमित्तमुत्क्रान्तिधेन्वादिदानम्।

† देवलेनैव—

'महानिशा द्वे घटिके रात्रेर्मध्यमयामयोः'।

इत्युक्त्वात् रात्रिद्वितीयप्रहरान्त्यघटिका तृतीयप्रहराद्यघटिका चेति घटिकाद्वयं महानिशासंज्ञकं भवति। तान्त्रिकमते प्रथमप्रहरानन्तरं घ-टिकाद्वयं महानिशा ततश्चातिनिशेत्यादयलमप्रसक्तेन।

---

१. B. D. C and F. read इत्यपि for निश्यपि. २. B C E. F. and I. read मध्यस्थ- for मध्यस्थ. ३. I reads महानिशापि न निषिद्ध्यते; while B.D. G. and J. read महानिशाप्यनिषिद्धा. ४. I. reads तत्र for तस्या.

रात्रौ स्नानस्य निमित्तं राहुदर्शनं पूर्वमुक्तम्[1] । इदानीं निमित्तान्तरमाह[2]—

चैत्यवृक्षश्चितिर्यूपश्चण्डालः सोमविक्रयी[3] ।
एतांस्तु ब्राह्मणः स्पृष्ट्वा सवासा जलमाविशेत्[4] ॥२८॥

इति । चितेर्योग्यं श्मशानस्थानं चैत्यम्[5] । तत्र समारोपितो वृक्षः चैत्यवृक्षः । चित्यादयः प्रसिद्धाः । तेषां स्पर्शनं स्नाननिमित्तम् । तद् यदि कथञ्चित् रात्रौ सम्पद्यते तदा रात्रावपि स्नातव्यमित्यभिप्रायः* ॥ २८ ॥

स्नानस्य निमित्तान्तरमाह—

अस्थिसंचयनात् पूर्वं रुदित्वा स्नानमाचरेत् ।
अन्तर्दशाहे विप्रस्य ह्यूर्ध्वमाचमनं भवेत्[6] ॥ २९ ॥

इति । 'प्रथमेऽह्नि' (व्या. स्मृ. ९९)—इत्यादिशास्त्रैर्विहितानां

* जलमाविशेत् । इत्यनेन उद्धृतजलनिषेधोऽवगम्यते इति धरणीधरः । तथा च उष्णोदकनिषेधोऽप्यनेनैवावगम्यत इति सुष्ठूक्तं भवति ।

१. B C D and F. add तत् before पूर्वम्. २. I reads निमित्तान्तराणि and B and D नैमित्तान्तरम् for निमित्तान्तरम् ३ M reads चितिस्थश्च for चितिर्यूपश्च. ४. Except A. G. E. H and I. all others omit चैत्यवृक्षश्च, while B. D. E. H. and J. read चैत्यादय for चित्यादय. ५. B. and D. omit the following :—

स्नातव्यमित्यभिप्राय ॥ २८ ॥
स्नानस्य निमित्तान्तरमाह—
अस्थिसचयनात् पूर्वं रुदित्वा स्नानमाचरेत् ।
अन्तर्दशाहे विप्रस्य ह्यूर्ध्वमाचमन भवेत् ॥ २९ ॥
इति । 'प्रथमेह्नि' (व्या. स्मृ. ००)—इत्यादिशास्त्रैर्विहितानां दिनानां मध्ये यदाऽस्थिसचयन क्रियते तत पूर्वस्मिन् काले रोदनं स्नाननिमित्तम्। अस्थिसञ्चयनादूर्ध्वं रोदनं स्वाचमनस्यैव निमित्तम्। नतु स्नानस्य ॥२९॥
नतु—सोमग्रहणे रात्रावपि.

६. M. reads पूर्वम् for ह्यूर्ध्वम्; while K. and L. स्मृतम् for भवेत्.

दिनानां मध्ये यदा[1] ऽस्थिसञ्चयनं क्रियते ततः पूर्वस्मिन्काले रोदनं स्नाननिमित्तम्। अस्थिसंचयनादूर्ध्वं रोदनं त्वाचमनस्यैव निमित्तम्।[2]नतु स्नानस्य ॥ २१ ॥

ननु—सोमग्रहणे रात्रावपि स्नातव्यमित्युक्तं तदयुक्तम्। उदकस्य शुद्ध्यभावात्। तदाह पैठीनसिः—

'अपेयं तु[3]तदा तोयं रात्रौ मध्यमयामयोः।
स्नानं चैव न कर्त्तव्यं तथैवाचमनक्रिया' ॥

इति। तस्माद्रात्रौ स्नानं कथमभ्युपगम्यते?—इत्याशङ्क्य सोमग्रहादिव्यतिरिक्तविषयेयमशुद्धिरित्याह—

सर्वं गङ्गासमं तोयं[4]* राहुग्रस्ते दिवाकरे।
सोमग्रहे[5] तथैवोक्तं स्नान-दानादिकर्मसु ॥ ३० ॥

इति। सोमग्रहस्योपलक्षणत्वात् संक्रान्त्यादिष्वपि नास्त्य-

---

* 'सर्वं गङ्गासमं तोयम्'—इत्यनेन पर्वनिमित्तकं पावित्र्यं गङ्गासमत्वेन रात्रिस्नानार्हत्वं चोक्तम्। तत्र गङ्गायां कालनियमो नास्ति। यथोक्तं महाभारते अङ्गारपर्णगन्धर्वम्प्रत्यर्जुनेन—

'समुद्रे हिमवत्पार्श्वे नद्यामस्यां च दुर्मते—
रात्रावहनि सन्ध्याया कस्य गुप्तः परिग्रहः ॥
भुक्तो वाऽप्यथ वाऽभुक्तो रात्रावहनि खेचर।
न कालनियमो ह्यस्ति गङ्गा प्राप्य सरिद्वराम्' ॥
(म. भा. १. १७०. १६–१७.)

इति। ग्रहणे गङ्गासमत्वात् सर्वेष्वपि जलाशयेषु रात्रौ स्नानं न दोषावहमित्यर्थः।

---

१ G. reads यथा for यदा २ G. omits तु. ३ I. reads स्नातव्यमित्युक्तं सदुक्तम्। ४ I. reads तथा for तदा. ५. K and L. read सोममस्ते for सोमग्रहे.

शुद्धिदोषः ॥ ३० ॥

सोमग्रहादीनां यथा उदकप्राशस्त्यहेतुत्वं तथा कुशानामप्याह—

कुशैः[1] पूतं तु यत् स्नानं कुशेनोपस्पृशेद् द्विजः[2] ।
कुशेन[3] चोद्धृतं तोयं सोमपानसमं भवेत्[4] ॥ ३१ ॥

इति । कुशैर्मार्जनं कृत्वा मन्त्रस्नानं क्रियते[5] तत् कुशपूतं स्नानम् । कुशाननामिकायां धृत्वा यदाचमनं तत् कुशोदकोपस्पर्शनम् । सन्ध्यावन्दनादौ मार्जनार्थं[6] कुशाग्रैरुद्धृतं बिन्दुजातं कुशोद्धततोयम् । तत्तोयं सोमपानवत् प्रशस्तम् ॥३१॥

अथ कृत्स्नवेदाध्ययनं कर्तुमशक्तस्यैकदेशाध्ययनमभ्यनुज्ञातुमध्ययनाऽभावं निन्दति—

अग्निकार्यात्[7] परिभ्रष्टाः सन्ध्योपासनवर्जिताः ।
वेदं चैवानधीयानास्सर्वे ते वृषलाः स्मृताः ॥ ३२ ॥

इति । उभयोः सन्ध्ययोर्ब्रह्मचारिभिः समिदाधानमग्निकार्यम्[8] । तेन गृहस्थानामौपासनमप्युपलक्ष्यते । अग्निकार्यादिरहितानां वृषलत्वं शूद्रादिसमानत्वम् ॥ ३२ ॥

---

१. B. D. E. H. I and J read कुशस्य for कुशानाम्. २. K and L. read कुशैः पूतं भवेत्, B. D. C E F. H and I कुशपूत तु यत्, and G. कुशपूर्वं तु यत् All for कुशै पूत तु यत् ३. Except A. K and L. all others read कुशेनोद्धततोय यत् for कुशेन चोद्धृतं तोय ४. M. substitutes स्मृतम् for भवेत्; while G. omits -समं and reads भवेदिति. ५. I. omits मन्त्र- and adds यत् after क्रियते ६. Except A. and L all read कुशमार्जनार्थं for मार्जनार्थं. ७. C. and F. read अग्निहोत्रम् for अग्निकार्यम्. ८

एकदेशाध्ययनमभ्यनुजानाति—

तस्माद्वृषलभीतेन ब्राह्मणेन विशेषतः।
अध्येतव्योऽप्येकदेशो यदि सर्वं न शक्यते ॥ ३३ ॥

इति। न चाध्ययनन्यायेनाग्निकार्य-सन्ध्योपासनयोरप्येकदेशानुष्ठानं शङ्कनीयम्। प्रयासरहितत्वेन तयोरशक्त्यसम्भवात्। क्वचित्तद्दर्जनस्य नास्तिक्या-ऽऽलस्यादिमूलकत्वात्। वृषलभीतेन वृषलत्वाद्भीतेनेत्यर्थः॥ ३३ ॥

अथ शूद्रान्नं प्रतिषेधति—

शूद्रान्नरसपुष्टस्याऽप्यधीयानस्य नित्यशः।
जपतो जुह्वतो वाऽपि गतिरूर्ध्वा न विद्यते ॥ ३४ ॥

इति। अध्ययन-जप-होमास्तावदशेषपापक्षयहेतुतया पवित्रतामापादयन्तीति धर्मशास्त्रेषु डिण्डिमः। तथाच मनुः—

'वेदाभ्यासोऽन्वहं शक्त्या महायज्ञक्रिया क्षमा।
नाशयन्त्याशु पापानि महापातकजान्यपि'* ॥
(म. स्मृ. ११. २४५)

* वेदाभ्यासादीनि ब्राह्मणस्य नित्यानि। न तेषां पापप्रणोदनार्थत्वं युक्तम्। तथापि प्रकारान्तरेणात्रोक्तम्। येषां पापाना शास्त्रकृद्भि. प्रायश्चित्तं नोक्तं तेषा, अप्रत्ययकृतानां, प्रतिभूताना च वेदाभ्यासादिना निवृत्तिर्भवतीति विज्ञायते। 'महापातकजान्यपि' इत्यनेन महापातकजनितावान्तरपापानि नश्यन्ति। न महापातकानीति निष्कृष्टोऽर्थः।

१ I. reads कियदंशा- for एकदेशा- २. B. and D. read न लभ्यते for न शक्यते. ३. G. reads प्रायश्चित्तरहितत्वेन and J प्रयोगरहितत्वेन ४. Except A. E. H. and I. all read अशक्य- for अशक्त्य- ५. M. reads उक्ता for ऊर्ध्वा, while A. substitutes हि for अपि. ६. L. reads डिण्डिमः for नियमः. ७. E. does not insert तथा च मनुः

-इति । बृहस्पतिरपि—

'यथा जातबलोवह्निर्दहत्यार्द्रानपि द्रुमान् ।
तथा दहति वेदज्ञः कर्मजं दोषमात्मनः'* ॥

इति । वसिष्ठोऽपि—

'यथाग्निर्वायुना ऽध्मातो हविषा चैव दीप्यते ।
एवं जप्यपरो नित्यं ब्राह्मणः सम्प्रदीप्यते' ॥
(व. स्मृ. २३. १६)

इति । चतुर्विंशतिमतेऽपि—

'वैश्वानरीं व्रातपतीं पवित्रेष्टिं तथैव च ।
ऋतावृतौ प्रयुञ्जानः पुनाति दशपूरुषम्'† ॥

इति । यस्तु नैरन्तर्येण शूद्रान्नं भुञ्जानः तद्रसेन पुष्टो भवति तं पुरुषं यथोक्ता अध्ययनादयोऽपि न पावयितुं क्षमाः तस्मात् शूद्रान्नं यत्नेन वर्जयेदित्याशयः ॥ ३४ ॥

शूद्रान्नं दृष्टान्तीकृत्य तद्वच्छूद्रसम्पर्कादीन् प्रतिषेधति—

शूद्रान्नं शूद्रसम्पर्कः शूद्रेण तु सहासनम् ।
शूद्राज्ज्ञानागमश्चैव ज्वलन्तमपि पातयेत् ॥ ३५ ॥

इति । शूद्रान्नं व्याख्यातम् । एकस्मिन् गृहे शूद्रेण सह-

---

अत्रापि 'कर्मजं दोषम्'—इत्यनेन अनिर्दिष्टप्रायश्चित्तस्यैव दोषस्य ग्रहणं कार्यम् ।

† वैश्वानर्यादय इष्टयः आहिताग्नेः । वेदज्ञानं जप्यं च अनाहिताग्नेः इति यथाधिकारं सम्भवत्येव ।

---

१ B. and D. read पीतो, C. E. F. H I. and J पूतो and G धूतो for ध्मातो. २ We follow here A. and the text, while all others substitute तथा for एव and मन्त्रयुक्त समाहित for ब्राह्मण सम्प्रदीप्यते. ३. I reads पूतयितुं, C, F and H. प्रापयितु for पावयितु, while J. ऊर्ध्वं पारयितु for the same. ४. Except A. B. and D all others substitute अपि for एव. ५. G. omits शूद्रेण, while except J. all others do not insert शूद्रान्नं व्याख्यातम्.

वासः शूद्रसम्पर्कः। कृष्यादिकं कारयतां कृषीवलैः शूद्रैः सह कदाचिदेकास्मिन् शकटादावुपवेशनं सहासनम्। पुराणश्रवणादिजातधर्माधर्मविवेकात् प्राज्ञात् वाग्मिनः शूद्राद्धर्माधर्मप्राप्तिर्ज्ञानागमः। एते शूद्रान्नादयः ज्वलन्तं ब्रह्मवर्चसेन विख्यातमपि पुरुषं नरके पातयन्ति। तस्मात्ते वर्जनीयाः ॥ ३५ ॥

वर्ज्यान्तरमाह—

यः शूद्र्या पाचयेन्नित्यं शूद्री च गृहमेधिनी।
वर्जितः पितृ-देवेभ्यो रौरवं याति स द्विजः ॥ ३६ ॥

इति। यो विप्रः केनचिन्निमित्तेन परस्थलादौ निवसन् स्वकीयमेवान्नं शूद्रस्त्रिया पाचयेत्* यस्य च ग्रामे निवसतोऽपि ऊढाऽनूढा वा शूद्रा गृहिणी भवति द्विविधोऽपि स विप्रो हव्य-कव्येऽनुष्ठातुमयोग्यः सन्नरकमाप्नोति ॥ ३६ ॥

शूद्रान्नवत् सूतकान्नं निन्दति—

मृत-सूतकपुष्टाङ्गो द्विजः शूद्रान्नभोजनः।
अहं तन्न विजानामि कां कां योनिं गमिष्यति ॥ ३७ ॥

* पूर्वं एकादशेऽध्याये 'दास-गोपाल-नापित'—(प. स्मृ. ११. २१) —इत्यादिना दासादयः भोज्यान्नत्वेन परिगणिताः। तत्कथमत्र शूद्र-

१ I reads पुराणादि- for पुराण- २ I. omits वाग्मिन.; while except A G I. and J others omit. प्राज्ञात् ३. B D. and H. substitute पित्र-दैवत्ये for पित्र-देवेभ्यः; while M does not insert this whole Sloka. ४ B and D omit यो ५ J substitutes पल्यादौ for परस्थलादौ and except A and I. others omit परस्थलादौ ६. I. reads अनुष्ठानायोग्य for अनुष्ठातुमयोग्यः and B, C D, F. G and J. read स नरकम् for सन्नरकम्. ७ We follow here A. and M, while all others read मृत सूतकपुष्टाङ्गं द्विजं ८ B C. D E. F G. and H. read शूद्रान्नभोजनम्, I. K and L. शूद्रान्नभोजिनम् and M. शूद्रान्नभोजने all for शूद्रान्नभोजनः ९ C. F G J. K. and L read अथ तन्न, M. अहं तान्न for अहं तन्न, while B. and D. अहं चापि न for the same.

गृध्रो द्वादश जन्मानि दश जन्मानि सूकरः ।
श्वयोनौ सप्तजन्मा स्यादित्येवं मनुरब्रवीत् ॥ ३८ ॥

इति । मृताशौचे जाताशौचे वा अशौचिनोऽन्नमश्नन्यो यो विप्रो दशस्वपि दिनेषु भुक्त्वा शरीरं पुष्णाति सोऽयं मृत-सूतक-पुष्टांगो विप्रः बहुषु कष्टयोनिषु जायते । कां कां योनिं गमिष्यतीत्येतत् न जाने इत्युक्त्वा योनीनामतिकष्टत्वं वर्णितम् । न तु स्वाज्ञानं प्रकटीकृतम् । अन्यथा गृध्रादिजन्मोदाहरणं व्याहन्येत । न च—गृध्रादिवाक्ये मनुरब्रवीदित्यभिधानात् तत्पूर्वकं स्वाज्ञानमुपवर्णितमिति शङ्कनीयम् । तद्वर्णने प्रयोजनाभावात् । मनुशब्दोदाहरणं प्रामाण्यदार्ढ्यार्थम् । तथा च सति शूद्रान्न-सूतकान्नयोः कष्टत्वस्यात्यन्तं प्रमितत्वात् । तदुभयं सर्वथा वर्जनीयमित्युक्तं भवति ॥ ३७-३८ ॥

शूद्रार्थे होमानुष्ठानं प्रतिषेधति—

दक्षिणार्थं* तु यो विप्रः शूद्रस्य जुहुयाद्धविः ।
ब्राह्मणस्तु भवेत् शूद्रः शूद्रस्तु ब्राह्मणो भवेत् ॥३९॥

---

स्त्रीपाचितान्नस्य निषेधः?—इति चेत् । नायं दोषः । दासाद्यतिरिक्तशूद्रजातीयस्त्रिया एवायं निषेध इति समाधत्स्व ।

* अत्र 'दक्षिणार्थम्'—इत्युक्तेर्दक्षिणाग्रहणमन्तरा होमो न दोषावह—इति न शङ्कनीयम् । शूद्रस्याग्निसाध्ये कर्मण्यधिकाराभावात् । तत्करणे होमकर्तुर्दोषोऽस्त्येवेति सुधियो विदाङ्कुर्वन्तु ।

---

१ G. and M read सप्तजन्म स्यात्, I reads सप्त जन्मानि for सप्तजन्मा स्यात्. २. We follow here only A , while J. reads शूद्रान्नरसपुष्टाङ्ग and all others शूद्रान्नपुष्टांग for मृत-सूतकपुष्टाङ्ग ३ Except A all others read -वाक्य for -वाक्ये ४. G and H read अभिधानपूर्वक for अभिधानात्तत्पूर्वकं. ५. C. and F. वर्णन- and I. वर्णनेन both for वर्णने ६ I. reads प्रतिपादितत्वात् for प्रमितत्वात्.

इति। यो विप्रः शूद्रादक्षिणामादाय तदीयं हविः शान्ति-पुष्ट्यादिसिद्धये वैदिकैर्मन्त्रैर्जुहोति तस्य ब्राह्मणस्यैव तत्र प्रत्यवायः। शूद्रस्तु होमफलं लभेदिति ॥ ३९ ॥

अथ भोजनकाले मौनं विदधाति—

मौनव्रतं समाश्रित्य आसीनो न वदेद् द्विजः।
भुञ्जानो हि वदेद् यस्तु तदन्नं परिवर्जयेत् ॥ ४० ॥

इति। यस्तु मौनेन भोक्तव्यमिति व्रतं* तपोरूपेण स्वीकृत्य वर्त्तते स भोक्तुमासीन उत्थानपर्यन्तं किमपि वचनं न वदेत्। यदि प्रमादाद्भोजनमध्ये किञ्चिद्वाक्यं वदेत् तदानीमवशिष्टमन्नं परित्यजेत् नै तु भुञ्जीत ॥ ४० ॥

भोजनपात्रेण जलपानं निषेधति—

अर्धे भुक्ते तु यो विप्रः तस्मिन् पात्रे जलं पिबेत्।
हंतं दैवं च पित्र्यं च आत्मानं चोपघातयेत् ॥ ४१ ॥

इति। कांस्यादिपात्रे प्रक्षिप्तमन्नं भुक्त्वा भोजनसमाप्तेः प्रागेव तत्पात्रमुद्धृत्य जलं यः पिबेत् तेनानुष्ठितं हव्यं कव्यं च देवान् पितॄन् न तर्पयेत्। तेन दोषेण स्वात्मानं नरके पातयित्वोपघातयेत् ॥ ४१ ॥

* प्राणाहुतिग्रहणपर्यन्त मौनं नित्यम्। तदन्तरं भोजनसमाप्तिपर्यन्तं यन्मौनं तदैच्छिकं व्रताङ्गं वा भवति।

१. J. reads वर्जयेद् द्विज for परिवर्जयेत्. २ E. and I. read तदा for तदानी. ३. E. and I. do not insert न तु भुञ्जीत ४. G. reads अर्धं भुक्त्वा तु, B. and D. अर्धभुक्तौ तु, C and F. अर्धभुक्त्वे तु and I. अर्धभुक्ते तु all for अर्धे भुक्ते तु. ५. L. reads हतदैवं and चैव घातयेत् for हतं दैव and चोपघातयेत्. K. also substitutes चैव घातयेत् for चोपघातयेत् ६. I. reads अवघातयेत् for उपघातयेत्.

पङ्क्त्युच्छिष्टकारित्वं प्रतिषेधति—

भुञ्जानेषु तु विप्रेषु योऽग्रे पात्रं विमुञ्चति ।
स मूढः स चे पापिष्ठो ब्रह्मघ्नः से खलूच्यते ॥ ४२ ॥

इति । एकपङ्क्त्युपविष्टेषु भुञ्जानेषु सत्सु तन्मध्ये कश्चिदितरभोजनसमाप्तेः पूर्वमेव स्वपात्रं परित्यज्य भोजनान्ते चुलकं पीत्वोत्तिष्ठति तस्य निन्दाऽतिमहती । तदर्थमेव मूढादिशब्दाः प्रयुक्ताः ॥ ४२ ॥

श्राद्धकाले भोजनपात्रचलनात् पूर्वं स्वस्तिवाचनं निषेधति—

भोजनेषु च तिष्ठत्सु स्वस्ति कुर्वन्ति ये द्विजाः ।
न देवास्तृप्तिमायान्ति निराशाः पितरस्तथा ॥ ४३ ॥

इति ॥ ४३ ॥

अस्नातभोजनादिकं निषेधति—

अस्नात्वा नैव भुञ्जीत अजप्त्वाऽग्निमहूय च ।
पर्णपृष्ठे न भुञ्जीत रात्रौ दीपंविना तथा ॥ ४४ ॥

इति । यद्यपि स्नान-जप-होमानां भोजनकालात् प्राचीन-

---

* 'चुलकं' उत्तरापोशनम् । यद्यप्यत्र मूढादिशब्दप्रयोगेण महती निन्दावगम्यते तथापि न तस्य कश्चिदपि दोषोऽभिहितः । अत एव उत्थानं शिष्टसम्प्रदायविरुद्धमित्येवेति प्रतिभाति ।

---

१ M. does not insert this Śloka. २ K. and L substitute तु for च. ३ I. substitutes च for स. ४ I reads उदकं पीत्वा तिष्ठति for चुलकं पीत्वोऽत्तिष्ठति. ५ B. and D read भोजनेषु. ६ B and D. read स्वस्तिम् for तृप्तिम्. ७ H. and M. do not insert this Sloka, while K. and L. read स्नात्वा नैव च for अस्नात्वा नैव. ८. G reads अहुत्वा for अजप्त्वा and all others except A. and J. substitutes ऽग्निमपूज्य ; while I. ऽऽज्यमहूय both for ऽग्निमहूय.

काले विहितत्वादस्नातभोजनादिकं न प्रसक्तं तथापि कदाचित् केनचिन्निमित्तेन स्वस्वकालेष्वननुष्ठितेषु यदि भोजनकालः प्राप्तः स्यात् तदा स्नानादिकमकृत्वा भोजनं न कुर्वीत। तथा पत्रावल्यां भुञ्जानः पत्राणामन्तर्भागे भुञ्जीत। न तु पृष्ठभागे। तथा रात्रावन्धकारे न भुञ्जीत ॥ ४४ ॥

अथा ऽपहारादिना धनार्जनं प्रतिषेधति—

गृहस्थस्तु दयायुक्तो धर्ममेवानुचिन्तयेत्।
पोष्यवर्गार्थसिद्ध्यर्थं न्यायवर्त्ती सुबुद्धिमान् ॥ ४५ ॥
न्यायोपार्जितवित्तेन कर्त्तव्यं ह्यात्मरक्षणम्।
अन्यायेन तु यो जीवेत् सर्वकर्मबहिष्कृतः ॥ ४६ ॥

इति। गृहस्थः पुत्र-मित्र-कलत्रादयः सर्वथा रक्षणीया इत्यनया दयया युक्तोऽपि पोष्यवर्गपोषणरूपस्यार्थस्य सिद्ध्ये धर्ममेव शास्त्रीयमेव याजनादिरूपं द्रव्यार्जनोपायं चिन्तयेत्। एवं च सति न्यायवर्त्ती सन् परलोकविषयप्रधानत्वेन बुद्धिमान् भवति। तस्मात् न्यायोपार्जितेनैव याजनादिसाध्येन वित्तेनात्मनः कुटुंबस्य च रक्षणं कर्त्तव्यम्। यस्त्व-

---

१. M. reads यदा for दया-. २ E H. M read पोष्यधर्मार्थसिद्धयर्थं for पोष्यवर्गार्थसिद्धयर्थं ३ I. and J. read तु बुद्धिवान्, G. स बुद्धिवान् for सुबुद्धिमान् ४ K. and L read स्वात्मरक्षण, G. आत्मरक्षणम् and M ज्ञानरक्षणम् for ह्यात्मरक्षणम्. ५ B. and D read गृहस्थस्य, G. and H. गृहस्थै both for गृहस्थ ६. C E F. and H read शुद्धिमान् for बुद्धिमान् ७. C. and F. read आत्मार्थी कुटुबस्य, I. आत्मरक्षणं for आत्मनः कुटुंबस्य च रक्षणम् and E. G. H and J आत्मार्थं कुटुबस्य for the same. B. and D. follow our reading, but omit च.

न्यायेन चौर्यापलापादिना लब्धेन वित्तेन जीवेत् स दैवे पित्र्ये च कर्मण्यनर्हो भवति । यत्तु मनुवचनम्—

'वृद्धौ च माता-पितरौ सेती,[1] भार्या सुतः शिशुः ।
अप्यकार्यशतं कृत्वा भर्त्तव्या मनुरब्रवीत्'* ॥
(म. स्मृ. ११. ११)

इति तदापद्विषयम् ॥ ४५–४६ ॥

अथ पुण्यवस्तुदर्शनं विधत्ते—

अग्निचित् कपिला सत्री राजा भिक्षुर्महोदधिः ।
दृष्टमात्राः पुनन्त्येते तस्मात् पश्येत्[2]तु नित्यशः ॥ ४७ ॥

इति । इष्टकाचयनसंस्कृतेनाग्निना युक्तोऽग्निचित् । कपिला कपिलवर्णा धेनुः । सत्री द्वादशाहमारभ्य सहस्रसंवत्सरपर्यन्तेषु सत्रेषु यस्य कस्यचित् सत्रस्यानुष्ठाता । शास्त्रीयेण मार्गेण प्रजानां पालको राजा । चतुर्थाश्रमस्य यथावत्पालको भिक्षुः । महोदधिर्लवणसमुद्रादिः । एते दृष्टाःसन्तो द्रष्टारं पुनन्ति । कुश-हिरण्यादयो द्रष्टव्यविशेषाः पुनन्तोऽपि धारणादिकमपेक्षन्ते । न तु दर्शनमात्रेण पुनन्ति । अतस्तद्वैलक्षण्याय दृष्टमात्राः इत्युक्तम् ॥ ४७ ॥

रक्षणमात्रेण शुद्धिप्रदान् पदार्थानाह—

---

* उदाहृतोऽयं श्लोकः पूर्वमाचारकाण्डे ( प. १९८ पं. १४ ) अत्र चाचार्येण मनूक्तत्वेनोदाहृतः तथापि नायं मनुस्मृतिपुस्तकेषु सर्वत्रोपलभ्यते । नापि टीकाकृद्भिर्व्याख्यातः । क्वचित् 'भृत्यानामुपरोधेन' ( म. स्मृ. ११. १० )–इत्यस्मादग्रे दृश्यते ।

---

१ R. D. and I substitute साध्वी for सती. २. I. reads पश्येत for पश्येत्तु.

अरणिं कृष्णमार्जारं चन्दनं सुमणिं घृतम्।
तिलान् कृष्णाजिनं छागं गृहे चैतानि रक्षयेत् ॥४८॥

इति।

'योऽश्वत्थः शमीगर्भः'।
(तै. ब्रा. १. २. ८.८)

इत्यादिभिर्मन्त्रैः संस्कृतो वह्निमन्येनोपयुक्तैः काष्ठविशेषोऽरणिः। सुमणिः पद्मरागादिः॥ ४८॥

अथ गोचर्मदानं विधातुं गोचर्मनिरूपणमाह—

गवां शतं सैकवृषं यत्र तिष्ठत्ययन्त्रितम्।
तत् क्षेत्रं दशगुणितं गोचर्म परिकीर्तितम्॥ ४९॥

इति। एकेन वृषेण सहितं गोशतं सैकवृषम्। तच्च गोशतं नियन्त्रणरहितं विश्रामाय यावन्तं भूप्रदेशमाक्रम्यावतिष्ठते तावद्भूप्रदेशो दशगुणितः सन् गोचर्मशब्देनाभिधीयते। मनुस्तु प्रकारान्तरमाह—

'तिर्यग्यवोदराण्यष्टावूर्ध्वा वा व्रीहयस्त्रयः।
प्रमाणमङ्गुलस्योक्तं वितस्तिर्द्वादशाङ्गुलः॥
वितस्तिद्वितयं हस्तमिति स्वायम्भुवोऽब्रवीत्।
दशहस्तेन दण्डेन त्रिंशद्दण्डं[1] निवर्तनम्॥
पञ्च चाभ्यधिकं कृत्वा एतत् गोचर्म कीर्तितम्॥
(म. स्मृ. १२. ७–८)

इति। वृद्धमनुः—

---

१. Except A., all others read त्रिंशतं तु समन्तत, while G. त्रिंशत तु.

'सप्तहस्तेन दण्डेन त्रिंशद्दण्डं निवर्तनम् ।
तान्येव दश गोचर्म दाता पापैः प्रमुच्यते* ॥
(म. स्मृ. १२. १०)

इति ॥ ४९ ॥

पापक्षयकामिनां[2] गोचर्मदानं विधत्ते–

ब्रह्महत्यादिभिर्मर्त्यो मनो-वाक्काय-कर्मजैः ।
एतद्गोचर्मदानेन† मुच्यते सर्वकिल्बिषैः[3] ॥ ५० ॥

इति । मनो-वाक्काय-कर्माणि व्यापारास्तेभ्यो जातानि मनो-वाक्काय-कर्मजानि । नचैतेषां त्रयाणामल्पाधिकभावेन व्यवस्थितानां साधारणो निवृत्तिहेतुरयुक्त–इति वाच्यम्[4]। अत्यन्तावृतानां मानसानामीषदावृतानां वाचिकानां सकृत्कृतानां कायिकानां च समत्वसम्भवात्[5] ॥ ५० ॥

---

विज्ञानेश्वरस्त्विदमेव वाक्यं बृहस्पतिनाम्नोदाजहार ( आचाराध्याये २१० श्लोकव्याख्यायाम् ) । तत्र 'पापैः प्रमुच्यते' इत्यस्य स्थाने 'स्वर्गे महीयते' इति भेदः ।

† यद्यपि गोचर्मप्रमाणं तत्र तत्र मतभेदात् विभिन्नमानं दृश्यते तथाप्यन्यतमग्रहणान्न दोष इति सिद्ध्यति । ब्रह्महत्यादिरित्यादिशब्दात् सुरापान-सुवर्णस्तेय-गुरुतल्पगमनानां ग्रहणम् । नतु संसर्गस्य । तस्य कलौ महापातकत्वस्य निषिद्धत्वात् । आदिशब्देन विवक्षितग्रहणे सर्वशब्दग्रहणं महापातकसमानानामुपसङ्ग्रहार्थम् । मनो-वाक्काय-कर्मजैरित्यस्य मनसा सङ्कल्प्य वाचाऽभिलप्य कर्मणोपपादितैरित्यर्थः । तेन कायकृतत्वं लभ्यते । तथा च कामकृतेषु महापापेष्विदं प्रायश्चित्तं कर्तव्य-

---

१. C. H F read दाता for दत्वा B and D. दानात् for the same. २. B. and D read पापक्षयार्थं रोगिणां चर्मदानं, C. and F. पापक्षयकामिनो गोधर्मदानं, G पापक्षयाय रोगिणो गोचर्मदान. J. पापक्षयरागिणो चर्मदान all for पापक्षयकामिनां गोचर्मदान. ३. K and L. substitute पातकै for किल्बिषै. ४. G and J. read निष्कृतिहेतु for निवृत्तिहेतु. ५ B. and D. do not insert सकृत्

दानस्य फलातिशयहेतुं पात्रविशेषमाह—

कुटुम्बिने दरिद्राय श्रोत्रियाय विशेषतः।
यद्दानं दीयते तस्मै तद्दानं शुभकारकम् ॥ ५१ ॥

इति। विशेषत इति पदं कुटुम्बित्वादिभिस्त्रिभिः पात्रातिशयविशेषणैः प्रत्येकं सम्बन्ध्यते। तथा च सति यस्य महत् कुटुम्बं दारिद्र्यं चाधिकं बहुवेदपाठेन श्रोत्रियत्वमतिशायितं तादृशाय दीयमानं शुभस्य फलातिशयस्य कारकं भवति ॥ ५१ ॥

परकीयभूम्यपहरणे प्रत्यवायाधिक्यमाह—

वापी-कूप-तडागाद्यैर्वाजपेयशतैर्मखैः।
गवां कोटिप्रदानेन भूमिहर्त्ता न शुद्ध्यति ॥ ५२ ॥

इति। वाप्यादीनामेकैकस्य शुद्धिहेतुत्वं शास्त्रान्तरेषु प्रसिद्धम्। तादृशैर्बहुभिरपि न शुद्ध्यतीत्युक्तेः प्रत्यवायाधिक्यं प्रतीयते। न च सर्वात्मना* शुद्धिर्नास्तीत्येवम्परमिदं

---

मिति। अन्यथा मनोवाग्व्यापारयोः पातित्यानाधायकतया तयोर्ग्रहणमनर्थकं स्यात्—इति सुधियो विचारयन्तु।

* केचन पूर्वोक्तगोचर्मप्रमाणभूमिहरणदोषस्य निवृत्तिर्न भवतीत्याहुः। न तत्र मूलं पश्यामः।

---

१ E G and H. read तदायुर्वृद्धिकारकम् for तद्दान शुभकारकम् २ H. substitutes पात्रातिशय- for पात्रातिशय-, while B. C D E. F G. and I. omit पात्रातिशय-. ३. B. C D E F. G. and H. read दारिद्र्यादिकं for दारिद्र्य चाधिक; while J reads दारिद्र्यमधिकं बहुवेदपाठकत्वात् श्रोत्रियता बह्वी and H. बहुवेदपाठे च श्रोत्रियत्व for बहुवेदपाठेन श्रोत्रियत्वमतिशायितं. E. does not insert अतिशायित ४. I. and J. read -शतैरपि for शतैर्मखै; while M. does not insert this śloka.

वचनम्। तथा सति सुवर्णस्तेयधर्मेषु सम्भावितशुद्धिषु मध्ये तत्पाठानुपपत्तेः ॥ ५२ ॥

अथ रजस्वलाविषये काञ्चिद्विशेषमाह—

अष्टादशादिनादर्वाक् स्नानमेव रजस्वला।
अत ऊर्ध्वं त्रिरात्रं स्यादुशना मुनिरब्रीत् ॥ ५३ ॥

इति। रजोदर्शनमारभ्य चतुर्थे दिवसे स्नाता स्त्री पुनस्तत आरभ्य अष्टादशादिनादर्वाग्रजस्वला भवति चेत् तदा स्नानमेवाचरेत्। न तु त्रिरात्राशौचं कुर्यात्। अष्टादशादिनादूर्ध्वं रजोदर्शने त्रिरात्राशौचं कर्तव्यम् ॥ ५३ ॥

रजस्वलाप्रसङ्गेन बुद्धिस्थानां चाण्डालादीनां व्यवधाने देशपरिमाणमाह—

युगं युगद्वयं चैव त्रियुगं च चतुर्युगम्।
चाण्डाल-सूतिकोदक्या-पतितानामधः क्रमात् ॥५४॥

इति। अधःक्रमाद्विपरीतक्रमादित्यर्थः। ततश्चैवं योजनीयम्। पतितस्य व्यवधानमेकेन युगेन। उदक्यायाः युगद्वयेन। सूतिकायाः युगत्रयेण। चाण्डालस्य युगचतुष्टयेनेति। युगपरिमाणं लोकव्यवहारादवगन्तव्यम्* ॥ ५४ ॥

---

युगपरिमाणमुक्तं मार्कण्डेयपुराणे—

'द्वे वितस्ती तथा हस्तो ब्राह्यतीर्थादिवेष्टनम्।
चतुर्हस्तं धनुर्दण्डो नाडिका युगमेव च' ॥
(मा. पु. ४९. ३९)

---

१. G substitutes किंचित् for काचित्, while B. and D. रजस्वलाविषयकविशेषमाह for रजस्वलाविषये काञ्चिद्विशेषमाह २ E G. and M. read आषोडशादिनात् for अष्टादशादिनात् ३. B and D. substitute उशना मनुरब्रवीत् for उशना मुनिरब्रवीत् ४ G. and H. read षोडशादिनात् for अष्टादशादिनात् and E. and H. रजःस्नाता for रजस्वला, while I. omits चेत्. ५. G. reads युगादीनां परिमाण for युगपरिमाणं.

उक्तव्यवधानाऽभावे शुद्धिमाह—

ततः सन्निधिमात्रेण सचैलं स्नानमाचरेत्।
स्नात्वाऽवलोकयेत् सूर्यमज्ञानात् स्पृशते यदि ॥५५॥

इति। मात्रशब्देन स्पर्शो व्यावर्त्यते। स्पर्शाभावे स्नानमेव। स्पर्शेऽपि अकामकृते स्नानं सूर्यावलोकनं च। कामकृते द्वैगुण्यं शुद्ध्यन्तरं वा द्रष्टव्यम्। सङ्कटादिषु सत्यपि सन्निधौ स्पर्शाभावे स्नानाभावः। यथासम्भवव्यवधानस्य संवर्त्तेनाभ्युपगतत्वात्—

'संकटे विषमे चैव दुर्गे चैव विशेषतः।
हट्ट-पट्टनमार्गे च सम्भवं तु यथा भवेत्'॥
(सं. स्मृ. १८९)

इति ॥ ५५ ॥

अथ तडागादौ पशुवत् मुखेन जलपानं निषेधति—

विद्यमानेषु हस्तेषु ब्राह्मणो ज्ञानदुर्बलः।
तोयं पिबति वक्त्रेण श्वयोनौ जायते ध्रुवम् ॥५६॥

इति। 'स्नानानि पञ्च पुण्यानि' (प.स्मृ. ० ०)—इत्यारभ्य

---

इति तथा च मेदिन्याम्—

'युगो रथ-हलाद्यङ्गे न द्वयोस्तु कृतादिषु।
युग्मे हस्तचतुष्केऽपि वृद्धिमानौषधेऽपि च'॥
(गान्तवर्गे १७)

इत्यादिभिः हस्तचतुष्टयं युगमिति सिद्ध्यति।

---

१ E. reads -भावेऽशुद्धिमाह for -भावे शुद्धिमाह and H -भावेऽप्यशुद्धिमाह. २ G. reads अभ्यनुज्ञातत्वात् for अभ्युपगतत्वात् ३ I reads पात्रेषु for हस्तेषु ४. G. reads -दुर्लभ for दुर्बल. ५ C. and F. read अयोनौ for श्वयोनौ

'श्वयोनौ जायते ध्रुवम्'—इत्येतदन्तेन ग्रन्थसन्दर्भेण योऽयमाचारशेषः प्रतिपादितः तस्य सर्वस्य प्रपञ्चः पूर्वकाण्डे प्रायेण कृत इति नात्र पुनः प्रपञ्च्यते। न चैवं सति पुनरुक्तिः शङ्कनीया। मूलवचनेषु तत्र सङ्गृहीतार्थस्यात्र विवृतत्वात् ॥५६॥

अथ प्रायश्चित्तकाण्डशेषः।

तत्र केनचिन्निमित्तेन शपथमुल्लङ्घितवतः प्रायश्चित्तमाह—

यस्तु क्रुद्धः पुमान् ब्रूयाज्जायायास्तु अगम्यताम्।
पुनरिच्छति चेदेनां विप्रमध्ये तु श्रावयेत् ॥ ५७ ॥
श्रान्तः क्रुद्धस्तमोन्धो वा क्षुत्पिपासा-भयार्दितः।
दानं पुण्यमकृत्वा तु प्रायश्चित्तं दिनत्रयम् ॥ ५८ ॥
उपस्पृशेत्त्रिषवणं महानद्युपसङ्गमे।
चीर्णान्ते चैव गां दद्याद्ब्राह्मणान् भोजयेद्दश ॥५९॥

इति। यः केनचिन्निमित्तेन क्रुद्धः सन् स्वभार्याया अगम्यतां प्रतिजानीयात्—'अतः परं त्वां न गमिष्यामि। त्वं मम माता भगिनीति'। पुनरपि कालान्तरे क्रोधोपशमे सति एनां गन्तुं यदी-

---

१ B. and D omit नात्र पुन and I प्रपञ्चित for प्रपञ्च्यते २ I. repeats तत्र. ३ B C D E G. and J substitute प्रेयात् for ब्रूयात्; while I. भार्याया मातृगम्यताम् for जायायास्तु अगम्यताम्. M. reads this line as follows:—

यस्तु क्रुद्ध पुमान् भार्यां प्रतिज्ञायाप्यगम्यताम्।

B. and D substitute न गम्यताम् for अगम्यताम् ४ M. reads तां गन्तुं for चेदेनां. ५. B. and D. read श्रान्त, C and F. स तु and K. and L. आर्त्त. all for श्रान्तः, while M. reads तमोभ्रान्त्या for तमोऽधो वा ६ B. C D. E F G H. and J substitute वा for तु ७. J reads उपवास for उपस्पृशेत् ८ I. and J. read महानद्योस्तु for महानद्युप- ९. J reads चीर्णे चैव तु for चीर्णान्ते चैव १०. H. and J. insert क्रुद्ध after य and then again after निमित्तेन ११. G. reads क्रोधास्तमये for क्रोधोपशमे.

च्छति तदा पर्षदग्रे स्वकीयं पापं विनिवेदयेत्। 'अहं शपथ-प्रतिज्ञावेलायां ग्रामान्तरगमनेन[1] गृहव्यापारेण वा श्रान्त आसम्। मदीये वचस्युल्लङ्घिते सति क्रुद्धोऽभूवम्। तस्या अपराधाभावेऽपि तमसा भ्रान्त्या अन्धः परामर्शरहितोऽभूवम्। क्षुधा-पिपासया राजादिभयेन वा पीडित आसम्। अत एवमादिदोषप्रयुक्तमिदमगम्यत्वाप्रतिज्ञानम्। नतु विवेकपूर्वकम्। तस्मादस्य पापस्य प्रायश्चित्तमनुगृह्णन्तु भवन्त'—इति। यस्तु दानं करिष्यामीति शपथपूर्वं प्रतिज्ञाय तयैवाशया[2] समागताय ब्राह्मणाय किमपि न प्रयच्छति, तथा काशीयात्रादिकं सङ्कल्प्य यथाकथञ्चित्[3] किञ्चित् दूरं गत्वा पश्चाद् अश्रद्धां प्राप्तस्तत् पुण्यं न करोति तेष्वेतेषु त्रिषु निमित्तेषु[4] विप्रैर्निर्दिष्टमिदं प्रायश्चित्तमाचरितव्यम्। द्वयोर्महानद्योः सङ्गमे गत्वा त्रिषवणस्नानपूर्वकं त्रिरात्रोपवासं कुर्यात्। चतुर्थदिने गां दद्यात् दश ब्राह्मणांश्च भोजयेत्॥ एतेष्वाद्यनिमित्तेषु[5] वर्णभेदेन प्रायश्चित्तमाह यमः—

'स्वभार्या तु यदा क्रोधादगम्येति च यो वदेत्[6]।
प्राजापत्यं चरेद्विप्रः क्षत्रियो दिवसान् नव॥
षड्रात्रं तु चरेद्वैश्यस्त्रिरात्रं शूद्र आचरेत्'।
(य. स्मृ. ६. १३)

इति। 'एतस्य कार्यस्याकरणे चतुर्षु वर्णेषु अन्यतमं हतवा-

---

१ G and J, read तयैवाश्रमसमागताय for तयैवाशया समागताय, while B. C. D. E. and F read तयैवा- for तयैवा-. २ G and J. omit -कथञ्चित्. ३. I. omits एतेषु and B and D निमित्तेषु ४. B and D. read एतेष्वद्यनिमित्तेषु, J. एतेष्वनिमित्तेषु and G एतेष्वेव निमित्तेषु for एतेष्वाद्यनिमित्तेषु, but these are incorrect. ५ I reads अगम्येति नरो for अगम्येति च यो. ६. J. substitutes अस्य for एतस्य.

नस्मि'—इति शपथं कृत्वा यस्तत् कार्यं न करोति तस्य प्रायश्चित्तं यम एवं आह—

'विप्रस्य वधसंयुक्तं कृत्वा तु शपथं नृपः ।
ब्रह्महा यावकान्नेन व्रतं चान्द्रायणं चरेत् ॥
क्षत्रियस्य पराकं तु प्राजापत्यं चरेद् द्विजः ।
वृषलस्य त्रिरात्रं तु व्रतं शूद्रहणश्चरेत् ॥
केचिदाहुरपापं तु वृषलस्य वधं मृषा ।
नैतन्मम मतं यस्मात्तद्वस्तेन भवत्यसौ'* ॥
(य. स्मृ. ६. १६–१८)

इति । मनुरप्यनृतप्रायश्चित्तमाह—

'वाग्दैवतैस्तु चरुभिर्यजेरंस्ते सरस्वतीम्† ।
अनृतस्यैनसस्तस्य कुर्वाणा निष्कृतिं पराम् ॥

---

*यः शपथं कृत्वा तत् कार्यं न करोति स ब्रह्महा भवति । एवमेव क्षत्रवैश्य-शूद्रवधशपथं कृत्वा तत् कार्यं न कुर्वीत चेत् तत्तद्वर्णहन्ता भवति इति योजयेत् । शूद्रवधशपथो न दोषावह इति केचिदाहुः तन्न । यमस्य सम्मतम् । यतस्तेन शपथेन सपुरुषः इतरवत् 'तद्धः' तं शूद्रं हन्तीति तद्धः भवति । शूद्रहत्यायाः प्रायश्चित्तमस्त्येव ततश्चैवमुक्तं भवति—वर्णत्रयेण शूद्रहत्याशपथकरणे शूद्रेण च स्ववर्णस्येतरस्य वा हत्याशपथकरणे दोषोस्त्येवेति यमस्य मतम् ।

† यत्र साक्षिणोऽनृतं वदन्ति तत्र ते वाग्दैवतैश्चरुभिः सरस्वतीं यजेरन् । अनवक्षावितान्नरूपपकौदने चरुशब्दः प्रसिद्धः । बहुवचननिर्देशादत्र कपिञ्जलन्यायेन चरुत्रयं वेदितव्यम् । कूष्माण्डा नाम मन्त्रा

---

१. Except A and 1 all omit यः. २. Except A. and I. all others do not insert एव ३. B. D. and I read तथा for चरेद्. ४. B. and D. read शूद्रश्चरेच्चिह for शूद्रहणश्चरेत् ५. G. and I read तस्मात् for यस्मात् while I कृत and others हत for तद्ध. ६. All, except C F.,G. and I. others read प्राग्देवतै for वाग्दैवतै ७. Except A. and the text all others read तत्र for तस्य.

कूष्माण्डैर्वापि जुहुयाद्घृतमग्नौ यथाविधि।
उदित्यृचा वा वारुण्या तृचेनाप्दैवतेन च' ॥
(म. स्मृ. ८. १०५–१०६)

इति। प्रजापतिः—

'अनृती सोमपः कुर्यान्निरात्रं परमं तपः।
पूर्णाहुतिं वा जुहुयात् सप्तवत्या घृतेन तु' ॥

इति। प्रतिश्रुत्यानृतोक्तौ हारीत आह—

'प्रतिश्रुत्यानृतं ब्रूयान्मिथ्या सत्यमथापि वा।
स तप्तकृच्छ्रसहितं चरेच्चान्द्रायणं व्रतम्' ॥

इति। ब्रह्मचारिविषये गर्ग आह—

'त्रिरात्रमेकरात्रं वा अनृतोक्तौ व्रतं चरेत्।
मासं भुक्त्वा ब्रह्मचारी पुनःसंस्कारमाचरेत् ॥

---

यजुर्वेदे प्रसिद्धाः। 'यद्देवा देव हेडनं' (मा. सं. २०. १४) इत्येवमादय'। उदित्यृचा 'उदुत्तमं वरुण पाशम्'—इत्यनया ऋचा वरुणदेवताकया। अप्दैवतेन 'आप्यायस्व' इति तृचेन सूक्तेन। राघवानन्दस्तु 'तदित्यृचा' इति पाठमाश्रित्य—'तदित्यृचा गायत्र्या। तदादिकेत्युक्तत्वात् उदुत्तमं वरुण पाशमित्येतया वारुण्या' इति व्याचख्यौ।

---

१ H. reads व्रतमस्मिन् for घृतमग्नौ. २ B. D. H. and I. substitute च for वा and all others except A. and the text read वारुण्यबक्चेन for वारुण्या तृचेन. ३. The text substitutes वा for च ४. B. and D do not insert प्रजापति ५. B and D read अनृतोक्तौ तु समय, C. and F अनृते सोम and G H. and I. अनृतोक्तौ सोमप all for अनृती सोमप ६ I. reads पूर्णाहुतीर् for पूर्णाहुतिं ७. All, except A. and I. others read सप्त तेन घृतेन तु for सप्तवत्या घृतेन तु. ८. B. D and G. substitute च for वा. ९. B. and D. read ब्रह्मचार्यनृते चरेत्, E F. G H. and I. ब्रह्मचार्यनृतं चरेत् and C. F प्रत्यावार्योनृत चरेत् all for अनृतोक्तौ व्रत चरेत्.

दुर्ब्राह्मणगृहभोजने प्रायश्चित्तमाह—

दुराचारस्य विप्रस्य निषिद्धाचरणस्य च[1]।
अन्नं भुक्त्वा द्विजः कुर्यादिनमेकमभोजनम् ॥ ६०॥

इति। दुराचारत्वं विहिताननुष्ठानम्। यो विप्रो विहितं नानुतिष्ठति निषिद्धं त्वाचरति[2] तस्य गृहे भुक्त्वा दिनमेकमुपवसेत् ॥ ६० ॥

तदशक्तौ प्रायश्चित्तान्तरमाह—

सदाचारस्य विप्रस्य तथा वेदान्तवेदिनः।
भुक्त्वान्नं मुच्यते पापादहोरात्रान्तरान्नरः[3] ॥ ६१॥

इति। एकस्मिन् दिने सकृदसकृद्वा दुर्ब्राह्मणगृहे भोजनेन यत् कृतं पापं तस्य सदाचारविप्रस्य[4] वेदान्तिगृहे वा भोजनेन शुद्धिः। यद्वा[5] एकस्मिन् दिने सम्प्राप्तं यत् पिपीलिकावधादिक्षुद्रपापजातं[6] तत्सर्वं विशिष्टान्नभोजनेन[7] विशुद्ध्यति। पवित्रगृहान्नभोजनेन पापविशुद्धिं बौधायनोऽप्याह—

---

१. C. and F. substitute वा for च. २. All others except A. and I. substitute तु for च. ३. K. and L. read अहोरात्रांतरान्तर. and M. reads अहोरात्र तु वै नर. ४. All others except A G. and I. do not insert सदाचारविप्रस्य वेदान्तिगृहे and omit वा, while G. omits the whole portion, as—

एकस्मिन् दिने सकृदसकृद्वा दुर्ब्राह्मणगृहे भोजनेन यत् कृतं
पापं तस्य सदाचारविप्रस्य वेदान्तिगृहे वा भोजनेन शुद्धि ।

५. B. D. and G. omit यद्वा; while B. D. substitute तत् पिपीलिका- for यत् पिपीलिका-. ६. G inserts -महा- between -क्षुद्र- and -पाप-. ७. I reads शिष्टान्नभोजनेन शुद्धयति.

'भैक्ष्याहारोऽग्निहोत्रिभ्यो मासेनैकेन शुद्ध्यति ।
*यायावर-वनस्थेभ्यो दशभिः पञ्चभिर्दिनैः ॥
ऐकाहधनिनोऽन्नेन दिनेनैकेन शुद्ध्यति ।
कपोतव्रतनिष्ठस्य पीत्वाऽपः शुद्ध्यते त्रिभिः' ॥
(बौ. स्मृ. ४. ९. २७–२८)

इति ॥ ६१ ॥

मरणकालोपहतेः प्रायश्चित्तमाह—

ऊर्ध्वोच्छिष्टमधोच्छिष्टमन्तरिक्षमृतौ तथा ।
कृच्छ्रत्रयं प्रकुर्वीत अशौचमरणे तथा ॥ ६२ ॥

इति । मरणकाले वान्त्यादिकमूर्ध्वोच्छिष्टं मूत्रादिकमधोच्छिष्टम् । तयोरन्यतरद्यदा सम्पद्यते तदा संस्कर्ता पुत्रादिर्धनादिना प्रत्याम्नायेन प्राजापत्यत्रयं कुर्यात् । मंचकादौ मरणमन्तरिक्षमृतिः । रजस्वला-सूतिकामरणमशौचमरणम् । तस्मिन् द्विविधेऽपि मरणे कृच्छ्रत्रयं कुर्यात् ॥ ६२ ॥

प्राजापत्यकृच्छ्रस्य चतुरः प्रत्याम्नायानाह—

---

* ये प्रत्यहं धान्ययाच्ञा कृत्वा पञ्चयज्ञादिविहितानुष्ठानपूर्वक गृहस्थधर्मानाचरन्ति ते यायावराः एकाहनिर्वाहपर्याप्तं धनं यस्य स एकाहधनी तस्य । कपोतव्रत कपोतवृत्तिः । सा च 'उञ्छवृत्तिरिति (भा. पु. ९.१८.२९ टीकायां) श्रीधरस्वामी ।

---

१. B. and D. read एकाहात् for एकाह-; while A. C. E. F. G. and I एकाह धनिन for एकाहधनिन २ The text reads वृत्ति-for -व्रत- ३. I. reads शुद्धयति for शुद्ध्यते; while except A and the text others read द्विजः for त्रिभिः. ४ K. and L. read अवरोच्छिष्टम् for अधोच्छिष्टम्. ५. Except A. all others omit अपि. ६ B. and D. omit-कृच्छ्रस्य and read प्राजापत्यस्य.

कृच्छ्रं देव्ययुतं चैव प्राणायामशतद्वयम्।
पुण्यतीर्थेऽनार्द्रशिरःस्नानं द्वादशसङ्ख्यया॥ ६३॥
द्वियोजने तीर्थयात्रा कृच्छ्रमेकं प्रकल्पितम्।

इति। देवी गायत्री। तस्या अयुतसङ्ख्याको जपो देव्ययुतम्। स एकः प्रत्याम्नायः। प्राणायामानां शतद्वयं द्वितीयः प्रत्याम्नायः। अनार्द्रं शिरो यस्याः सावनार्द्रशिरास्तस्य स्नानमनार्द्रशिरःस्नानम्। सकृत् स्नात्वा तदङ्गानुष्ठानं च विधाय केशान् शोषयित्वा ततो द्वितीयं स्नानमाचरेत्। एवंविधं स्नानद्वादशकं पुण्यतीर्थे कृतं तृतीयः प्रत्याम्नायः। पुण्यतीर्थमुद्दिश्य योजनद्वयगमनं चतुर्थः। तथोदकवासादयोऽपि प्रत्याम्नाया अवगन्तव्याः। तदुक्तं चतुर्विंशतिमते—

'कृच्छ्रोऽयुतं च गायत्र्या उदवासस्तथैव च।
धेनुप्रदानं विप्राय सममेतच्चतुष्टयम्॥
तिलहोमसहस्रं तु वेदस्याध्यायमेव च।
विप्रा द्वादश वा भोज्याः पावकेष्टिस्तथैव च॥
अन्यानि वा पवित्राणि समान्याहुर्मनीषिणः'।

इति॥ ६३॥

अथ रेतस्खलनप्रायश्चित्तमाह—

---

१ F K. and L read कृच्छ्रो for कृच्छ्रं २ M. reads -शतत्रयम् ३ I. reads द्वियोजने for द्वियोजन. ४. M reads एव for एक. ५ B. and D. omit तस्य and read अनार्द्रशिर स्नानम् for अनार्द्रशिरास्तस्य स्नानम्. ६. H reads तत. for तथा ७ G. reads यदुक्त ८. I reads वेदाध्ययनमेव for वैदस्याध्यायमेव. ९ B. D. G and J. read अन्या वा पावनी काचित्, H. अन्यानि वा पावनानि for अन्यानि वा पवित्राणि.

गृहस्थः कामतः कुर्याद्रेतसःस्खलनं भुवि ॥६४॥
सहस्रं तु जपेद्देव्याः प्राणायामैस्त्रिभिः सह ।

इति । अकामकृते याज्ञवल्क्य आह—

'यन्मेद्य रेत इत्याभ्यां स्कन्नं रेतोभिमन्त्रयेत् ।
स्तनौन्तरे भ्रुवोर्मध्ये तेनानामिकया स्पृशेत्' ॥
(या. स्मृ. ३. २७८)

इति ।

'यन्मेद्य रेतः'
(तै. आ १. ३०. २)

इत्येकस्या ऋचः प्रतीकमिदम् ।

'पुनर्मामैत्विन्द्रियम्'
(तै. आ. १. ३०. २)

इत्युपरितनो मन्त्रस्ताभ्यां मन्त्राभ्यामनामिकया रेत आदाय स्तनयोर्भ्रुवोर्वा मध्यमुपस्पृशेत् । यतीनां वनवासिना च प्रयत्नोत्सर्गे कण्वोक्तं द्रष्टव्यम्—

'यत्नोत्सर्गं गृही कृत्वा वारुणीभिरुपस्पृशेत्* ।
वानप्रस्थो यतिश्चैव चरेच्चान्द्रायणव्रतम्' ॥

---

* 'वारुणीभिः' वरुणदैवत्याभिः 'इम मे वरुण'—इत्यादिभिः ऋग्भिः उपस्पृशेत् ।

---

१. M reads सेचनं for स्खलन २ B D and E read स्तनान्तर भ्रुवोर्मध्य. H and the text स्तनान्तर भ्रुवोर्मध्य, G and J स्तानान्तरे भ्रुवोर्मध्ये all for स्तनान्तरे भ्रुवोर्मध्ये ३. H reads पुनर्मामैत्वशुद्धमिति for पुनर्मामैत्विन्द्रियमिति ४ G omits the following portion.—

यतीनां वनवासिनां च प्रयत्नोत्सर्गे कण्वोक्त द्रष्टव्यम्—
'यत्नोत्सर्गं गृही कृत्वा वारुणीभिरुपस्पृशेत् ।
वानप्रस्थो यतिश्चैव चरेच्चान्द्रायणव्रतम्' ॥

इति । स्वप्ने तु काश्यप आह—
'सूर्यस्य त्रिर्नमस्कारं स्वप्ने सिक्त्वा गृही चरेत् ।

५. H. and I. read -व्रयम् for -व्रतम्.

इति। स्वप्ने तु काश्यप आह—

'सूर्यस्य त्रिर्नमस्कारं स्वप्ने सिक्त्वा गृही चरेत्।
वानप्रस्थो यतिश्चैव त्रिः कुर्यादघमर्षणम्' ॥
(का. स्मृ. ६. ११)

इति। ब्रह्मचारिणम्प्रति मनुराह—

'स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः।
स्नात्वाऽर्कमर्चयित्वा त्रिः पुनर्मामित्यृचं जपेत्'* ॥
(म. स्मृ. २, १८१)

इति। भयादौ प्रजापतिराह—

'भये रोगे तथा स्वप्ने सिक्त्वा शुक्रमकामतः।
आदित्यमर्चयित्वा तु पुनर्मामित्यृचं जपेत्' ॥
(प्र. स्मृ. ३. १९)

इति। नैष्ठिकस्य हारीत आह—

'उपकुर्वाणस्तु यत् कुर्यात्कामतोऽकामतोऽपि वा।
तदेव द्विगुणं कुर्याद्ब्रह्मचारी च नैष्ठिकः' ॥

इति ॥ ६४ ॥

अथ ब्रह्मवधस्य महापातकस्य प्रायश्चित्तमाह—

---

* पुनर्मामिति ऋक् उपरितनयाज्ञवल्क्यवचनव्याख्याने निर्दिष्टा।

---

१. C. F. read कश्यप for काश्यप. २. I. and F. substitute तु for त्रि.; while G. omits the following portion.—

'स्नात्वाऽर्कमर्चयित्वा त्रि पुनर्मामित्यृच जपेत्'।

'इति। भयादौ प्रजापतिराह—

'भये रोगे तथा स्वप्ने सिक्त्वा शुक्रमकामत.।.

चतुर्विद्योपपन्नस्तु विधिवद्ब्रह्मघातके ॥ ६५ ॥
समुद्रसेतुगमनं प्रायश्चित्तं विनिर्दिशेत् ।

इति । ऋग्वेदोदयश्चतस्रो वेदाश्चतुर्विद्याः । ताभिरुपपन्नस्तदध्ययनानुष्ठानवान् । एतेन

'चातुर्वैद्यो विकल्पी च'

(अ. स्मृ. ३. १९)

इत्यादिरङ्गिरसा प्रोक्ता सर्वा परिषदुपलक्ष्यते । समुद्रे दाशरथिना बद्धः सेतुः समुद्रसेतुः । तद्यात्रां ब्राह्मणघातके पुरुषे यथाविध्यनुष्ठेयत्वेन निर्दिशेत् ॥ ६५ ॥

विधिवदित्युक्तम् । कोऽसौ विधिरित्याकाङ्क्षया तदितिकर्तव्यतामाह—

सेतुबन्धपथे भिक्षां चातुर्वर्ण्यात् समाचरेत् ॥ ६६ ॥
वर्जयित्वा विकर्मस्थान् छत्रोपानद्विवर्जितः ।

इति । चतुर्णां वर्णानां यानि कर्माणि शास्त्रविहितानि तेभ्यो विरुद्धानि विकर्माणि तेषु तात्पर्येण तिष्ठन्तीति विकर्मस्थाः । तान् वर्जयित्वा यथाशास्त्रं वर्तमानाच्चातुवर्ण्यात् सेतुबन्धमार्गे भिक्षां चरेत् । छत्रोपानद्विवर्जित इति न केवलं भिक्षावेलायाम् । किन्तु मार्गगमनेऽपि द्रष्टव्यम् ॥ ६६ ॥

---

१ I. reads चतुर्विद्योपपन्ने तु २. K and L. read विप्रघातकें for ब्रह्मघातकें. ३. I and J read ऋगादय. चतस्रो. ४. I. reads चातुर्विद्योपपन्न ह्याभ्यां च for चातुर्विद्यो विकल्पी च. ५. C. F and G. omit समुद्रसेतुः and C. and F. also omit तद्यात्रां ६. B D. and H. read चातुर्वर्ण्यं for चातुर्वर्ण्यात्. ७. Except E and I. others insert विकर्मस्थाश्च ; while G. reads विकर्मस्थ for the same. ८. I. omits मार्ग-, while G. substitutes इति for अपि.

भिक्षमाणेन वक्तव्यमुक्तिप्रकारमाह—

अहं दुष्कृतकर्मा वै महापातककारकः ॥ ६७ ॥
गृहद्वारेषु तिष्ठामि भिक्षार्थी ब्रह्मघातकः।

इति। पापप्रख्यापनस्य प्रायश्चित्ताङ्गत्वात् प्रतिभिक्षागृहं अहं दुष्कृतकर्मेत्यादिवाक्येन स्वपापं प्रख्यापयेत्। अप्रख्यापने बाधमाहाङ्गिराः—

'कृत्वा पापं न गूहेत गूह्यमानं विवर्धते'।
(अं. स्मृ. १.४७)

इति। दुष्कृतकर्मा, महापातककारको, ब्रह्मघातक इति पदत्रयस्य महासामान्या-ऽवान्तरसामान्य-तद्विशेषवाचित्वादपुनरुक्तिः ॥ ६७ ॥

अध्वश्रान्तस्यावस्थातुं देशविशेषमाह—

गोकुलेषु वसेच्चैव ग्रामेषु* नगरेषु वा ॥ ६८ ॥
तपोवनेषु तीर्थेषु नदीप्रस्रवणेषु वा।

इति। बहूनां गवां ग्रामे स्थापयितुमशक्यत्वेनारण्ये स्थापनाय कल्पितो व्रजप्रदेशो गोकुलम्। यत्र व्याघ्रादिभयात् ग्रामाद्बहिर्निवासोऽशक्यः। तत्र ग्रामे नगरे वा प्रविश्य गोशाला-

कतिपयजननिवासो ग्रामः। चातुर्वर्ण्यानेकजननिवासो नगरम्। मुन्यादिनिवासस्तपोवनं नैमिषादिकम्।

१ B. and D read the following line as follows:—
गृहद्वारेषु भिक्षामि तिष्ठामि ब्रह्मघातक ।.

२. C and F read अवान्तर-सामान्याभ्यां तद्विशेषवाचित्वात्. ३. K. and L. read नापि for चैव. ४. M. reads तथा वनेषु for तपोवनेषु ५ Except C. and F all others substitute च for both वा. ६. J omits ग्रामात् ७. B. D. and G. read ऽशक्त for ऽशक्य also substitute तदा for तत्र.

देवायतनादौ पुण्यप्रदेशे निवसेत् । असति तु व्याघ्रादिभ्यो भये तपोवनादिषु निवसेत् । नदीप्रस्रवणेभ्योऽन्यानि तीर्थानि पम्पासरोवरादीनि ॥ ६८ ॥

न केवलं भिक्षागृहेष्वेव पापप्रख्यापनम् । किन्तु निवासस्थानेष्वपीत्याह —

एतेषु ख्यापयन्नेनः पुण्यं गत्वा तु सागरम् ॥ ६९ ॥
दशयोजनविस्तीर्णं शतयोजनमायतम् ।
रामचन्द्रसमादिष्टनलसञ्चयसञ्चितम् ॥ ७० ॥
सेतुं* दृष्ट्वा समुद्रस्य ब्रह्महत्यां व्यपोहति ।

इति । यथोक्तप्रकारेण पापप्रख्यापनपुरःसरं यात्रां कृत्वा सेतौ दृष्टे सति तत्पापक्षयः ॥ ६९–७० ॥

सेतुदर्शनानन्तरकर्तव्यमाह—

सेतुं दृष्ट्वा विशुद्धात्मा त्ववगाहेत सागरम् ॥ ७१ ॥

---

* 'दशयोजनविस्तीर्णं शतयोजनमायतम्'—इति सेतोर्विशेषणद्वयम् । स च सेतुर्दशयोजनविस्तीर्णः शतयोजनमायतः दीर्घः । यथा श्रीमद्रामायणे—

'दशयोजनविस्तीर्णं शतयोजनमायतम् ।
ददृशुर्देव-गन्धर्वा नलसेतुं सुदुष्करम्' ॥
(वा. रा. ६. २२. ७२)

इति । रामचन्द्रेण समादिष्टेन नलनाम्ना वानरेण योऽयं काष्ठ-पाषाणादिसञ्चयः कृतः तेन सञ्चितं बद्धम् ।

---

१ I. omits तु. २ B and D read तेषु प्रख्याप्य यत्नेन, J एतेषु ख्यापयन्नेव, K. and L. एतेषु ख्यापयन्नेक all for एतेषु ख्यापयन्नेन. ३. B. D. G. H. I. J. and M. read -समादिष्ट for -समादिष्ट-. ४. Except H. all others read सेतोर्दर्शने for सेतौ दृष्टे. ५ B. D G. and I read सेतुदर्शनानंतरं for सेतुदर्शनानतर-. ६ K. L. and M. do not insert this line.

इति। स्पष्टोऽर्थः[1] ॥ ७१ ॥

सेतुं द्रष्टुमशक्नुवतो भूपस्यापि[2] पक्षान्तरमाह—

यजेत वाश्वमेधेन राजा तु पृथिवीपतिः।

इति। अश्वमेधेऽप्यशक्तस्य तदुपासनं वेदितव्यम्। तथा च तैत्तिरीयब्राह्मणे* श्रूयते—

'सर्वं वा एतेन पाप्मानं देवा अतरन्नपि वा एतेन ब्रह्महत्यामतरन् सर्वं पाप्मानं तरति तरति ब्रह्महत्यां यो ऽश्वमेधेन यजते य उ चैनमेवं वेद'।

(तै. सं. ५. ३. १२. १. २)

इति। तदुपासनं च—

'उषा वा अश्वस्य'।

(तै. सं. ७. ६. २५. १)

---

* अत्र सर्वेष्वप्यादर्शपुस्तकेषु 'तैत्तिरीयब्राह्मणे' इत्येव वर्तते, तथापि 'सर्वं वे'त्याद्यग्रिमं वाक्यं तैत्तिरीयसंहितायामेव वर्तते न ब्राह्मणे। तदयं

---

१. Except I. all others omit स्पष्टोऽर्थ. २ E has in the margin —

'अनुपातकिनस्त्वेते महापातकिनो यथा।
अश्वमेधेन शुद्धयन्ति तीर्थानुसरणेन वा' ॥

इति। तत्र अश्वमेध सार्वभौमविषय।

'राजा सार्वभौमोऽश्वमेधेन यजेत' ॥

इति श्रुते।

We are unable to find out whether the above portion can be found in this book or others. ३ The quoted portion does not occur in Taittirîya Brâhmana, but is found in Taittirîya Samhitâ and the next sentence also in the Samhitâ and not in Taittirîya Brâhmana

इत्यादौ वाजसनेयिब्राह्मणे तैत्तिरीयब्राह्मणे* च प्रपञ्चितम् ॥ ७२ ॥

सेतुयात्रां समाप्य पुनः प्रत्यागतस्य कर्तव्यमाह—

पुनः प्रत्यागतो वेश्मवासार्थमुपसर्पति ॥ ७२ ॥
सपुत्रः सह भृत्यैश्च[1] कुर्याद्ब्राह्मणभोजनम् ।
गाश्चैवैकशतं दद्याच्चतुर्विद्येषु[2] दक्षिणाम् ॥ ७३ ॥
ब्राह्मणानां प्रसादेन ब्रह्महा तु विमुच्यते ।

इति । ब्राह्मणानां प्रसादो नाम-विपापो विशुद्धस्त्वमसीत्येवमाद्युक्तिः । इदं च व्रतं गुणविहीनस्य ब्राह्मणस्य[3] वधे द्रष्टव्यम् । अस्मिन्नेव विषये व्रतान्तरमाह याज्ञवल्क्यः—

'पात्रे धनं[4] वा पर्याप्तं दत्वा शुद्धिमवाप्नुयात्' ॥
( या. स्मृ. ३. २९० )

इति । विद्या-तपोयुक्ते पात्रे गो-भू-हिरण्यादिकं जीवनोपायपर्याप्तं दद्यात् । वा शब्देन सर्वस्वं सपरिच्छेदं वा गृहं दद्यात् । तदाह मनुः—

---

लेखकप्रमादो वा माधवाचार्यस्यैव नाम विस्मृतिर्वेति न ज्ञायतेत्यलं महतां प्रमादोद्घाटनेन ।

* 'उषा वा' इत्येतद्वाक्यं न तैत्तिरीयब्राह्मणे दृश्यते । अपि तु तैत्तिरीयसंहितायामेव वर्तते 'तैत्तिरीयब्राह्मणे' इति तु प्रामादिकमेवेति प्रतिभाति ।

---

१. C. and F. read सहपुत्र सह भृत्यैश्च, J. सहपुत्र सभृत्यैश्च and K. L. सपुत्र सहभृत्यश्च all for सपुत्र सह भृत्यैश्च २. B. D. and H. read ब्रह्मातुर्वेद्येषु and E. I. चातुर्वैद्येषु for चातुर्विद्येषु ३ B D. and I. omit ब्राह्मणस्य ४ C. and F. read घृत for धन.

'सर्वस्वं वा[1] वेदविदे ब्राह्मणायोपपादयेत्* ।
धनं वा जीवनायाल[2]ं गृहं वा सपरिच्छदम्' ॥
(म. स्मृ. ११. ७६)

इति । अपुत्रस्य सर्वस्वदानं पुत्रवतः[3] सपरिच्छदं गृहदानमिति व्यवस्था ॥ ७२–७३ ॥

अथान्यमुनिप्रणीतानां व्रतविशेषाणां व्यवस्थां वर्णयामः। तत्र याज्ञवल्क्यः—

'शिरःकपाली[4] ध्वजवान् भिक्षाशी कर्म वेदयन् ।
ब्रह्महा द्वादशाब्दानि मितभुक् शुद्धिमाप्नुयात्' ॥
(या. स्मृ. ३. २४३.)

इति । स्वव्यापादितब्राह्मणशिरःकपाल-ध्वजवान्—

'कृत्वा शवशिरोध्वजम्' ।
(म. स्मृ. ११. ७२)

इति मनुस्मरणाच्च ।

'ब्राह्मणो ब्राह्मणं घातयित्वा तस्यैव शिरःकपाल-
मादाय तीर्थान्यनुसंचरेत्' ।
(ज्ञा. स्मृ. ९. २६)

---

* अत्रायमर्थवादः 'धनं वा जीवनायालम्'—इति । यावता धनेन दत्तेन प्रतिग्रहीतुर्जीवनं पर्याप्तं भवति तावता धनेन तस्मै जीवितं दत्तं भवति एतदेव साम्यम् ।

---

१. The text reads स वेदविदुषे for वा वेदविदे. २. H. reads जीवनायात्मगृह for जीवनायालं. ३. Except A. all others omit पुत्रवत. ४. H. reads -कपालो for -कपाली.

इति शातातपस्मरणाच्च । एतदुभयं पाणिनैव ग्राह्यम्—

'खट्वाङ्ग-कपालपाणि.' ।

( गौ. स्मृ. २२. ४ )

इति गौतमस्मरणात् । खट्वाङ्गशब्देन दण्डारोपितशिरः-कपालात्मको ध्वजो गृह्यते । भिक्षार्थं त्वन्यदेव मृत्कपालं ग्राह्यम् ।

'*मृण्मयकपालपाणिर्भिक्षायै ग्रामं प्रविशेत्' ।

( गौ. स्मृ. २२. ६ )

इति गौतमस्मरणात् । तथा शङ्खोऽपि—

'ब्रह्महा परिषदानुमतः खट्वाङ्गी गर्दभाजिनी मृण्मयपात्रपतितशिष्टान्नभोजी स्वकर्म विख्यापयन् चरेद्वैक्ष्यमेककालाहारः । शून्यागार-नदी-

---

* अस्मद्दृष्टगौतमस्मृतिपुस्तकेषु नेदं सूत्रं कुत्राप्युपलभ्यते । नापि व्याख्याकृता हरदत्तेन विवृतम् । भिक्षार्थं मृण्मयपात्रं ग्राह्यमित्यपि न तस्य सम्मतमिति प्रतिभाति । यतस्तेन 'खट्वाङ्ग' इत्येतत्सूत्रव्याख्याया—'खट्वाङ्गं दक्षिणे पाणौ । कपाल सव्ये भिक्षार्थं पानीयपानार्थं भोजनार्थं च । तथा चापस्तम्बः—

'पुरुषशिरः प्रतिपानार्थमादाय खट्वाङ्गं दण्डार्थे' ।

( आ. ध. सू. १. १०. २७. २१ )

इत्युक्तम् ।

---

१. B. D. G. omit this:—

एतदुभयं पाणिनैव ग्राह्यम् ।

'खट्वाङ्ग-कपालपाणि.' ।

इति गौतमस्मरणात् ।

२. I. J does not insert -कपाल-. ३. B. D. and G. omit मृण्-. ४. I. reads -भिक्षान्न- for -शिष्टान्न-.

पर्वत-वृक्षमूल-गुहानिकेतवः स एवं द्वादशे वर्षे शुद्धिमाप्नोति'।

(शं. स्मृ. १६. १)

इति। वनादिवासिना तेन भवितव्यम्। यथाह मनुः—

'ब्रह्महा द्वादशाब्दानि कुटीं कृत्वा वने वसेत्।(७२)
कृतवापनो वा निवसेद् ग्रामान्ते गोव्रजेऽपि वा।
आश्रमे वृक्षमूले वा सर्वभूतहिते रतः'* ॥ (७८)

(म. स्मृ. ११. ७२–७८)

इति। 'कृतवापनो वा' इति वाशब्देन जटाधारणेन सह विकल्पोऽवगम्यते†। अत एव संवर्तः—

'ब्रह्महा द्वादशाब्दानि वालवासा‡ जटी ध्वजी'।

(सं. स्मृ. १०९)

इति। लोहितमृण्मयखण्डशरावेण भिक्षा ग्राह्या। तथा-चापस्तम्बः—

---

* तृण-पर्णादिकृतो निकेतो वर्षातप-शीतत्राणादिहेतु गृहं कुटी। द्वादशाब्दिकव्रतस्यैव 'कृतवापन' इत्यादिर्विशेषः। गोविन्दराजस्तु 'समाप्ते द्वादशे वर्षे' (म. स्मृ. ११. ८१) इत्यभिधानात् द्वादशवार्षिकस्यायं गुणविधिरिति मन्यते।

† नात्र विकल्पो मेधातिथ्यादिसम्मतः।

‡ लोमवद्वसन इत्यर्थः।

---

१. G substitutes स केतन for स एव, while I. omits स २ G reads तथा च for यथाह ३ The text substitutes -समा for -अब्दानि ४. The text omits वा. ५ E. and H substitute आसने for आश्रमे ६ The text substitutes गो-ब्राह्मणहिते रतः for सर्वभूतहिते रत ७. The text reads ब्रह्मघ्नस्तु वन गच्छेत् वल्कवासा for ब्रह्महा द्वादशाब्दानि वालवासा.

'लोहितकेन मृण्मयखण्डशरावेण भिक्षायै ग्रामं प्रविशेत्'।
(आ. ध. [1] १ १. २४. १४)

इति। अत्र मृष्टं लभ्यत—इति [2] सङ्कल्पमकृत्वा भैक्ष्यमाचरेत्। तदाह वसिष्ठः—

'सप्तागाराण्यसङ्कल्पितानि चरेद्भैक्ष्यमेककालाहारः'।
(व. स्मृ. [3] २१. १)

इति। [4] इदं च भैक्ष्यमशक्तविषयम्। तथा च संवर्तः

'ब्रह्मघ्नस्तु वनं गच्छेद्वनवासी [5] जटी ध्वजी।
वन्यान्येव फलान्यश्नन् सर्वकामविवर्जितः॥
भिक्षार्थी विचरेद् [6] ग्रामं वन्यैर्यदि न जीवति।
चातुर्वर्ण्यं चरेद्भैक्ष्यं खट्वाङ्गी संयतः [7] पुनः॥
भैक्ष्यं चैव समादाय वनं गच्छेत्ततः पुनः।
वनवासी ह्यपः स्पृश्येत् सदाकालमतन्द्रितः॥
ख्यापयन्नात्मनः पापं ब्रह्मघ्नः पापकृत्तमः [8]।
अनेन तु विधानेन द्वादशाब्दं व्रतं चरेत्' [9]॥
(सं. स्मृ. १०९–११२)

---

१ The text reads as follows:—
खण्डेन लोहितकेन शरावेण ग्रामे प्रतिष्ठेत।

२ G substitutes यत्र for अत्र. ३ E. reads मिष्टं for मृष्टं. ४. B and D. omit चरेद्. ५ The text reads वल्कवासा, B. C. D. F. and J वालवासा and H. वनवासी all for वनवासी ६. The text reads च चरेद् for विचरेद्. ७. G. reads सयुत. for सयत and J. खट्वांगीलयित for खट्वाङ्गी सयतः. ८ B. and D. ह्यप स्पृश्य, C. and F ह्युपस्पृश्य and E. G. and H. ह्यप स्पृश्यात् all for ह्यप स्पृश्येत्, while the text स पापश्च for the same. ९ H reads पापकृत्तर for पापकृत्तमः and the text reads this line as follows:—
ख्यापयन्नेन तत् पार्थं ब्रह्मघ्न पापकृत्तरः।

इति । नियमान्तराण्याह यमः—

'अथ वै ब्रह्महत्यार्थी खट्वाङ्गी मितभोजनी ।
मृण्मयेन कपालेन स्वकर्म श्रावयंस्तथा ॥
ब्राह्मणावसथान् सर्वान् देवागाराणि वर्जयेत् ।
शोचन् विनिन्दन्नात्मानं संस्मरन् ब्राह्मणं च तम्* ॥
चरेद् व्रतं यथोद्दिष्टं देव-ब्राह्मणपूजकः ।
एवं दृढव्रतो नित्यं सत्यवादी जितेन्द्रियः ॥
सप्तागाराण्यपूर्वाणि यान्यसङ्क्लृप्तानि च ।
सञ्चरेत्तानि शनकैर्विधूमे भुक्तिवर्जिते ॥
ब्रह्मन्ने देहि मे भिक्षामेनो विख्याप्य सञ्चरेत् ।
एककालं चरेद्भैक्ष्यमलब्ध्वोपवसेदिनम् ॥
एवं सञ्चरमाणस्तु ब्रह्महत्यां ब्रुवन् सदा ।
पूर्णे तु द्वादशे वर्षे ब्रह्महत्यां व्यपोहति' ॥

(य. स्मृ. ६. २१–२६)

इति । ब्रह्मचर्यादिनियममाह गौतमः—

'खट्वाङ्ग-कपालपाणिर्वा द्वादशसंवत्सरान् ब्रह्मचारी भिक्षायै ग्रामं प्रविशेत् कर्मावक्षाणः

---

* यस्तेन हतः तं ब्राह्मणं संस्मरन् । 'ब्रह्मन्ने देहि मे भिक्षाम्'—इति एनः पापं विख्याप्य भिक्षेत् ।

---

१. C. and F read विषयान्तराणि for नियमान्तराणि २ G and I read मितभोजन for मितभोजनी. ३ B. D. I read ख्यापयन् for श्रावयन्. ४ B. D read देवागाराणि च विवर्जयेत् for सर्वान् देवागाराणि वर्जयेत् ५. B and D. substitute -पूजन for -पूजक. ६ We follow here A. and I, while all others read भूणन्ने. ७. B. D. E. and I. substitute अभिख्याप्य for विख्याप्य. ८. A. B. C. D. and F. read ब्रह्महत्या for ब्रह्महत्यां. ९. G. H. read भैक्ष्य- for ब्रह्म- and B. and D -चर्यव्रतानि for -चर्यादिनियमम्. १० I. reads खट्वाङ्गी for खट्वाङ्ग-; while except A. and the text all others omit वा.

(४) यथोपक्रामेत् सन्दर्शनादार्यस्य ।
(५) स्थानासनाभ्यां विहरन् सवनेषूदकोपस्पर्शी शुद्ध्येत् । (६)

(गौ. स्मृ. २२. ४–६)

इति । काश्यपोऽपि—

'पवित्रपाणिर्दण्डी च पङ्क्तदन्तो रजस्वलः ।
तीर्थावासी कुशाच्छादी जटिलो ब्रह्महा भवेत्' ॥

(का. स्मृ. ३. १४)

इति । इयं विशुद्धिरकामकृतब्राह्मणवधविषया । तथा च मनुरेतद्द्वादशवार्षिकमुपक्रम्य बहूनि व्रतान्यभिधायान्ते निगमयति—

'इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजम् ।
कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते' ॥

(म. स्मृ. ११. ८९)

इति । आवृत्तब्रह्मवधे चतुर्थात्प्राग्व्रतमप्यावर्तनीयम् । तदाहतुर्मनु-देवलौ—

'विधेः प्राथमिकादस्माद् द्वितीये द्विगुणं चरेत् ।
तृतीये त्रिगुणं चैव चतुर्थे नास्ति निष्कृतिः' ॥

---

१. G reads यथोक्तक्रमात् and H यथोपक्रमेत् both for यथोपक्रामेत्. २ Except A. H. I. and the text all others read उदकस्पर्शी for उदकोपस्पर्शी ३ A. and J substitute कण्वोऽपि for काश्यपोऽपि. ४. C. and F read पङ्क्तिघ्नो and I. पक्षदन्तो for पङ्क्तदन्तो ५ B D. read तीर्थवासी कुशच्छेदी for तीर्थावासी कुशाच्छादी and all others except A. and J. read तीर्थवासी for तीर्थावासी.

इति[1]।

'यत् स्यादनभिसन्धाय[2] पापं कर्म[3] सकृत्कृतम्।
तस्येयं निष्कृतिर्दृष्टा[4] धर्मविद्भिर्मनीषिभिः' ॥

इति। तदेतद्देवलेन सकृदनुष्ठानस्य सकृत्कृतपापविषयत्वाभिधानात्।

प्रतिनिमित्तं नैमित्तिकमावर्तनीयम्'।

इति न्यायाच्चावृत्तौ द्वैगुण्यादिसिद्धिः। यस्तु न साक्षाद्ब्राह्मणं हन्ति किंतु तिरस्कारादिद्वारात्तन्निमित्ततामापद्यते तम्प्रति सुमन्तुराह—

'तिरस्कृतो यदा विप्रो हित्वात्मानं[5] मृतो यदि।
निर्गुणः सहसा क्रोधाद्गृह-क्षेत्रादिकारणात्॥
त्रैवार्षिकं व्रतं कुर्यात् प्रतिलोमं सरस्वतीम्।
गच्छेद्वापि विशुद्ध्यर्थं तत्पापस्येति निश्चितम्'* ॥

---

यो गुणहीनो विप्रः स्वकीयैः परकीयैर्वा तिरस्कृतः सन् आत्मानं व्यापादयेत्। इदं च तिरस्करणं सनिमित्तम्। सहसा क्रोधात् वा गृह-क्षेत्रादिनाशेनापहारेण वा दुःखितः सन् यो म्रियेत तस्य विशुद्ध्यर्थं तिरस्कारादिकर्त्रा मरणनिमित्तभूतेन तत्पुत्रादिना वा त्रैवार्षिकं व्रतं वा सागरसङ्गममारभ्योगमपर्यंतं सरस्वतीतीरसेवनं कर्तव्यम्। इदं च निर्गुणविप्रमरणविषये निमित्तभूतस्य गुणवत एव। गुणवति मृते त्वधिकम्।

---

१. I does not insert इति. २ C F. and G. substitute यस्माद् for यत् स्याद् ३. B and D. read पापहर्ता सकृत् for पाप कर्म सकृत् ४. G. reads दृष्ट्वा for दृष्टा. ५ G. omits तदेतद् ६ C and F read क्षममाणो, E. and H क्षममाणो for हित्वात्मान

इति । निर्निमित्तं भर्त्सने स एव आह—

'अत्यर्थं निर्गुणो विप्रो ह्यत्यर्थं निर्गुणोपरि ।
क्रोधाद्वै म्रियते यस्तु निर्निमित्तं तु भर्त्सितः ॥
वत्सरत्रितयं कुर्यात्ततः कृच्छ्रं विशुद्धये'* ॥

इति । यदा पुनर्निमित्ती अत्यन्तगुणवान् आत्मघाती चात्यन्तनिर्गुणः तदैकवर्षमेव ब्रह्महत्याव्रतं कुर्यात् ।

'केश-श्मश्रु-नखादीनामकृत्वा वपनं वने ।
ब्रह्मचर्यं चरन् विप्रो वर्षेणैकेन शुद्ध्यति'॥

इति तेनैवाभिधानात् । यथा हन्ता प्रायश्चित्ती यथा वा निमित्ती तथैवानुमन्त्रादेर्योऽपि प्रायश्चित्तभाजः । तथा च पैठीनसिः—

'हन्ता मन्तोपदेष्टा च तथा सम्प्रतिपादकः ।
प्रोत्साहकः सहायश्च तथा मार्गोपदेशकः ॥
आश्रयः शस्त्रदाता च भक्तदाता विकर्मिणः ।
उपेक्षकः शक्तिमांश्चेद्दोषवक्ताऽनुमोदकः ॥

---

*निर्गुणविप्रमरणनिमित्तभूतस्य गुणवतः प्रायश्चित्तमभिहितम् । इदानीमत्यन्तनिर्गुणमरणनिमित्तस्यात्यन्तनिर्गुणस्य प्रायश्चित्तमाह । 'अत्यर्थं निर्गुण' इति । सनिमित्तभर्त्सने तु न्यूनम् ।

---

१. B. and D. read निमित्ततो मृते, C. and F निर्निमित्तता मते, G. निर्निमित्तं मृते and H. निर्निमित्ततो मृते all for निर्निमित्त भर्त्सने २ J reads प्रत्यर्थं for ह्यत्यर्थं. ३. G. reads च for तु ४ J. reads गर्हित. ५. C. F and I. substitute नर for तत. ६ H. reads यदा पुनर्नर निमित्ते for यदा पुनर्निमित्ती. ७ I. reads कृत्वा तु वपनं for अकृत्वा वपन. ८. B. D. G. H. read अनुमन्त्रादेरपि प्रायश्चित्तमाह पैठीनसि. ९. B and D. read कर्ता for हन्ता. १० B. and D. read सहाचार तथा चाम्रोपदेशक for सहायश्च तथा मार्गोपदेशकः; while C. F. and I. मार्गानुदेशक for मार्गोपदेशक. ११ I reads विकर्मिणाम्. १२. B. and D substitute उपेक्षक for उपेक्षक and all others except A. and I. read शक्तिमांश्च for शक्तिमांश्चेत्.

अकार्यकारिणस्तेषां प्रायश्चित्तं प्रकल्पयेत्।
तथा शक्त्यनुरूपं च दण्डं तेषां प्रकल्पयेत्'*॥

इति। एतेषां मध्ये यो यो वधस्य प्रत्यासन्नस्तस्य तस्याधिकं प्रायश्चित्तम्। विप्रकृष्टस्य तदपेक्षया न्यूनं प्रायश्चित्तं प्रकल्पनीयम्। साक्षात्कर्तुरपि वयोविशेषे प्रायश्चित्तस्य ह्रासो भवति। तदाह यमः—

'अशीतिर्यस्य वर्षाणि बालो वा ऽप्यूनषोडशः।
प्रायश्चित्तार्धमर्हन्ति व्याधितश्च तथा स्त्रियः'॥
(य. स्मृ. ६. ४१)

इति। क्वचित् कर्तुः प्रतिनिधिमाह स एव—

'अपूर्णैकादशाब्दस्य चतुर्वर्षाधिकस्य च।
प्रायश्चित्तं चरेद् भ्राता पिताऽन्यो वाऽथ बान्धवः'॥
(य. स्मृ. ६. ३)

---

* दण्डस्तु राज्ञा कर्तव्यः। ननु प्रायश्चित्तकल्पनानन्तरं दण्डकल्पनं न युक्तम्। प्रायश्चित्तेनैव पापापनोदे दण्डस्य वैय्यर्थ्यं स्यात्। यदि पापनिवृत्तिर्न भवेत् तर्हि प्रायश्चित्तस्य वैयर्थ्यं स्यात् तस्मात्प्रायश्चित्तानन्तरं न युक्तो राजदण्ड—इति चेत्—न। प्रायश्चित्तेन पारलौकिकदोषनिवृत्तिर्भवति। ऐहिकदोषनिवृत्त्यर्थं राजदण्डस्यैव विहितत्वात् इति दिक्।

---

१. All, except A. and J. read यथा- for तथा २ A. substitutes मनु. for यम. ३. B. and D. read व्याधितस्य यथाश्रयम्; while A. स्त्रियो रोगिण एव च for व्याधितश्च तथा स्त्रियः. ४. B and D. read अपूर्णो द्वादशाब्दस्य for अपूर्णैकादशाब्दस्य ५. B D. and G. read माता-ऽपिता वाऽन्येऽस्य बान्धवा.; C. and F भ्राता पिता वाऽन्योन्यबान्धव and J. भ्राता-पिता वाऽन्येऽथ बान्धवाः all for भ्राता पितान्यो वा ऽथ बान्धवः.

इति[1]। यत्तु तेनैवोक्तम्—

अतो बालतरास्यास्य[2] ह्यपराधो न पातकम्।
राजदण्डो न तस्यास्ति[3] प्रायश्चित्तं च नेष्यते[4]॥
(य. स्मृ. ६. ४)

इति तत् प्रायश्चित्तात्पत्वाभिप्रायम्[5]। न पुनः सर्वात्मना तदभावप्रतिपादनपरम्।

'पादो बालेषु[6] दातव्यः सर्वपापेष्वयं[7] विधिः'।
(वि. स्मृ. १. ४६)

इति विष्णुना बालस्य पादाभिधानेन बालतरस्य ततोऽप्यल्पत्वावगमात्[8]। यद्वा माभूद्बालतरस्य पापम्। वचनेन साक्षान्निवारणात्[9]। नह्यस्ति वचनस्यातिभारः। यत्तु पुनर्मध्यमाङ्गिरोवचनम्—

'गवां सहस्रं विधिवत् पात्रेभ्यः प्रतिपादयेत्।
ब्रह्महा विप्रमुच्येत[10] सर्वपापेभ्य एव सः'॥
(अं. स्मृ. २. ३६)

---

अतो बालतरस्य चतुर्वर्षन्यूनस्य।

---

१ C and F. add the following portion after इति तच्च —
'द्विगुणं सवनस्थे तु ब्राह्मणे व्रतमादिशेत्', इत्येतद्वाक्यविहितद्विगुणपरम्।
२ B. and D. read प्रायश्चित्त न विद्यते, while G. reads प्रायश्चित्त न विद्यते for प्रायश्चित्त च नेष्यते C. and F. read न वेष्यते for च नेष्यते. ३ I. reads -प्रायेण for -प्रायम् ४. B and D read बालस्य for बालेषु, while E and I. substitute सर्ववर्णेषु for सर्वपापेषु ५ H. reads बालवर्णे for बालस्य. ६. B. D. G. and H. substitute अल्पत्वमवगन्तव्यम् for अल्पत्वावगमात्. ७ C. and F read बालस्य न पापम्. for मा भूद्बालतरस्य पापम् ८. B. and D. read विचारणात् for निवारणात्. ९ B D. E. and I. omit तु. १०. I. reads ब्रह्महाऽपि प्रमुच्येत for ब्रह्महा विप्रमुच्येत and substitutes च for स.

इति—तच्च—

'द्विगुणं सवनस्थे तु ब्राह्मणे व्रतमादिशेत्'।
( या. स्मृ. ३. २९२ )

इत्येतद्वाक्यविहितद्विगुणव्रताचरणाशक्तस्य वेदितव्यम्। प्रायश्चित्तस्यातिगुरुत्वात्। यदपि शाङ्खवचनम्—

'प्रमाप्य द्वादश संवत्सरान् षट् त्रीन्[1] सार्धं संवत्सरं च व्रतान्यादिशेत्। तेषामन्ते गोसहस्रं[2] तस्यार्धमर्धं च दद्यात्। सर्वेषां वर्णानामानुपूर्व्येण[3]'।

इति तदाचार्यादिहननविषयम्। तथा च दक्षः—

'सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे।
आचार्ये शतसाहस्रं सोदर्ये दत्तमक्षयम्॥ ( २६ )
सम-द्विगुण-साहस्रमानन्त्यं च यथाक्रमम्[4]।
दाने फलविशेषःस्यात् हिंसायां तद्वदेव हि'॥(२५)
( द. स्मृ. ३. २५–२६ )

इति। यत्पुनरापस्तम्बेनोक्तम्—

'विप्रेऽरण्ये[5] कुटीं कृत्वा वाग्यतः शवशिरोध्वजः शाणीपक्ष आत्मन्युपरि जान्वाऽऽच्छादयेत्'।
( आ. ध. सू. १. ९. २४. ११ )

---

१. C. and F. omit त्रीन् and I quite mistaken here. २ B and D. read दशसहस्र तदर्धं तस्यार्धमर्द्धं च, C. F शतसहस्र तस्यार्धमर्द्धं च, G अयुतसहस्रं तस्यार्द्धमर्द्धं च and G शतसहस्र तदर्द्धं तस्यार्धमर्द्धं च all for गोसहस्र तस्यार्द्धमर्धं च. ३ J adds च after आनुपूर्व्येण ४. I. reads क्रमात्. ५. From यत्पुनरापस्तम्बेनोक्तम् to तस्मादस्मदुक्तैव व्यवस्था ज्यायसी इति; the including portion between these two sentences is not found in all other manuscripts except A. and H. We doubt not whether the portion belongs to the author. F. also includes this portion, but there is a note in the margin अय ग्रन्थ पूर्वानङ्गपृष्ठान्त्यपंक्तिस्थो बोद्धव्यः and the folio 140, page 2. ६. The text reads this Sûtra अरण्ये कुटिं कृत्वा वाग्यत शवशिरध्वजोर्धशाणीपक्षमधोनाभ्युपरि जान्वाच्छाद्य·

इत्युपक्रम्य—

'गुरुं हत्वा श्रोत्रियं वा एतदेव व्रत-
मोत्तमादुच्छ्वासाच्चरेत्[1]। (२४) नो-
स्मिँल्लोके प्रत्यापत्तिर्विद्यते'। (२५)
(आ. ध. सू. १. ९. २४–२५)

इति तन्माता-पित्राचार्यादिविषयम्। तथा च भविष्य-पुराणे—

'मातरं पितरं हत्वा सोदर्यं भ्रातरं तथा।
गुरुं हत्वा श्रोत्रियं च .....'॥

इत्युपक्रम्य अस्यैव प्रायश्चित्तस्य विधानात्। शाणीपक्षः शाणसूत्रमयवस्त्रैकदेशः। आ उत्तमादुच्छ्वासात् आ मरणात्। प्रत्यापत्तिः व्यवहारः। अत्राशक्तस्य शङ्ख आह—

'प्रमाप्य द्वादशसंवत्सरान् षट् त्रीन् सार्धं
संवत्सरं च व्रतान्यादिशेत्। तेषामन्ते
गोसहस्रं तदर्धं तस्यार्धमर्धं च दद्यात्।
सर्वेषां वर्णानामानुपूर्व्येण'।

इति।

'एतदेव व्रतमोत्तमादुच्छ्वासाच्चरेत्'।

इति अत्रासमर्थो द्वादशवार्षिकव्रतचर्यानन्तरं गोसहस्रदानं कुर्यात्। तत्राप्यशक्तस्य षड्वार्षिकव्रतचर्यानन्तरं अर्धं गवां[2] सहस्रम्। तत्राप्यशक्तस्य त्रिवार्षिकव्रतचर्यानन्तरं[3] सार्धश-

१. The text reads this . . . कर्मसमाप्तमेतेनैव विधिनोत्तमादुच्छ्वासाच्चरेत २. The text adds अस्य after न. ३. E reads तदर्धं गोसहस्रार्द्धदानं for अर्धं गवां सहस्रम् and H. reads अर्धं गवां for अर्धं गवा सहस्रम् ४ E. reads त्र्यब्दव्रतानंतर तस्यार्धं पञ्चशतार्द्ध दान for त्रिवार्षिकव्रतचर्यानंतरं सार्धशतत्रयं गवाम्।.

तद्वयं गवाम्। तत्राप्यशक्तस्य सार्धसंवत्सरव्रतेचर्या। अनन्तरं पञ्चविंशत्युत्तरशतमिति सर्ववर्णानां शक्त्यनुसारेण आनुपूर्व्येण क्रमेण द्वादशवार्षिकादिगोसहस्रादीनां समुच्चयो भवति। एतच्च पूर्वोक्तविषय एव कल्पनीयम्। प्रायश्चित्तस्यातिगुरुत्वात्।

ननु—द्वादशवार्षिकादिव्रतचतुष्टयं गोसहस्रादिदानचतुष्टयसहितमभिधाय—

'सर्वेषां वर्णानामानुपूर्व्येण'।

इत्यभिधानात् ब्राह्मणादिवर्णचतुष्टयस्य क्रमेण व्रतचतुष्टयविधानं किमिति न स्यात्?। मैवम्।

'पर्षद् या ब्राह्मणानां तु सा राज्ञां द्विगुणा भवेत्।
वैश्यानां त्रिगुणा प्रोक्ता पर्षद्वच्च व्रतं स्मृतम्'॥
(अं. स्मृ. ३. १६)

इति। तथा—

'शूद्रो वा ब्राह्मणं हत्वा प्रायश्चित्तचतुष्टयम्'।

इति यथाक्रमं अङ्गिरो-भविष्यत्पुराणवचनाभ्यां ब्राह्मणापेक्षया इतरवर्णानामधिकप्रायश्चित्तविधानात्। तस्मादस्मदुक्तैव व्यवस्था ज्यायसी इति।

ननु—एवं वचनान्तरं साक्षित्वेनोदाहृत्य यत्र विशेषव्यवस्थोच्यते तत्र साऽस्तु। यत्र त्वन्तरेणैव वचनान्तरं व्यवस्थोच्यते तत्र स्वकपोलकल्पिता कथं श्रद्धेया?— इति चेत्। मैवम्। स्मृतिकारैरेवं कल्पनीयत्वाभिधानात्। तथा च देवलः—

---

१. E. adds अर्धं गवां after व्रतचर्यानंतरम् २. I. omits एव, while except A. B. D. and G all others read स्मृतिकारैरेव for स्मृतिकारैरेव.

'जाति-शक्ति-गुणापेक्षं सकृद्बुद्धिकृतं तथा ।
अनुबन्धादि विज्ञाय प्रायश्चित्तं प्रकल्पयेत्' ॥

इति । यदिदं द्वादशवार्षिकं ब्रह्महत्याव्रतं तद् द्वादशे वर्षे सम्पूर्णे वा समापनीयं अर्वाग्वा ब्राह्मणत्राणादिनिमित्तलाभे । तथा च शाङ्खः—

'द्वादशे वर्षे शुद्धिमाप्नोति । अन्तरा वा ब्राह्मणं मोचयित्वा । गवां द्वादशानां परित्राणात् । सद्य एवाश्वमेधावभृथस्नानाद्वा पूतो भवति' ।

इति । एवं च सति यद् याज्ञवल्क्येनोक्तम्—

'ब्राह्मणस्य परित्राणाद् गवां द्वादशकस्य वा ।
तथाऽश्वमेधावभृथस्नानाद्वा शुद्धिमाप्नुयात् ॥
दीर्घ-तीव्रामयग्रस्तं ब्राह्मणं गामथापि वा ।
दृष्ट्वा पथि निरातङ्कं कृत्वा वा ब्रह्महा शुचिः ॥
आनीय विप्रसर्वस्वं हृतं, घातित एव वा ।
तन्निमित्तं क्षतः शस्त्रैर्जीवन्नपि न दुष्यति'* ॥
( या. स्मृ. ३. २४४–२४६ )

---

* यश्चौर-व्याघ्रादिभिर्व्यापाद्यमानं कमपि ब्राह्मणं आत्मप्राणान् अन्तरे कृत्वा त्रायति द्वादश गावो वा प्राणसङ्कटान्मोचयति सोऽसम्पूर्णेऽपि द्वादशवार्षिकप्रायश्चित्ते शुद्धो भवति । एवमेव परकीयस्याश्वमेधे अवभृ-

---

१. B and D. read वधकृत for बुद्धिकृतं २ G. and I. read द्वादशवर्षे for द्वादशे वर्षे, while B. and D द्वादशवर्षे त्वसम्पूर्णे वा for द्वादशे वर्षे सम्पूर्णे वा. ३ Except A. all others read स द्यावा अश्व for सद्य एवाश्व-. ४. The text substitutes च for वा. ५. Except B. D. and the text others read स्नानात् शुद्धिमवाप्नुयात् for स्नानाद्वा शुद्धिमाप्नुयात्. ६. C. and F. substitute दत्त्वा for दृष्ट्वा ७. The text reads तु for वा. ८. The text reads विशुद्ध्यति for न दुष्यति.

इति न तद्व्रतान्तराभिप्रायम्। किंतु समाप्तिकथनाभिप्रायम्। व्रतान्तराणि तु मनुराह—

'लक्ष्यं[1] शस्त्रभृतां वरं स्याद्विदुषामिच्छयाऽऽत्मनः।
प्रास्येदात्मानमग्नौ वा समिद्धे त्रिरवाक्शिराः॥
यजेत वाश्वमेधेन स्वर्जिता गोसवेन वा।
अभिजिद्विश्वजिद्भ्यां वा त्रिवृताऽग्निष्टुताऽपि वा*॥
जपन् वाऽन्यतमं वेदं[2] योजनानां† शतं व्रजेत्[3]।
ब्रह्महत्यापनोदाय मितभुङ् नियतेन्द्रियः[4]॥
सर्वस्वं वा[5] वेदविदे ब्राह्मणायोपपादयेत्।
धनं वा जीवनायालं गृहं वा सपरिच्छदम्॥

---

थाख्यकर्माङ्गभूतस्नानसमये स्वकल्मषं विख्याप्य स्नात्वा शुद्धो भवति। तथा बहुकालव्यापिना दुःसहेन कुष्ठादिरोगेण पीडितं ब्राह्मण गा वा पथि दृष्ट्वा निरुजं कुर्याचेत् ब्रह्महा शुद्धो भवति। अपहृतसर्वस्वतयावसीदतो विप्रस्य गो-भू-हिरण्यादिद्रव्यं सर्वं प्रत्यानीय यस्तस्य विप्रस्य रक्षणं करोति स विशुद्धो भवति। विप्रसर्वस्वप्रत्यानयनप्रयत्ने मृतः शस्त्रैः क्षतो जीवन्नपि वा शुद्ध्यत्येव।

* त्रिवृता त्रिवृत्स्तोमेन। अग्निष्टुता अग्निष्टोमेन।

† यं कमपि वेदं जपन् शतयोजनं गच्छेत्। योजनं षोडशसहस्रहस्तात्मकम्। यथोक्तम्—

'द्वादशाङ्गुलिकश्शङ्कुस्तद्वयं तु शयः स्मृतः।
सचतुष्कं धनुः प्रोक्त क्रोशो धनुःसहस्रिकः॥
चतुष्कं योजनं तत्स्यादिति मानं व्यवस्थितम्'।

---

१. Except A. all others omit तु २ J reads लक्ष्य for लक्ष्यं. ३ G. reads देव for वेद्. ४ G substitutes व्रजन् for व्रजेत्. ५ B and D. read मितभुक्तिर्जितेन्द्रियः for मितभुङ् नियतेन्द्रियः.. ६. A. reads वेदविदि and the text omits वा and reads वेदविदुषे.

हविष्यभुग्वाऽनुचरेत्[1] प्रतिस्रोतः[2] सरस्वतीम् ।
जपेद्वा नियताहारस्त्रिर्वै वेदस्य संहिताम्'*॥
( मनु. स्मृ. ११. ७३–७७ )

इति । एते सर्वे पक्षाः कामकारा-ऽकामकारविद्वदविद्वद्विषयत्वेन व्यवस्थापनीयाः । कामकृतात्यन्ताभ्यासे तु याज्ञवल्क्य आह—

'लोमभ्यः स्वाहेत्येवं हि लोमप्रभृति वै तनुम् ।
मज्ज्ञान्तं[3] जुहुयाद्वापि मन्त्रैरेभिर्यथाक्रमम्' ॥
( या. स्मृ. ३. २४७ )

---

इति । द्वात्रिंशत्सहस्रहस्तैरपि योजनं भवति । यथोक्तं लीलावत्याम् ।

'यवोदरैरंगुलमष्टसंख्यै-
र्हस्तोऽङ्गुलैः षड्गुणितैश्चतुर्भिः ।
हस्तैश्चतुर्भिर्भवतीह दण्डः
क्रोशः सहस्रद्वितयेन तेषाम् ॥
स्याद्योजनं क्रोशचतुष्टयेन
तथा कराणां दशकेन वंशः' ॥

इति । देशभेदेनानयोर्व्यवस्था ज्ञेया ।

* यद्यपीमानि सर्वाण्यपि प्रायश्चित्तानि न वर्णविशेषाभिधानपुरस्सरमभिहितानि तथापि अन्यत्रोक्ता व्यवस्था अत्रानुसन्धेया । तद्यथा—शस्त्रभृतां लक्ष्यत्वं अग्निपतनं सर्वस्वदानं जीवनपर्याप्तधनदानं गृहदानं सरस्वत्यनुगमनं च सर्ववर्णसाधारणम् । अश्वमेधो राज्ञ एव । गोसवो ब्राह्मणस्यैव । अन्ये त्रैवर्णिकानाम् । तत्र गोसवाश्वमेधौ कलौ वर्ज्यौ वर्णभेदेन प्रायश्चित्तस्य द्विगुण-त्रिगुणादिको भेदस्त्वग्रे आचार्येणैवोक्तो ऽत्रानुसन्धेयः ।

---

१. The text reads ऽनुसरेत् for ऽनुचरेत्. २. B., D and J. read प्रतिस्रोतां for प्रतिस्रोतः. ३. The text reads मज्ज्ञान्ता for मज्ज्ञान्तं.

इति। तत्राष्टौ मन्त्रानाह वसिष्ठः—

'लोमानि मृत्योर्जुहोमि लोमभिर्मृत्युं वासये।
इति प्रथमाम्।
त्वचं मृत्योर्जुहोमि त्वचा मृत्युं वासये।
इति द्वितीयाम्।
लोहितं मृत्योर्जुहोमि लोहितेन मृत्युं वासये।
इति तृतीयाम्।
मांसं मृत्योर्जुहोमि मांसेन मृत्युं वासये।
इति चतुर्थीम्।
मेदो मृत्योर्जुहोमि मेदसा मृत्युं वासये।
इति पञ्चमीम्।
स्नायुं मृत्योर्जुहोमि स्नाय्वा मृत्युं वासये।
इति षष्ठीम्।

---

१ All others except A. and I read तथा for तत्र, while C. and F. omit the following —

. . . . . लोमप्रभृति वै तनुम्।
मज्जान्त जुहुयाद्वापि मन्त्रैरेभिर्यथाक्रमम्' ॥
इति। तत्राष्टौ मन्त्रानाह वसिष्ठ —
'लोमानि मृत्योर्जुहोमि . . . . ।'

२ These Mantras are found in all manuscripts and the text, but they appear different from one another. I substitutes नाशय for वासये in all the Mantras and except A. G and the text all others read प्रथमम् for प्रथमाम् and so on in masculine instead of feminine, while G omits the following —

प्रथमाम्। त्वचं मृत्योर्जुहोमि त्वचा मृत्युं वासये। इति द्वितीयाम्।
लोहितं मृत्योर्जुहोमि लोहितेन मृत्यु वासये। इति.

and substitutes आश्रयति for वासये इति in the first and the fourth Mantra. ३. The text interchanges this Mantra for the sixth. ४ The texts, two Bombay editions and one Benares edition with commentary reads स्नावाभि- and स्नावभि. स्नायु for and स्नाय्वा

अस्थीनि मृत्योर्जुहोमि अस्थिभिर्मृत्युं वासये ।
इति सप्तमीम् ।
मज्ज्ञानं मृत्योर्जुहोमि मज्ज्ञाभिर्मृत्युं वासये ।
इति अष्टमीम्' ।
( व. स्मृ. २०. २६ )

इति । मरणान्तिकस्येदृशस्य सर्वस्य व्रतस्य कामकार-विषयत्वं मध्यमाङ्गिरा आह—

'प्राणान्तिकं च यत् प्रोक्तं प्रायश्चित्तं मनीषिभिः।
तत्कामकारविषयं विज्ञेयं नात्र संशयः ॥
यः कामतो महापापं नरः कुर्यात् कथंचन ।
न तस्य शुद्धिर्निर्दिष्टा भृग्वग्निपतनादृते' ॥

इति । यत्तु सुमन्तुनोक्तम्—

' ब्रह्महा संवत्सरं कृच्छ्रं चरेत् । अधःशायी त्रिषवणस्नायी कर्मवेदको भैक्ष्याहारो दिव्यनदी-पुलिन-सङ्गमा-ऽऽश्रम-गोष्ठ-पर्वत-प्रस्रवण-तपो-वनविहारी स्यात् स्थान-वीरासनी । संवत्सरे पूर्णे हिरण्यमणि-गो-धान्य-तिल-भूमि-सर्पींषि ब्राह्मणेभ्यो ददन् पूतो भवति' ।

---

१. I reads मज्ज्ञां for मज्ज्ञानं and मज्ज्ञया for मज्ज्ञाभि', while all other except A. and the text substitute मज्ज्ञां for मज्ज्ञाभि २ G and I. do not insert ईदृशस्य. ३. G and J. read कामेन for कामत. ४. A. reads कुर्यात् विप्र for नर कुर्यात् ५ Except A. and I. all others read त्रिषवणी for त्रिषवणस्नायी, while B D and I. कर्मवेदक for कर्मवेदक- ६. B. and D. read भिक्षाहारी for भैक्ष्याहारो ७ H reads -सगमाश्रयो गोष्ठचपर्वत- for -सगमाश्रमगोष्ठ-पर्वत- ८. G. reads ब्राह्मणो दद्यात्, while I. substitutes दद्यात् for ददन्.

इति तदपहन्तुर्मूर्खस्य धनवतो जातिमात्रव्यापादने द्रष्टव्यम् । यत् पुनर्वसिष्ठवचनम्—

'द्वादशरात्रमब्भक्षो द्वादशरात्रमुपवसेत्' ।
(व. स्मृ. २३. ३८)

इति तन्मनोवसितब्रह्महत्यस्य तदैवोपरतजिघांसस्य वेदितव्यम् । यत् पुनः षट्त्रिंशन्मतवचनम्—

'षण्ढं तु ब्राह्मणं हत्वा शूद्रहत्याव्रतं चरेत् ।
चान्द्रायणं प्रकुर्वीत पराकद्वयमेव च' ॥

इति तदप्रत्यानेयपुंस्त्वस्य* सप्रत्ययवधे† द्रष्टव्यम् । अप्रत्ययवधे तु बृहस्पतिराह—

'अरुगायाः सरस्वत्याः सङ्गमे लोकविश्रुते ।
शुद्धचेत् त्रिषवणस्नायी त्रिरात्रोपोषितो द्विजः' ॥

---

अप्रत्यानेयं पुनरानयितुमशक्यं पुंस्त्वं यस्य । षण्ढस्त्वावच्चतुर्दशविधः पूर्वमाचारकाण्डे विवाहप्रकरणे उक्तः । तत्र केषाचित् कालान्तरे औषधादिना पुंस्त्व प्रत्यानेतुं शक्य भवतीति प्रसिद्धमेवायुर्वेदविदाम् ।

† अत्र—

'प्रत्ययोऽधीन-शपथ-ज्ञान-विश्वासहेतुषु' ।
(नामलिंगानुशासने ३. ३. १४७)

इति कोशात् प्रत्ययो ज्ञानम् । तच्च—

'जाग्रत्संस्कारसम्भूतः प्रत्ययो विषयान्वितः' ।
(ग. पु १. १३६. १३)

इति गारुडात् संस्कारजन्यम् ।

---

१. B. and D. omit the following.—

'यत्पुनर्वसिष्ठवचनम्'—

'द्वादशरात्रमब्भक्षो द्वादशरात्रमुपवसेत्' ।

इति । तन्मनोवसितब्रह्महत्यस्य तदैवोपरतजिघांसस्य वेदितव्यम्' ।, while H substitutes वसिष्ठेनोक्तम् for the same. २ G. reads अम्बुभक्षो for अब्भक्षो ३. G reads ब्रह्महत्याया for ब्रह्महत्यस्य ४ B. D and G read षट्त्रिंशन्मते वचनम् for षट्त्रिंशन्मतवचनम् ५. I. reads प्रत्ययवधे for सप्रत्ययवधे

इति । एतानि द्वादशवार्षिकादिधनदानपर्यन्तानि ब्राह्मणस्यैव । क्षत्रियादेस्तु द्विगुणादिकम् । यदाहाङ्गिराः—

'पर्षद् या ब्राह्मणानां तु सा राज्ञां द्विगुणा मता ।
वैश्यानां त्रिगुणा प्रोक्ता पर्षद्वच व्रतं स्मृतम्' ॥

इति । प्रजापतिरपि—

'द्विगुणं त्रिगुणं चैव चतुर्गुणमथापि च ।
क्षत्र-विट्-शूद्रजातीनां ब्राह्मणस्य वधे व्रतम्' ॥

इति । यत्तु चतुर्विंशतिमतवचनम्—

'प्रायश्चित्तं यदाम्नातं ब्राह्मणस्य महर्षिभिः ।
पादोनं क्षत्रियः कुर्यादर्धं वैश्यः समाचरेत् ॥
शूद्रः समाचरेत् पादमशेषेष्वपि पाप्मसु' ।

इति तत् प्रातिलोम्यानुष्ठितचतुर्विधसाहसव्यतिरिक्तविषयम् । मूर्धावसिक्तादीनामपि दण्डवत् प्रायश्चित्तं समूहनीयम् । दण्डतारतम्यमाह याज्ञवल्क्यः—

' दण्डप्रणयनं कार्यं वर्णजात्युत्तराधरैः' ।

( या. स्मृ. २. २०६)

इति । एवं च सति मूर्धावसिक्तस्य ब्राह्मणवधे ब्राह्मणादतिरिक्तं* क्षत्रियादूनमध्यर्धद्वादशवार्षिकं भवति । अन-

* अतिरिक्तं अधिकम् । ब्राह्मणस्य द्वादशवार्षिकं विहितं, क्षत्रियस्य तद् द्विगुणं चतुर्विंशतिवार्षिकं भवति । तत्र क्षत्रियादूनं ब्राह्मणादधिकं अष्टादशवार्षिकं मूर्धावसिक्तस्य देयमित्यर्थः ।

१. J omits यत्तु, while G and H. omit तु २. G and H. read चतुर्विंशतिमतं वचनम् for चतुर्विंशतिमतवचनम्. ३. Except A. and H all others do not insert ब्राह्मणादतिरिक्त ४. C and F. read मध्यस्थे दशवार्षिकं, E अध्यर्धदशवार्षिक, G अध्यर्धं द्वादशवार्षिकम् and J. अर्धं द्वादशवार्षिकम् all for अध्यर्धद्वादशवार्षिकम्.

यैव दिशो प्रातिलोम्योत्पन्नानामपि प्रायश्चित्तमूहनीयम्। तथोत्तमाश्रमिणामपि* प्रायश्चित्तत्तारतम्यमङ्गिरसा दर्शितम्—

'गृहस्थोक्तानि पापानि कुर्वन्त्याश्रमिणो यदि।
शौचवच्छोधनं कुर्युरर्वाक् ब्रह्मनिदर्शनात्'।

इति। प्रक्रान्तप्रायश्चित्तस्य मध्ये विपत्तावपि पापक्षयो भवति। तथा च हारीतः—

'प्रायश्चित्तेऽध्यवसिते कर्त्ता यदि विपद्यते।
पूतस्तदहरेव स्यादिह लोके परत्र च'॥
(हा. स्मृ. २१. ९)

इति। व्यासोऽपि—

'धर्मार्थं† यतमानस्तु नं चेत् शक्नोति मानवः।
प्राप्तो भवति तत् पुण्यमत्र मे नास्ति संशयः'॥
(व्या. स्मृ. ३. ४१)

इति। वधोद्यमेऽपि वधप्रायश्चित्तं कर्तव्यम्। तदाह याज्ञवल्क्यः—

'चरेद्व्रतमहत्वाऽपि घातार्थं चेत् समागतः'‡॥
(या. स्मृ. ३. २५२)

---

* उत्तमाश्रमिणः आजन्मब्रह्मचारिणः वानप्रस्था यतयश्चेत्यर्थः।

† धर्मार्थं यतमानः पापक्षालनार्थं प्रायश्चित्तं कर्तुं प्रवृत्तः।

‡ अत्र घातार्थं चेत् समागतः इत्यनेन हननसाधनमुद्यम्य केवलमागमनमेव न विवक्षितम्। किंतु ब्राह्मणादिहनने कृतनिश्चयस्तद्व्यापाद-

---

१. I substitutes दृशा for दिशा २ C. and F read तथा श्रमिणाम् and I. तथोक्ताश्रमिणाम् for तथोत्तमाश्रमिणाम् ३. B. and D. read -गतो ब्रह्मनिघातत्वात्, C. and F. अर्वाक् ब्रह्मणि दर्शनात् both for अर्वाग्ब्रह्मनिदर्शनात्. ४. G. and A. read प्रक्रान्तस्य प्रायश्चित्तस्य ५. I. reads व्यवसिते for ऽध्यवसिते ६. I reads मृतश्चेत् कोऽपि मानव for न चेच्छक्नोति मानवः.

इति । यथावर्णमित्यनुवर्तते । अत एव स्मृत्यन्तरम्—

'अहत्वाऽपि यथावर्णं ब्रह्महत्याव्रतं चरेत्'* ॥

(शा. स्मृ. १. २६)

इति ॥ ७२-७३ ॥

सवनस्थस्त्रीवधस्य महापातकत्वमभिप्रेत्य प्रायश्चित्तमाह—

सवनस्थां स्त्रियं हत्वा ब्रह्महत्याव्रतं चरेत् ॥ ७४ ॥

इति । आहिताग्नेर्जाया पतिव्रता सवनस्था । अत एवाङ्गिराः—

'आहिताग्नेर्द्विजाग्र्यस्य हत्वा पत्नीमनिन्दिताम् ।
ब्रह्महत्याव्रतं कुर्यादात्रेयीघ्नस्तथैव च' ॥

(अं. स्मृ. ३. १९)

इति ॥ ७४ ॥

---

नार्थं सम्यगागत्य घातसाधनप्रहारे कृते कथंचित् प्रतिघातादिप्रबन्धवशादसौ न मृतस्तदा अहत्वा यथावर्णं ब्रह्महत्यादि व्रतं चरेत् इत्यर्थः ।

* ननु—ब्राह्मणादिहनने यत् प्रायश्चित्तमुक्तं तदेव तदभावेऽपि कथमुच्यते ? । उद्यमस्य क्रियानिर्वृतेश्च समानो दण्ड इत्येतदयोग्यमिति चेत् । न । हननाभावे पादोनमेव प्रायश्चित्तमिति ब्रूमः । अत एव—'औपदेशिकेभ्यो न्यूनत्वात् अतिदेशिकाना पादोनान्येव ब्रह्महत्यादिव्रतानि द्वादशवार्षिकादीनि भवान्ति'—इति विज्ञानेश्वरः ।

---

१. B and D omit the following —

सवनस्थस्त्रीवधस्य महापातकत्वमभिप्रेत्य प्रायश्चित्तमाह—
सवनस्था स्त्रिय हत्वा ब्रह्महत्याव्रत चरेत् ॥ ७४ ॥
इति ।.

२ I. reads द्विजातस्य for द्विजाग्र्यस्य and B C. D. and F. substitute तथा for हत्वा, while B and D. exhibit आहिताग्नेर्जाया पतिव्रता अत एव अङ्गिरा after the quoted verse and then read ब्रह्महत्याया प्रायश्चित्त &c., and then again सवनस्थवधस्य &c.

[*विन्ध्यादुत्तरतो यस्य निवासः परिकीर्तितः।
पराशरमतं तस्य सेतुबन्धस्य दर्शनम् ॥

अवध्यनिरूपणेऽतिपातः शास्त्रार्थः स्यादित्यत आह। विन्ध्यादुत्तरत इति।

'यद्युत्तरे वसेत् पार्श्वे विन्ध्यस्य पुरुषोत्तम।
दक्षिणे वसतश्चेदं न भवेदिति तच्छृणु' ॥

इति भविष्यपुराणात् दक्षिणदेशस्थितस्य काशीयात्रेति ज्ञेयम्। अकामकृते इदं प्रायश्चित्तम। तत्रैव द्वादशाब्दिकस्योक्तत्वात्। प्रतियोजनं प्राजापत्यसम्भवेनास्य तत्समत्वाच्च। कामकृते तु मरणान्तिकमेव ॥ ७५ ॥]

ब्रह्महत्यायाः प्रायश्चित्तमभिधाय मद्यपानस्य प्रायश्चित्तमाह—

मद्यपश्च द्विजः कुर्यान्नदीं गत्वा समुद्रगाम्।
चान्द्रायणे ततश्चीर्णे कुर्याद्ब्राह्मणभोजनम् ॥ ७५ ॥
अनड्वत्सहितां गां च दद्याद्विप्रेषु[2] दक्षिणाम्।

इति। पनसादिजन्यं मदकारणं द्रवद्रव्यं मद्यम्। तदाह पुलस्त्यः—

'पानसं द्राक्षमाधूकं खार्जूरं तालमैक्षवम्।
मधूत्थं सैरिमारिष्टं[4] मैरेयं नारिकेलजम् ॥

---

* दृश्यतेऽयं श्लोको एकस्मिन् ( L. ) पुस्तके नान्यत्र। माधवाचार्यैर्न व्याख्यातः। अत एव प्रक्षिप्तोऽयमिति प्रतिभाति। तथापि पूर्वापरसम्बन्धमवलोक्यात्रावश्यकत्वप्रतीतेरस्माभिः धरणीधरव्याख्यासहितः संगृहीतः।

१. L. reads तप for तत. २. B. and D. read विप्राय for विप्रेषु. ३. Except B D. G. and I. all others read क्षौद्र माधूक for द्राक्ष-माधूक. ४ I. reads सौरमाविष्ट. B. and D. सैरमादिष्ट, A. सौरमारिष्ट and H. सैरिमारिष्ट all for सैरमारिष्टं.

समानानि विजानीयान्मद्यान्येकादशैव तु'[1] ।
(पु. स्मृ. १. १२-१३)

इति । एकादशानामन्यतमस्य मद्यस्य पाने महानदीतीरे चान्द्रायणं चरित्वा ब्राह्मणभोजनं कृत्वा दक्षिणां दद्यात् । तदेतत् कामकारविषयम् । अकामकारे तु बृहस्पतिराह—

'पीत्वा प्रमादतो मद्यमतिकृच्छ्रं चरेद् द्विजः ।
कारयेत्तस्य संस्कारं शक्त्या विप्रांस्तु भोजयेत्' ॥
(बृ. स्मृ. ४. २३)

इति । तदेतन्मद्यपानप्रायश्चित्तं ब्राह्मणस्यैव । न क्षत्रिय-वैश्ययोः । मद्यपानस्य ब्राह्मणम्प्रत्येव निषेधात् ।

'यक्ष-रक्षः-पिशाचान्नं मद्य-मांस-सुरासवम् ।
तद् ब्राह्मणेन नात्तव्यं देवानामश्नता हविः' ॥

इति स्मरणात् ।

---

* माधूकं 'मोहवा-मोहडा' इति भाषायां प्रसिद्धस्य वृक्षस्य पुष्पेभ्यो निर्मितम् । सैरो वनस्पतिविशेषः (?) । अरिष्टो निम्बः तद्भवम् । मिराया देशविशेषे ओषधिविशेषे वा भवं मैरेयम् । एवमेकादश मद्यानि । केचित्तु—

'माध्वीकं टाङ्कमाध्वीकं मैरेयं नारिकेलजम्' ।

इति पठन्ति । तद् एकादशसंख्यापूर्त्यभावात चिन्त्यम् ।

---

१. C. and F. omit the following.—

तदेतत् कामकारविषयम् । अकामकारे तु बृहस्पतिराह—

'पीत्वा प्रमादतो मद्यमतिकृच्छ्र चरेद् द्विज ।
कारयेत्तस्य सस्कारं शक्त्या विप्रास्तु भोजयेत्' ॥

इति ।

२. B and D. substitute च for तु. ३. Except A. and I. all others read ब्राह्मणेन न पातव्य for तद् ब्राह्मणेन नात्तव्य.

बृहद्विष्णुरपि—

'माधूकमैक्षवं सैरं तालं खार्जूर-पानसम्।
मधूत्थं चैव माध्वीकं मैरेयं नारिकेलजम्' ॥
अमेध्यानि दशैतानि मद्यानि ब्राह्मणस्य तु'।

इति। राजन्य-वैश्ययोस्तु मद्यपानमनुजानाति बृहद्याज्ञवल्क्यः—

'कामादपि च राजन्यो वैश्यो वापि कथंचन।
मद्यमेव सुरां पीत्वा न दोषं प्रतिपद्यते' ॥

इति। व्यासोऽपि—

'उभौ मध्वासवक्षीबौ उभौ चन्दनचर्चितौ।
एकपर्यङ्कशयितौ दृष्टौ मे केशवार्जुनौ'* ॥

(म. भा. उ. ५८. ५)

---

* धृतराष्ट्रसन्देशं पाण्डवेभ्यो निवेद्य प्रत्यागतस्य संजयस्य धृतराष्ट्रम्प्रत्युक्तिरियम्। शिष्टाचारप्रदर्शनार्थमिद वाक्यम्। विज्ञानेश्वरस्तु—'एकपर्यङ्क रथिनौ'—इति पठित्वा क्षत्रिय-वैश्ययोर्माध्वीपानानुज्ञानपरमिदमिति मन्यते।

---

१ B and D omit अपि २ Except A G. and H all others substitute सैर for सौर, while I. ताल खार्जूर for ताल खार्जूर- ३ I reads धूस्तुर for मधूत्थ, but it seems to be a mistake ४ I. substitutes निद्यानि for मद्यानि ५. C. and F. read क्रमादपि for कामादपि ६ G reads मद्यमेदसुरां C. and F मद्यमेव सुरां for मद्यमेव सुरां ७ B and D omit व्यासोऽपि. ८. This verse appears in Mahâbhârata, except the text of the same and A and G. all others read मध्वासवं पीत्वा for मध्वासवक्षीबौ, while the text reads चन्दनरूषितौ for चन्दनचर्चितौ and reads the second line as —

सस्विष्णौ वरवस्त्रौ तौ दिव्याभरणभूषितौ' ॥.

इति । *उपनयनात् पूर्वं मद्यप्राने तत्प्रायश्चित्तं पित्रादिभिः कर्तव्यम् । तदाह जातूकर्ण्यः—

'अनुपेतस्तु यो बालो मद्यं मोहात् पिबेद्यदि ।
तस्य कृच्छ्रत्रयं कुर्यात् माता भ्राता तथा पिता' ॥

इति ॥ ७५ ॥

मद्यपानस्य प्रायश्चित्तमुक्त्वा सुरापानस्यं प्रायश्चित्तमाह—

सुरापानं सकृत् कृत्वा अग्निवर्णां सुरां पिबेत् ॥ ७६ ॥
स पावयेदथात्मानमिहलोके परत्र च ।

इति । पिष्टादिजन्यो द्रवद्रव्यविशेषः सुरा । तथा च मनुः—

'गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा ।
यथैवैका तथा सर्वा न पातव्या द्विजोत्तमैः' ॥
( म. स्मृ. ११. ९४ )

इति । तत्र पैष्ट्यां सुराशब्दो मुख्यः । गौडी-माध्व्योर्गौणः । पुलस्त्येनैकादशसु मद्येषु गौडी-माध्व्यावनुक्रम्य—

---

* ब्राह्मणस्यैवेदम् । नान्येषा वर्णानाम् ।

---

१. C F E H. and I do not insert तत् २ These two lines are omitted by M ३ I. reads पातयेत् for पावयेत्, while K. and L. read तदा- for अथा- ४ B. and D. read this line as follows :—

'तथैवैका न पातव्या सुरा सर्वा द्विजोत्तमै' ॥

and I. reads —

'यथैवैका न पातव्या तथा सर्वा द्विजोत्तमै' ॥

and except A and the text all others read–

यथैवैका तथैवान्या for यथैवैका तथा सर्वा

५ I. reads एकादशमद्येषु for एकादशसु मद्येषु.

'सुरायाः सकृत्पाने गौड़ी-माध्व्योरमुख्यसुरयोरस-
कृत्पाने चाग्निसमानवर्णोत्पत्तिपर्यन्तं सन्तप्तामत्युष्णां सुरां पीत्वा ब्राह्मणो म्रियेत' ।
(पु. स्मृ. १. १४)

इत्यभिधानात्[1]। तथा च बृहस्पतिः[2]—

'सुरापाने कामकृते ज्वलन्तीं चैव तां मुखे ।
क्षिपेत्तया विनिर्दग्धो मृतः शुद्धिमवाप्नुयात्' ॥
(बृ. स्मृ. ४. २५)

इति। गौडी-माध्व्योरभ्यासेन मत्या अमत्या वा पाने तया मरणं व्याघ्र आह—

'मत्या मद्यमथामत्या वा पुनः पीत्वा[3] द्विजोत्तमः ।
तप्तोऽग्निवर्णां तां पीत्वा मृतः शुद्ध्येत् स किल्बिषात्' ॥

इति। कामकृते सकृत् पैष्टीपाने मूलवचनोक्तं मरणं द्रष्टव्यम्। अकामकृते तु याज्ञवल्क्य आह—

'बालवासा जटी वाऽपि ब्रह्महत्याव्रतं चरेत् ।
पिण्याकं वा कणान् वाऽपि भक्षयेत्त्रिसमा निशि' ॥
(या. स्मृ. ३. २५४.)

इति। एतच्च वर्षत्रयपिण्याकादिभक्षणं छर्दनविषयम्।

---

* पुनः पीत्वा अभ्यासेन प्राशनं कृत्वेत्यर्थः। द्विजेषु ब्राह्मण-क्षत्रिय-वैश्येषु उत्तमः श्रेष्ठः ब्राह्मण इत्यर्थः।

---

१ I and J omit -सुरयो- २ Except A and I all do not insert इत्यभिधानात्. ३ B D. E and I read अभ्यासे तप्तया मरण and C. F. G. and J अभ्यासेन तया मरण both for अभ्यासेन मत्या अमत्या वा पाने तया मरण ४. B and D. read भक्षयेन्नवह निशि, C and F भक्षयेत्तु समा निशि and E. G. H. J. भक्षयेत्तु सकृन्निशि all for भक्षयेत्त्रिसमा निशि

'गोमूत्रमग्निवर्णं[1] वा पिबेदुदकमेव वा।
पयो[*] घृतं वाऽऽमरणात् गोशकृद्रसमेव च[2]'[*] ॥
(म. स्मृ. ११.९१)

इति तदुभयं मूलवचनेन समानविषयम्। वेदविदम्प्रत्यङ्गिरा आह—

'बृहस्पतिसवेनेष्ट्वा सुरापो ब्राह्मणः पुनः।
समत्वं[†] ब्राह्मणैर्गच्छेदित्येषा वैदिकी श्रुतिः'॥

इति। सकृद्गौणेसुरापाने[3] अङ्गिरा[4] आह—

'भूमिप्रदानं यः[5] कुर्यात् सुरां पीत्वा द्विजोत्तमः।
पुनर्न च पिबेज्जातु संस्कृतः स विशुद्ध्यति'॥

इति। यत्तु सुमन्तुनोक्तम्—

'ब्राह्मणस्य सुरापस्य षण्मासाननुद्धृतसमुद्रोदक-
स्नानम्। सावित्र्यष्टसहस्रं जुहुयात् प्रत्यहम्[‡]।
त्रिरात्रमुपवासः। तप्तकृच्छ्रेण पूतो भवति।
अश्वमेधावभृथस्नानेन च'।

---

* अत्र आमरणात् इत्युक्तेः अग्निवर्णमिति विशेषणं गोमूत्र-उदक-पयो-घृत-गोशकृद्रसाना पञ्चानां प्रत्येकं सम्बध्यते।

† बृहस्पतिसवो नाम यज्ञः। स च ब्राह्मणैरेव कर्तृत्वेन विहितः। 'ब्राह्मणैस्समत्व गच्छेत्'—इत्यनेन जातिमात्रब्राह्मणो भवेदित्युक्तम्। न श्रोत्रियादुत्तमत्वं उपलभेदीत्यर्थः।

‡ नात्र हवनीयद्रव्यमुक्तं तथापि—'द्रव्यानुक्तौ घृतम्'—इति नियमात् घृतेनाष्टसहस्र जुहुयादित्यर्थः। तप्तकृच्छ्रः पूर्वमुक्तः।

---

१ G and the text read वा for च २. C. F. E. H. and I. read स्मृतिः for श्रुतिः. ३ B. and D. read गौडसुरापाने for गौणसुरापाने. ४ I substitutes वा for च. ५ B. D. and H. substitute वा for च, but G: and J insert neither च nor वा.

इति तत्[1] पूर्वोक्तबृहस्पतिसवविषय एव द्रष्टव्यम्[2] । सम्पत्त्यभावे वा[3] द्रष्टव्यम् । यत् पुनर्बृहस्पतिनोक्तम्—

'गौडीं माध्वीं सुरां पैष्टीं पीत्वा विप्रःसमाचरेत् ।
तप्तकृच्छ्रं पराकं च चान्द्रायणमनुक्रमात्'* ॥
(बृ. स्मृ. ४. ६१)

इति तदनन्यौषधसाध्यव्याध्युपशमार्थपाने[4] वेदितव्यम् । प्रायश्चित्तस्याल्पत्वात् । अत एव हेतोः सङ्कल्पमात्रविषयत्वे वा योजनीयम् ॥ ७६ ॥

अथ सुवर्णस्तेयप्रायश्चित्तमाह—

अपहृत्य सुवर्णं तु ब्राह्मणस्य ततः स्वयम् ॥ ७७ ॥
गच्छेन्मुसलमादाय राजाग्र्याशं वधाय तु ।
हतः[5] शुद्धिमवाप्नोति राज्ञाऽसौ मुक्त एव च ॥ ७८ ॥
कामतस्तु[6] कृतं यत् स्यान्नान्यथा वधमर्हति ।

इति । अत्र सुवर्णशब्दः परिमाणविशेषोपेतहेमवचनः । स च परिमाणविशेषो याज्ञवल्क्येन दर्शितः—

---

* गौडीपाने तप्तकृच्छ्रं माध्वीपाने पराक पैष्टीपाने चान्द्रायणमिति क्रमः ।

---

१ G. omits तत्, while B and D तदुक्त बृहस्पतिसवनेन द्रष्टव्यसपत्त्यभावे for तत्पूर्वोक्तबृहस्पतिसवविषय एव द्रष्टव्यम् । सपत्त्यभावे वा २. G and J. omit द्रष्टव्य and read द्रव्यसपत्त्यभावे द्रष्टव्यम ३ Except A H. and I, all others omit वा ४ B C D E F. G J K and L read राजान स्ववधाय, H and I राजान स वधाय for राजाभ्याश वधाय ५ Except A. K and L all others read तत for हतः ६ M. reads कामकारकृतं for कामतस्तु कृत.

'जालसूर्यमरीचिस्थं त्रसरेणुरेजः स्मृतम्।
तेऽष्टौ लिक्षा तु, तास्तिस्रो राजसर्षप उच्यते॥
गौरस्तु ते त्रयः, षट् ते यवो मध्यस्तु, ते त्रयः।
कृष्णलः, पञ्च ते माषः, ते सुवर्णस्तु षोडश'॥
(या. स्मृ. १. ३६२–३६३)

इति। उक्तपरिमाणविशिष्टं ब्राह्मणसुवर्णं योऽपहरति स स्वविशुद्धये स्वयमेव राजकर्तृकं मरणं सम्पादयितुं प्रहारसाधनं मुसलमादाय राजसमीपं मच्छेत्। गत्वा चेदृशं मां प्रहरेति निवेदयेत्। ततो राजकर्तृकान् मुसलसाधनाद्घादयं विशुद्ध्यतीति। अथ मुसलप्रहारेण न मृतस्तदा राज्ञा मुक्तः शुद्धिं प्राप्नोत्येव। तथा च संवर्तः—

'ततो मुसलमादाय सकृद्धन्यात्तु तं स्वयम्॥
यदि जीवति स स्तेनस्ततस्तेयाद्विमुच्यते'।
(सं. स्मृ. १२०–१२१)

इति। अथवा 'ऽमुक्त एव च'—इति पक्षान्तरमेवं व्याख्येयम्। यत्र स्तेनेन ये पोष्यास्तदीयपुत्र-मित्र-कलत्रादयो बहवः सन्ति तत्र स्तेने मृते बहवो[10] विनश्यन्तीति मत्वा कृपालुना राज्ञा

१ E I and the text read त्रसरेणूरज for त्रसरेणुरज २ C. and F read लिख्या for लिक्षा and J. तुलास्तिस्रो for तु तास्तिस्रो, while H. substitutes लिक्षा for लिक्षा ३. B and D. read सुवर्ण, and G H सुवर्णाः both for सुवर्ण ४ Except A and I all others read हरति for ऽपहरति, while J reads स्वविशुद्धि स्वयमेव राजकर्तृकेण प्रहारेण सम्पादयितु, G reads the same, but differs in विशुद्धये for विशुद्धि, while I omits विशुद्धिम् ५ G. omits न, while J. substitutes मुक्त for मृत ६ G substitutes अथ for तथा ७ The text substitutes स्तेनं for सकृत् ८ G and I. read एव for च ९ B D G and J. substitute अत्र for यत्र, while B. and D substitute स्तेयेन for स्तेनेन. १० G. adds अपि after बहव and except. A. G. and I. others read विनङ्क्ष्यन्ति, while G नश्यन्ति for विनश्यन्ति.

धनदण्डादिपुरःसरं स्तेनोऽग्रहतो[1] मुच्येत तदापि विशुद्ध्यत्येवेति । ननु—एवं सति—

'अघ्नन्नेनस्वी राजा'

(गौ. स्मृ. १२. ४५)

इति गौतमवचनात् राजा प्रत्यवायी स्यात् । न । तस्य पोष्यवर्गादिकृपानिमित्तत्वेन[2] स्तेनव्यतिरिक्तविषयेऽप्युपपत्तेः । ननु—ब्राह्मणवधस्यातिगर्हितत्वात् 'मुक्त एव'—इत्ययं पक्षस्तद्विषयत्वेन कुतो न व्याख्यायते ? मनुवचनविरोधादिति ब्रूमः । तथा च मनुः—

'सुवर्णस्तेयकृद्विप्रो राजानमभिगम्य तु ।
स्वकर्म ख्यापयन् ब्रूयान्मां भवाननुशास्त्विति ॥
गृहीत्वा मुसलं राजा सकृद्धन्यात्तु[3] तं स्वयम् ।
वधेन शुद्ध्यति स्तेनो ब्राह्मणस्तपसैव वा[4]' ॥

(म. स्मृ. ११. ९९–१००)

इति । अत्र वधपक्षो नामधारकमात्रविप्रविषयः[5] । तपःपक्षस्तु सवनस्थत्वादिगुणोपेतब्राह्मणविषयः । न च—तादृशस्य स्तेयमसम्भावितं—इति शङ्कनीयम् । कदाचित् क्वचिच्चित्तगततामसवृत्त्या लोभातिशयोदये सति तत्सम्भवात् । एवं च सति 'मुक्त एव'—इति पक्ष एतद्विषयत्वेनाऽपि योजयितुं शक्यते । यच्चौर्यं कामकृतं स्यात्तत्रायमुक्तो वधो द्रष्टव्यः । अन्यथा

---

१ B and D. read धनदण्डापहतो for धनदण्डादिपुरस्सर स्तेनोऽग्रहतो २ We follow here only A , while all others read कृपानिमित्तस्तेनव्यतिरिक्त–for कृपानिमित्तत्वेन स्तेनव्यतिरिक्त–. ३ I substitutes कुर्यात् हत for सकृद्धन्यात्तु त. ४. B. D. E. G H. and J. substitute च and the text तु for वा. ५. G. omits -मात्र- and B. C. D. and F. -विप्र–.

प्रामादादिकचौर्ये वधं नार्हति। न च—लोभैकमूलस्य चौर्यस्य प्रामादिकत्वमसम्भावितं—इति शङ्कनीयम्। यदा वस्त्रप्रान्तग्रथितं सुवर्णं सुवर्णत्वेनाज्ञात्वा ऽपहरति अपहृत्य चान्यस्मै ददाति नाशयति वा न पुनः स्वामिने प्रत्यर्पयति तदा सम्भवत्येवाकामतो ऽप्यपहारः। तादृशे ऽपहारे सवनस्थब्राह्मणवत्तपसा शुद्धिर्द्रष्टव्या[4]। तपसो[2] विशेषस्तु मनुना दर्शितः—

'तपसाऽपनुनुत्सुस्तु सुवर्णस्तेयजं मलम्।
वालवासा[3] द्विजो ऽरण्ये चरेद्ब्रह्महणो व्रतम्'* ॥
(म. स्मृ. ११. १०१)

इति। सुवर्णात् न्यूनपरिमाणेषु हेमसु व्रतभेदाः षट्त्रिंशन्मते दर्शिताः—

'बालाग्रमात्रेऽपहृते प्राणायामं समाचरेत्।
लिक्षामात्रेऽपि च तथा प्राणायामत्रयं बुधः॥
राजसर्षपमात्रे च प्राणायामचतुष्टयम्।
गायत्र्यष्टसहस्रं च जपेत् पापविशुद्धये॥
गौरसर्षपमात्रे तु सावित्रीं वै दिनं जपेत्।
यवमात्रसुवर्णस्य प्रायश्चित्तं दिनद्वयम्[5]॥
सुवर्णकृष्णलं ह्येकमपहृत्य द्विजोत्तमः।
कुर्यात् सान्तपनं कृच्छ्रं तत्पापस्यापनुत्तये॥

---

* ब्रह्महणः यद्विहितं द्वादशवार्षिकं प्रायश्चित्तं तदित्यर्थः।

---

१. B. and D. read लौभकवचनस्य for लोभैकमूलस्य. २. B. and D read विशेष for तपसो विशेष. ३. The text reads चीरवासा for वालवासा; while I. reads ब्रह्मवधव्रतम् for ब्रह्महणो व्रतम्. ४. G and H. read द्रष्टव्या. for दर्शिता.. ५. G. reads दिनत्रयम् for दिनद्वयम्.

अपहृत्य सुवर्णस्य माषमात्रं द्विजाधमः ।
गोमूत्रयावकाहारस्त्रिभिर्मासैर्विशुद्ध्यति ॥
सुवर्णस्यापहरणे वत्सरं यावकं पिबेत् ।
ऊर्ध्वं प्राणान्तिकं ज्ञेयमथ वा ब्रह्महव्रतम्' ॥

इति । वत्सरं यावकाशनं किंचिन्न्यूनसुवर्णापहारविषयम्। सुवर्णापहारे द्वादशवार्षिकविधानात् । यत्तु 'चतुर्विंशतिमते ऽभिहितम्—

'आत्मतुल्यं सुवर्णं वा दद्यादिष्ट्वाथ वा क्रतुम् ।
षडब्दं वा चरेत् कृच्छ्रं जपयज्ञपरायणः ॥
तीर्थानि भ्रमते विद्वान् ततस्तेयात्प्रमुच्यते' ।

इति तत्रात्मतुल्यसुवर्णदानमत्यन्तधनिकविषयम् । क्रतुर्धनिकश्रोत्रियविषयः । षड्वार्षिकं तु तीर्थयात्रासहितं निर्धनश्रोत्रियविषयम् । स्तेयप्रायश्चित्तं सर्वत्र अपहृतं धनं स्वामिने दत्त्वैव कार्यम् ।

'स्तेये ब्रह्मस्वभूतस्य सुवर्णादेः कृते पुनः ।
स्वामिनेऽपहृतं देयं हर्ता त्वेकादशाधिकम्' ॥

इति स्मरणात् । यदा त्वशक्त्या राजा हन्तुमप्रवृत्तः तदा वसिष्ठोक्तं द्रष्टव्यम्—

---

१ I. reads द्विजोत्तमः for द्विजाधम २ C F E. G I. and J. read यावकं भवेत्, while H यावकं भवेत् for यावकं पिबेत् ३ H does not insert तु ४ E H. and I read तीर्थाभिगमने for तीर्थानि भ्रमते ५ I reads तस्मात् for तत ६ G adds तत्सुवर्ण- before स्तेय- and तु after प्रायश्चित्त. ७ E and H. read स्तेयब्रह्मस्व-for स्तेये ब्रह्मस्व-. ८. Except A. B. D and G all others read हर्त्रा for हर्ता; while G. reads दत्त्वा B. and D हृत्वा for the same.

'स्तेनः प्रकीर्णकेशो राजानमभियाचेत ।
ततस्तस्मै राजा औदुम्बरं शस्त्रं दद्यात् ।
तेनात्मानं प्रमापयेत् । मरणात्पूतो भवति' ।
(व. स्मृ. २०. ३१)

इति । औदुम्बरं ताम्रमयम् । यदा सुवर्णमपहृत्य तद् भुक्त्वा तदानीमेवानुतापेन प्रत्यर्पयेत् तदाऽप्यस्तम्बोक्तं द्रष्टव्यम्—

'चतुर्थकालमिताशनेन त्रिवर्षमवस्थानम्' ।
(आ. ध. सू. १. ९. २५. १३. आं. पु.)

इति । मानसापहारे तु सुमन्तुराह—

'सुवर्णस्तेयी द्वादशरात्रं वायुभक्षः पूतो भवति' ।
(व. स्मृ. २०. ४१)

इति । गुरु-श्रोत्रिय-यागस्थत्वादिबहुगुणोपेतब्राह्मणद्रव्यस्य भूयसोऽसकृदपहारे वसिष्ठोक्तं द्रष्टव्यम्—

'निष्कालको घृताभ्यक्तो गोमयाग्निना पादप्रभृति आत्मानं प्रमापयेत् । मरणात् पूतो भवतीति विज्ञायते' ।
(व. स्मृ. २०. ४२)

---

१. The text reads ब्राह्मणसुवर्णहरणे प्रकीर्य केशान् राजानमभिधावेत् स्तेनोऽस्मि भो शास्तु मां भवानिति । तस्मै राजा ... इति विज्ञायते । २ B. and D do not insert गुरु-श्रोत्रिय- ३. I reads भूयशो for भूयसो, while B. and D. read सकृत् for ऽसकृत् ४ The text adds वा after निष्कालको and reads घृताक्तो गोमयाग्निना पादप्रभृति आत्मानमभिदाहयेत् for घृताभ्यक्तो गोमयाग्निना पादप्रभृति आत्मान प्रमापयेत्, while I does not insert मरणात्.

इति । इत्थं सुवर्णस्तेयप्रायश्चित्तमभिहितम् । गुरुतल्पग-प्रायश्चित्तं दशमाध्याये—

'मातरं यदि गच्छेत्तु भगिनीं'

(प. स्मृ. १०. ८)

इत्यत्र प्रपञ्चितम् ॥

**अथ पतितसंसर्गप्रायश्चित्तम् ।**

यस्तु पतितैर्ब्रह्महादिभिः सह संवत्सरं संसर्गं कृत्वा स्वय-मपि पतितस्तस्य प्रायश्चित्तं मनुराह—

'यो येन पतितेनैषां संसर्गं याति मानवः ।
स तस्यैव व्रतं कुर्यात् संसर्गस्य विशुद्धये' ॥

(म. स्मृ. ११. १८१)

इति । आचार्यस्तु कलियुगे संसर्गदोषाभावमभिप्रेत्य सं-सर्गप्रायश्चित्तं नाभ्यधात् । अत एव स्मृत्यन्तरे[1] कलौ वर्ज्यानामनुक्रमणे—

संसर्गदोषः पापेषु[2] ।

(स. स्मृ. १. ५३)

इत्युक्तम् ॥ ७७ ॥ ७८ ॥

संसर्गदोषस्य पातित्यापादकत्वाभावेऽपि पापमात्रापादक-त्वमस्तीत्याह—

आसनात् शयनाद्यानात् सम्भाषात् सहभोजनात्॥७९॥
सङ्क्रामन्ति हि पापानि तैलबिन्दुरिवाम्भसि ।

---

१. The text reads तत्सर्गविशुद्धये for संसर्गस्य विशुद्धये २. We are unable to find out the proper name. C. E. F. H. and I. read स्मृत्यर्थ-सारे. G. स्मृतिसागरे, both for स्मृत्यन्तरे.

इति। *यथा तैलबिन्दुरम्भसि प्रक्षिप्तः सर्वत्र व्याप्नोति तथा पतितसंसर्गकृतं पापं संसर्गिणं पुरुषं व्याप्नोति ॥७९॥

संसर्गदोषव्याजेन पूर्वमनुक्तप्रायश्चित्तानां सर्वेषां साधारणानि प्रायश्चित्तान्याह—

चान्द्रायणं यावकं च तुलापुरुष एव च ॥ ८० ॥
गवां चैवानुगमनं सर्वपापप्रणाशनम्।

इति। तुलापुरुषः कृच्छ्रविशेषः। तत्स्वरूपमुपरिष्टाद्वक्ष्यामः। यत्र यत्र चे[1] प्रतिपदोक्तं प्रायश्चित्तं नोपलभ्यते तत्र सर्वत्र पापगौरव-लाघवानुसारेण चान्द्रायणादीन्यावृत्तान्यैना[2]वृत्तानि वा ऽनुष्ठेयानि[3]। ततः सर्वाणि[4] पापानि नश्यन्तीति सिद्धम् ॥ ८० ॥

इत्थं प्रायश्चित्तकाण्डे नवभिरध्यायैः प्रकीर्णकादीनां महापातकान्तानां पापानां यानि प्रायश्चित्तान्याचार्येणाभिहितानि तानि व्याचक्षाणैरस्माभिस्तत्प्रसङ्गा[5]पतितानि स्मृत्यन्तराण्युदाहृत्य व्यवस्थापितानि।

अनुदाहृतस्मृतिवचनव्यवस्था।

---

*सहशब्दः प्रत्येकमभिसम्बद्ध्यते। सम्भाषशब्दस्त्वत्राजन्तः।

---

१. K. and L. read यावकश्च for यावक च. २ G. and I omit च, while C. and F do not repeat यत्र. ३. I does not insert अनावृत्तानि and G and I. substitute च for वा, while B and D. omit आवृत्तानि. ४ J. substitutes अनुयोज्यानि for अनुष्ठेयानि. ५. G. and J. substitute पूर्वाणि for सर्वाणि, while B. and D. न सन्ति for नश्यन्ति. ६ G. reads तत्प्रसगात्पतितानि, I. तत्प्रसंगात्पठितानि for तत्प्रसङ्गापतितानि, while I. only adds अपि after स्मृत्यन्तराणि.

अथ यानि पूर्वमनुदाहृतानि तान्युदाहृत्य व्यवस्थापयामः ।

तत्रातिपातकस्वरूपम् ।

तत्र विष्णुप्रोक्तां पापानुक्रमणिकामाश्रित्य तदानुपूर्व्यात् प्रायश्चित्तवचनान्युदाहियन्ते । तत्र विष्णुरादावतिपातकमनुक्रम्य तत्स्वरूपमेवं निर्देदेश—

'मातृगमनं दुहितृगमनं स्नुषागमनमित्यतिपातकानि'।

( वि. स्मृ. ३४. १ )

इति । तेषां त्रयाणां दशमाध्याये' —

'मातरं यदि गच्छेत्तु'

( प. स्मृ. १०. ८ )

इत्यस्मिन् प्रकरणे प्रायश्चित्तानि निर्णीतानि ।

महापातकस्वरूपम् ।

अतिपातकानन्तरं महापातकमनुक्रम्य तत्स्वरूपनिर्देश एवं कृतः—

'ब्रह्महत्या सुरापानं ब्राह्मणसुवर्णहरणं गुरुदारगमनमिति महापातकानि । (१) तत्संयोगश्च' ।

( वि. स्मृ. ३५. १–२ )

इति । तत्र गुरुदारगमनव्यतिरिक्तानां चतुर्णां द्वादशाध्याये-

'चतुर्विधे'

( प. स्मृ. १२. ६४ )

---

१. C and F. omit the following —

उदाहृत्य व्यवस्थापयाम । तत्र विष्णुप्रोक्तां पापानुक्रमणिकामाश्रित्य तदानुपूर्व्यात् प्रायश्चित्तवचनान्युद्गाहियन्ते ।
तत्र विष्णुरादावतिपातकमनुक्रम्य तत्स्वरूपमेव निर्देदेश ।

२ G reads विनिर्दिशति and I. विनिर्दिदेश both for निर्देदेश ३ J. does not insert दुहितृगमन. ४ Except A. and I. all others omit -गमन- after गुरुदार-.

इत्यादिना—

'सर्वपापप्रणाशनम्'

(प. स्मृ. १२ ८१)

इत्यन्तेन ग्रन्थेन प्रायश्चित्तान्युक्तानि। गुरुदारगमनस्य तु दशमाध्याये—

'पितृदारान् समारुह्य'

(प. स्मृ. १०. ११)

इत्यत्र प्रायश्चित्तमभिहितम्।

अनुपातकस्वरूपम्।

महापातकानन्तरमनुपातकमनुक्रम्य तत्स्वरूपमेवं निर्दिष्टम्—

'यागस्थस्य क्षत्रियस्य वधः[1] वैश्यस्य रजस्वलायाश्चान्तर्वत्न्याश्चात्रिगोत्रा[2]या अविज्ञातस्य गर्भस्य शरणागतस्य च घातनं ब्रह्महत्यासमानीति। (१) कूटसाक्ष्यं[3] सुहृद्वध इत्येतौ सुरापानसमौ। (२) ब्राह्मणभूम्यपहरणं-सुवर्णस्तेयसमम् (३) पितृव्य-मातामह-मातुल-श्वशुर-नृपपत्न्यभिगमनं गुरुदाराभिगमनसदृशम्। (४) पितृ-मातृ-स्वसृगमनं[4] च (५) श्रोत्रियर्त्विगुपाध्याय-मित्रपत्न्यभिगमनं च। (६)

---

१. The text does not insert वध. २ I reads आत्रेयगोत्राया: for अत्रिगोत्राया. ३. The text reads कौटसाक्ष्य for कूटसाक्ष्यं ४. The text adds निक्षेपापहरण after भूम्यपहरणं. ५. Except A. H. do not insert च and separate the सूत्र.

स्वसुः सख्याः[1] सगोत्राया उत्तमवर्णायाः
कुमार्याः[2] रजस्वलायाः शरणागतायाः[3]
प्रव्रजिताया निक्षिप्तायाश्च' । ( ७ )
( वि. स्मृ. ३६. १–७ )

इति ।

अथ अनुपातकप्रायश्चित्तम्[4]।

तत्र प्रायश्चित्तं विष्णुरेवाह—

'अनुपातकिनस्त्वेते महापतकिनो यथा ।
अश्वमेधेन शुद्ध्यन्ति तीर्थानुसरणेन वा[5]' ॥
( वि. स्मृ ३६. ८ )

इति । तत्राश्वमेधः सार्वभौमराजविषयः ।

'राजा सार्वभौमोऽश्वमेधेन यजेत' ।

इति श्रुतेः । तीर्थस्नानमितरविषयम् । तच्च[6] साधारणप्रायश्चित्तम् । यत्र प्रतिपदोक्तं प्रायश्चित्तं नास्ति नोपलक्ष्यते वा तत्रेदं साधारणं द्रष्टव्यम् । यागस्थक्षत्रवधस्य तादृशवैश्यवधस्य च षष्ठाध्याये—

'वैश्यं वा क्षत्रियं वाऽपि'
( प. स्मृ. ६. १७ )

इत्येतस्य व्याख्यानप्रसङ्गे प्रायश्चित्तं दर्शितम्[7] । तथा चा-

---

१. Except A I. and the text all others read सख्यु for सख्या.. २ The text adds अत्यजाया after कुमार्या. ३ C and F. are quite mistaken here They omit from प्रव्रजिताया to ऋणानप ( P. 94, L. 3, to 422 L. 6 ) ४ Except A C F. and I others substitute च for वा. ५ B D. G. and J. substitute तत्र for तच्च.

न्तर्वत्न्या अत्रिगोत्रायाश्च वधे तत्रैव प्रायश्चित्तमभिहितम्। अविज्ञातगर्भवधे प्रायश्चित्तं चतुर्थाध्याये—

'गर्भपातं च या कुर्यात्'

(प. स्मृ. ४. १७)

इत्यस्मिन् प्रसङ्गे वर्णितम्। शरणागतावधः परिशिष्यते। मनुस्त्वन्यान्यपि ब्रह्महत्यासमान्याह—

'अनृतं च समुत्कर्षे* राजगामि च पैशुनम्।
गुरोश्चालीकनिर्बन्धः समानि ब्रह्महत्यया' ॥

(म. स्मृ. ११. ५५)

इति। याज्ञवल्क्यश्चापरान्याह—

'गुरूणामध्यधिक्षेपो वेदनिन्दा सुहृद्वधः।
ब्रह्महत्यासमं ज्ञेयमधीतस्य च नाशनम्' ॥

(या. स्मृ. ३. २२८)

---

* समुत्कर्ष इति निमित्तसप्तमी। सम्यक् ज्ञातिषु समाजेषु राजसभादिषु वा उत्कर्षं प्राप्स्यामीति हेतुपूर्वकं यदनृतमभिधीयते तद्ब्रह्महत्यासममिति भावः। 'राजगामि पैशुनं' राजकुलात्तेन सह विवादो निर्बन्धो अनृतादिशंसनं वा। यदाह गौतमः—

'गुरावनृताभिशंसनम्'

इति। यद्यपि अत्र 'गुरौ' इत्युक्तं तथापि अनृताभिशंसनस्य गुरौ राजकुले वा तुल्यत्वेनैव ब्रह्महत्यासमत्वमिति सुधीभिरूह्यम्।

---

१. Except A. and I. all others read विज्ञात- for अविज्ञात-, but it seems to be incorrect २ B. and D read अधिकानिर्बन्ध समानं for अलीकानिर्बन्ध. समानि. ३ I. adds अपि before आह.

इति । अत्र शरणागतवधादिषु पादन्यूनं ब्रह्महत्याव्रतमवगन्तव्यम् । समशब्दस्य—

'राजसमो मन्त्री'

इत्यादावीषन्न्यूने प्रयोगदर्शनात् । मनुस्त्वधीतत्यागादीनां सुरापानसमत्वमाह—

'ब्रह्मोज्झं* वेदनिन्दा च कूटसाक्ष्यं सुहृद्वधः ।
गर्हिता-ऽनाद्ययोर्जग्धिः सुरापानसमानि षट्' ॥
(म. स्मृ. ११. ५६)

इति । तत्र ब्रह्मोज्झस्य प्रायश्चित्तं वसिष्ठ आह—

'ब्रह्मोज्झः कृच्छ्रं द्वादशरात्रं चरित्वा
पुनरुपयुञ्जीत† वेदमाचार्यात्' ।
(व. स्मृ. २०. १२)

इति । इदं च प्रायश्चित्तं प्रौमादिकाध्ययनत्यागविषयम् । नास्तिकतया तत्त्यागे पादन्यूनं सुरापानव्रतमिति मनोर्मतम् । यद्यपि वसिष्ठेनोक्तम्—

---

* ब्रह्मोज्झं अधीतवेदस्यानभ्यासेन विस्मरणमिति मेधातिथि कुल्लूकौ । अधीतस्य वेदस्य असच्छास्त्राश्रयेणोपेक्षणमिति गोविन्दराजः । वेदस्यात्यन्तत्यागोऽनध्ययनं वेति सर्वज्ञनारायणः । इदमेव युक्तं भाति ।

† द्वादशरात्रकृच्छ्राचरणानन्तरं पुनरप्याचार्यात् वेदमुपयुञ्जीत अधीयीतेत्यर्थः ।

---

१. The text reads this line :—

'ब्रह्मोज्झता वेदनिन्दा कौटसाक्ष्य सुहृद्वधः ।

२. B. D. E H. and J. read गर्हितानाद्ययो for -ऽगर्हिता -ऽनाद्ययो ३. I. reads प्रमादाध्याद्विविषयम् for प्रामादिकाध्ययनत्यागविषयम.

'गुरोरलीकनिर्बन्धे कृच्छ्रं द्वादशरात्रं चरित्वा
सचैलं स्नात्वा गुरुप्रसादात् पूतो भवति'।
( व. स्मृ. २१. २८ )

इति। तदेतदमतिपूर्वे सकृदनुष्ठाने वेदितव्यम्। विष्णुनाऽनुक्रान्तस्य कौटसाक्ष्यस्य द्वादशवार्षिकं प्रायश्चित्तम्। तथा च तद्वतानुवृत्तौ शङ्ख आह—

'कौटसाक्ष्यं तथा कृत्वा निक्षेपमपहृत्य च।
एतदेव व्रतं कुर्यात् त्यक्त्वा च शरणागतम्'॥
( शं. स्मृ. १७. ९ )

इति। यत्र साक्ष्यनृतवदनेन वर्णिनो वधप्राप्तिः तद्विषयमिदम्। अपरमपि ब्रह्महत्यासमं विष्णुर्दर्शयति—

'आक्रुष्टस्ताडितो वाऽपि धनैर्वा विप्रयोजितः।
यमुद्दिश्य त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्'* ॥
( वि. स्मृ. ३. ४६ )

---

* पूर्वं 'चण्डालादुदकात् सर्पात्'— ( माधवाचार्यटीका अ. ११. श्लो. १६-१८) इत्यादिनोक्तादात्मघातिनोऽन्योयं ब्रह्मघाती। तत्र तु न कस्याप्युद्देशः। केवलमसह्यदुःखादिना देहत्यागे प्रवृत्तिः। किंच आक्रोशनादिनिमित्तं विना देहत्यागे स आत्मघाती भवति न तु ब्रह्मघाती।

---

१ The text reads this Sûtra as follows —
गुरोश्चालीकनिर्बन्ध सचैल स्नातो गुरु प्रसादयेत्
प्रसादात्पूतो भवतीति विज्ञायते।

२ E. H. and I. read तथा for त्यक्त्वा, while the text reads this verse.—
'कूटसाक्ष तथैवोक्त्वा निक्षेप च प्रहृत्य च।
एतदेव व्रत कुर्याच्चोक्त्वा च शरणागतम्' ॥,
but it seems to be incorrect. ३ B. and D read अधमर्णिनो for वर्णिनो.

इति । आक्रोशनादिनिमित्ताभावे मृतस्यैव हत्यादोषः। न तूद्देश्यस्य । तथा च स्मृत्यन्तरम्—

'अकारणं* तु यः कश्चित् द्विजःप्राणान् परित्यजेत् ।
तस्यैव तत्र दोषः स्यान्न तु यैं परिकीर्तयेत्' ॥

इति । याज्ञवल्क्योऽपि सुरापानसमान्युदाजहार—

'निषिद्धभक्षणं जैह्यमुत्कर्षे च वचोऽनृतम्।
रजस्वलामुखास्वादः सुरापानसमानि तु' ॥
(या. स्मृ. ३. २२९)

इति । एवमादिषु सर्वत्र येन साम्यमुच्यते तदीयं प्रायश्चित्तं किंचिन्न्यूनमनुष्ठेयम् । सा च न्यूनता निमित्तगौरवलाघवानुसारिणी कल्पनीया । सुवर्णस्तेयसमे तु ब्राह्मणभूम्यपँहरणे मरणान्तिकप्रायश्चित्तेषु न्यूनत्वकल्पनाऽसम्भवात् द्वादशवार्षिकादित्रतानि यथायोगं कल्पनीयानि । याज्ञवल्क्योऽन्यानि सुवर्णस्तेयसमान्याह—

'अश्व-रत्न-मनुष्य-स्त्री-भू-धेनुहरणं तथा ।
निक्षेपस्य च सर्वं हि सुवर्णस्तेयसम्मितम्' ॥
(या. स्मृ. ३. २३०)

---

* अकारणमिति आक्रोशनादावपि देहत्यागस्य न किमपि कारणम् । किन्तु प्रत्याक्रोशनादयोऽन्ये वा उपाया अनुष्ठेयाः । तानकृत्वा यो देहत्यागं करोति स अकारणप्राणत्यागी एव भवतीति तात्पर्यम् ।

---

१. H reads उद्देशश्च; while G. omits the following portion नतूद्देश्यस्य । तथा च स्मृत्यन्तरम्—
'अकारण तु य कश्चित् द्विज प्राणान्परित्यजेत् ।
तस्यैव तत्र दोष .. .....'॥.

२. B. and D. read य for यं. ३. E. reads उत्कर्षेण for उत्कर्षे च. ४. Except A. all others read -भूमिहरणे. ५ J. reads -मरण for -हरणं.

इति। मनुरपि—

'निक्षेपस्यापहरणं नरा-ऽश्व-रजतस्य च।
भूमि-वज्र-मणीनां च रुक्मस्तेयसमं स्मृतम्' ॥
(म. स्मृ. ११. ५७)

इति। पितृव्यपत्न्यादिगमनानां गुरुतल्पसमानानां दश-माध्याये—

'मातृष्वसृगमे चैवम्'
(प. स्मृ. १०. ९)

इत्यस्मिन् प्रकरणे प्रपञ्चितम्।

### उपपातकस्वरूपम्।

अनुपातकानन्तरं विष्णुरुपपातकमनुक्रम्य तत्स्वरूपमेवं निर्दिदेश—

'अनृतवचनमुत्कर्षे। (१) राजगामि च पैशुन्यम्।(२) गुरोश्चालीकनिर्बन्धः। (३) वेदनिन्दा। (४) अधी-तस्य च त्यागः। (५) अग्नि-मातृ-पितृ-सुत-दाराणां च। (६) अभोज्यान्नाभक्ष्यभक्षणम्। (७) परस्वहरणम्। (८) परदाराभिगमनम्। (९) अयाज्ययाजनम्। (१०) विकर्मणा जीवनम्। (११) असत्प्रतिग्रहः। (१२) क्षत्रिय-विट्-शूद्र-गोवधः। (१३) अविक्रेयविक्रयः।

---

१ G. I and the text do not insert च. २ B. D. E. and H read अ-भोज्याभक्ष्यभक्षणम्, I अभोज्यान्नभक्षणम्, J. अभोज्यभक्षणम्; and G. अभोज्यभोक्ष्यभक्षण all for अभोज्यान्नाभक्ष्यभक्षणम् ३. We follow here A. and the text, while all others read गुरुदाराभिगमनम् for परदाराभिगमनम् The Vijnáneśvara also reads परदारा- (*Vide* ३ २३४-२४२ Commentary). ४. G. omits -गो-, but it seems very proper.

(१४) परिवित्तिताऽनुजेने[1] ज्येष्ठस्य । (१५) परिवेदनं च । (१६) तस्य चे[2] कन्यादानम् । (१७) याजनं च । (१८) व्रात्यता । (१९) भृतकाध्यापनम् । (२०)[3] भृतकाध्ययनादानम् । (२१) सर्वाकरेष्वधीकारः[4] । (२२) महायन्त्रप्रवर्तनम्[5] । (२३) द्रुम-गुल्म[6]-लतौषधीनां हिंसा । (२४) स्त्रिया जीवनम् । (२५) अभिचारः[7] । (२६) मूलकर्मसु च प्रवृत्तिः । (२७) आत्मार्थं चे[8] क्रियारम्भः । (२८) अनाहिताग्निना । (२९) स्तेयम्[9] । (३०) *देवर्षि-पितृणामृणस्योनपक्रिया[10] । (३१) असच्छास्त्राधिगमनम्[11] । (३२) नास्तिकता । (३३) कुशीलेता[12] ।

---

* अत्र विज्ञानेश्वरोऽपीदं सूत्रमेवमेव पपाठ । तथा च सति देवादीनां त्रयाणां ऋणानपक्रियायाः परिगणितत्वात् 'ऋणानपक्रियादीन्युदाजहार' इत्येतन्न सङ्गच्छेत । अतोऽत्र व्यावहारिकस्य ऋणस्य ग्रहणं माधवाचार्यस्य नाभिप्रेतमिति अवगन्तव्यम् ।

---

१ All, except A I and the text read परिवित्तिताऽनुजे for परिवित्तिताऽनुजेन २ I. does not insert these two Sútras, namely :—

तस्य च कन्यादानम् । ( १७ ) याजनं च । ( १८ )

and also B D. E. F. G. H. and J. omit याजनं च ३ B. and D. read भृतकाध्याध्ययनादानम् and E G H J. भृतकाध्ययनादानम्, while I. omits च. ४ G and J read सर्वाकारेषु for सर्वाकरेषु; while B D and G read अधिकार for अधीकार ५ G reads -वर्तनम् for -प्रवर्तनम्. ६ Except A. I and the text all others read द्रुम-गुल्म-लतौषधिमहाहिंसा, while the text adds -वल्लि- after -गुल्म- and also the Vijnánesvara follows it. ७ I and the text do not separate these two Sûtrâs I reads अभिचारमूलकर्मसु and the text अभिचारबलकर्मसु for अभिचार and मूलकर्मसु. ८. The text reads आत्मार्थे and omits च. ९. All, except A. read स्तेय, while the text omits it. १०. B D. and J. read योषित्पितृणामसत्क्रिया, G योषित्प्रियाणां समक्रिया, E. and H योषित्प्रियाणामसत्क्रिया, but E. has a marginal reading -पित्- for -प्रिया- for देवर्षि-पित्रणामृणस्यानपक्रिया ११. B D. G. J. and the text read -भिगमनम् for धिगमनम्. १२. B and D read कुशलता and the text कुशीलवता both for कुशीलता.

(३४) मद्यपस्त्रीनिषेवणम्* । (३५) इत्युपपातकानि[1] ।
(वि. स्मृ. ३७. १–३६)

इति । याज्ञवल्क्यस्तु विष्णुनाऽनुक्तान्यपि कानिचिदुपपातकानि ऋणानपक्रियादीन्युदाजहार—

'गोवधो व्रात्यता स्तैन्य[2]मृणानां चानपक्रिया† ।
अनाहिताग्निताऽपण्यविक्रयः परिवेदनम् ॥
भृताद्ध्यैयनादानं भृतकाध्यापनं तथा ।
पारदार्यं पारिविच्यं वार्धुष्यं लवणक्रिया‡ ॥
§स्त्री-शूद्र-विट्-क्षत्रवधो निन्दितार्थोपजीवनम्[3] ।

---

*सर्वाणीमानि व्याख्यातानि पूर्वमेव तत्रतत्रेति नात्र पुनर्व्याख्यानम् ।

† अत्र 'गोवध'शब्देन गोपिण्डव्यापादनं 'स्तैन्य' शब्देन ब्राह्मणसुवर्ण-तत्समव्यतिरिक्तपरद्रव्यापहरणं, 'ऋणानामनपक्रिया' इत्यनेन उत्तमर्णाद् गृहीतस्य ऋणस्याप्रदान इति यथायथमूहनीयम्। यत्तु–'गृहीतस्य सुवर्णादेरप्रदानं ऋणानामनपाकरणम्'–इत्युक्त्वा 'तथा देवर्षिपितॄणां सम्बन्ध्यर्णस्यानपाकरणं च'–इति विज्ञानेश्वरेणोक्तं तन्न । माधवाचार्यस्याभिमतमिति प्रतिभाति । विष्णुना अनुक्ताना केषाचिदुपपातकानां प्रदर्शनायैव-

'गोवधो व्रात्यता स्तैन्यमृणानां चानपक्रिया'।

इत्यादिगाज्ञवल्क्यीयवचनानामत्रोदाहृतत्वादिति सुधियो विदां कुर्वन्तु ।

‡'लवणक्रिया' लवणस्योत्पादनमित्यर्थः ।

§ स्त्रिया वधः आत्रेयीव्यतिरेकेण ब्राह्मण्या अपि । आत्रेय्यास्तु–

'गर्भहा च यथावर्णं तथात्रेयीनिषूदकः'।
(या. स्मृ. ३. २९१)

इत्यनेन ब्रह्महत्यादिसमत्वकथनेन ब्रह्महत्यादिव्रतोक्तेः । शूद्रवधवदीक्षितक्षत्रिय वैश्यवधः ।

---

१ Except A. and the text all others do not insert इति २. B and D. read गो-ब्राह्मणवध स्तेयम् for गोवधो व्रात्यता स्तैन्यम्; while the text and G substitute स्तेयम् for स्तैन्यम्. ३. C. F. read ऽपत्य- for ऽपण्य ४. J. reads निन्दितार्थे ऽपि.

नास्तिक्यं व्रतलोपं* च सुतानां चैव विक्रयः ॥
†धान्य-कुप्य-पशुस्तेयमयाज्यानां च याजनम् ।
पितृ-मातृ-सुतत्यागस्तटाकारामविक्रयः ॥
कन्यासेन्दूषणं ‡चैव परिवेदकयाजनम् ।
कन्याप्रदानं तस्यैव कौटिल्यं § व्रतलोपनम् ॥

---

* व्रतलोपः ब्रह्मचारिणः स्त्रीप्रसङ्गः ।

† धान्यं ब्रीह्यादि, कुप्यमसारद्रव्यं त्रपु-सीसादि, पशवो गवादयः तेषामपहरणम् । 'गोवधो व्रात्यता स्तेयम्' इत्येनेन स्तेयग्रहणेनैव सिद्धे पुनर्धान्य-कुप्यादिस्तेयग्रहणं नित्यार्थम् । अतो धान्यादिव्यतिरिक्तद्रव्यस्तेये नावश्यमेतदेव प्रायश्चित्तम् । अपि तु ततो न्यूनमपि भवत्येव । तथा चैतेन बान्धवत्यागग्रहणेनैव सिद्धे पुनः पित्रादित्यागग्रहण व्याख्यातम्—इति विज्ञानेश्वरः ।

‡ कन्याया दूषणं अंगुल्यादिना योनिविदारणम् । न तु सम्भोगः । तस्य—

'सखिभार्या-कुमारीषु'

(या. स्मृ. ३. २३१)

इत्यत्र गुरुतल्पसमत्वस्योक्तत्वात् ।

§ कौटिल्यं गुरोरन्यत्र । गुरुविषयस्य तु कौटिल्यस्य—

'निषिद्धभक्षणं जैह्यम्'

(या. स्मृ. ३. २२९)

इत्यत्र सुरापानसमत्वमुक्तम् । तथा च पूर्वं 'नास्तिक्यं व्रतलोप च' ।

---

१. Except A. C. F. and I. all others read - कूप्य- for - कुप्य . २ I reads कन्याद्य दूषण for कन्यासन्दूषण, while the text परिविन्दक- for पारिवेदक-. ३ J. reads च तुलायन for व्रतलोपनम्, but it does not give any good sense.

आत्मनोऽर्थे क्रियारम्भो मद्यपस्त्रीनिषेवणम्।
स्वाध्यायाग्नि-सुतत्यागो बान्धवत्याग एव च॥
इन्धनार्थं द्रुमच्छेदः स्त्रीहिंसौषधजीवनम्।
हिंस्रयन्त्रविधानं च व्यसनान्यात्मविक्रयः॥
शूद्रप्रेष्यं हीनसख्यं हीनयोनिनिषेवणम्।
तथैवानाश्रमे वासः परान्नपरिपुष्टता॥
असच्छास्त्राधिगमनमाकरेष्वधिकारिता।
भार्याया विक्रयश्चैषामेकैकमुपपातकम्'॥

(या. स्मृ. ३.२३४–२४२)

इति। यद्यपि–

'अनृतं च समुत्कर्षे'।

(म. स्मृ. ११. ५५)

इत्येतन्मनुना ब्रह्महत्यासमेषु पठितं याज्ञवल्क्येन सुरापानसमेषु विष्णुना उपपातकेषु तथापि विषयभेदेन त्रैविध्यं वक्तुं शक्यत्वान्न किञ्चिदपि साङ्कर्यम्। विषयभेदस्तूच्यते। द्वेष्यं पुरुषं राजभृत्यादिभिर्मारयितुं तस्मिन्नविद्यमानमपि महान्त-

---

इत्युक्त्वा पुनः 'व्रतलोपनम्' इत्युक्तेः। अशिष्टाप्रतिषिद्धेष्वपि 'श्रीहरिचरणकमलप्रेक्षणात् प्राक् ताम्बूलादिकं न भक्षयामि' इत्येवंरूपेषु नियमेषु प्राप्त्यर्थम्। न तु स्नातकव्रतप्राप्त्यर्थम्। तत्र–

'स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम्'।

इति मनुना लघुप्रायश्चित्तस्य प्रतिपादितत्वात्।

---

१ J reads हिंसायन्त्र- for हिंस्रयन्त्र-. २. I. reads शूद्राप्रेष्य for शूद्रप्रेष्यं ३ I reads अन्याश्रमे for अनाश्रमे ४. I. reads किंचिदसांकर्यम् for किंचिदपि सांकर्यम्.

मपराधमारोप्यानृतं चेद्ब्रूयात् तद् ब्रह्महत्यासमम् । वधपर्यवसायित्वात् । यस्तु लाभ-पूजा-ख्यातिकामो राजसभादौ स्वस्मिन् अविद्यमानमपि चतुर्वेदाभिज्ञत्वं प्रकटयितुमनृतं ब्रूते तत्सुरापानसमम् । अतिगर्हितत्वात् । यस्तु सुखगोष्ठ्यादौ परोपकारमन्तरेण वृथाऽनृतं ब्रूते तस्यैतदुपपातकम् । तत्राद्ययोः प्रायश्चित्तं पूर्वमेवोक्तम् । तृतीये तु कामकृते याज्ञवल्क्य आह—

'मयि[1] तेज इति च्छायां स्वां दृष्ट्वाऽम्बुगतां जपेत् ।
सावित्रीमशुचौ दृष्टे चापत्ये चानृतेऽपि च' ॥
(या. स्मृ. ३. २७९)

इति । अकामकृते तु मनुनोक्तं द्रष्टव्यम्—

'सुप्त्वा क्षुत्त्वा च भुक्त्वा च निष्ठीव्योक्त्वाऽनृतानि च ।
पीत्वाऽपोऽध्येष्यमाणश्च आचामेत्[3] प्रयतोऽपि सन्' ॥
(म. स्मृ. ५. १४९)

इति । राज्ञोऽग्रे साक्षात् परम्परया वा परदोषकथनं राजगामि पैशुन्यम् । गुरावलीकनिर्बन्धो द्विविधः । तत्र राजगृहादौ स्वयं समर्थःसन् असमर्थस्य गुरोर्द्रव्यलाभाद्युपरोधकारणं निर्बन्धं करोति चेत् सोयमलीकनिर्बन्धो ब्रह्महत्यासमत्वेन मनुनोक्तः । यत्र वाक्पारुष्यादिमात्रेण गुरोरप्रियमुपजायते

१. I. reads मुख्यगोष्ठ्यादौ for सुखगोष्ठ्यादौ. २ I reads अपि for मयि ३ B. and D read आचरेत् for आचामेत्; while G आचमेत् for the same. ४. All others except A. and I. read गुरोरलीक- for गुरावलीक-; while G. omits the following portion —

निर्बन्धो द्विविध. । तत्र राजगृहादौ स्वयं समर्थ सन्नसमर्थस्य ~ गुरोर्द्रव्यलाभाद्युपरोधकारण

५ H. reads राजगृहाङ्गणे for राजगृहादौ.

सोऽयमलीकनिर्बन्ध उपपातकम्। वेदनिन्दा त्रिविधा। बुद्धार्हतादिशास्त्राण्यभ्यस्य वेदानामप्रामाण्यप्रतिपादने निर्बन्ध एका निन्दा। सेयं[1] याज्ञवल्क्येन ब्रह्महत्यासमेषूपवर्णिता। सत्यामपि वेदप्रामाण्यबुद्धौ जल्प-वितण्डादिहेतुशास्त्राभ्यसनितया श्रुति-स्मृत्युक्तस्यानुष्ठानस्यावज्ञा द्वितीया निन्दा। एतदेवाभिप्रेत्य मनुराह—

'यो ऽवमन्येत ते मूले[3] हेतुशास्त्राश्रयाद् द्विजः।
स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दकः'॥
(म. स्मृ. २. ११)

इति। सेयं निन्दा सुरापानसमेषु मनुनोदाहृता। यस्तु वैदिकं कर्मानुतिष्ठन्नपि नात्यन्तं तत्फले[4] श्रद्दधे 'किमनेन भविष्यति जनापवादभयादेव केवलमनुतिष्ठामि'— इत्येवं निन्दति सेयं निन्दोपपातकेषु पठ्यते।

एवमध्ययनत्यागादेरेकैकस्य बहुविधस्यानुक्रान्तस्य गौरवलाघवे पर्यालोच्यावान्तरभेदः कल्पनीयः।

'अग्नि-मातृ-पितृ[5]-सुत-दाराणाम्'
(वि. स्मृ. ३७. ६)

इत्यत्रापि त्याग इति पदमन्वेति। अनुक्रान्तानामुपपातकानां पूर्वोक्तेभ्यो[6]ऽतिपातक-महापातकाऽनुपातकेभ्योऽल्पत्वादुपपातकत्वम्। तदुक्तं स्मृत्यन्तरे—

---

१. B and D. read ब्रह्महत्यासमोपपादिता याज्ञवल्क्येन and omit सेय. २ A. and the text read मूले for तूभे ३. All, except the text and A. read -श्रयो for -श्रयात् ४ I. reads तत्त्वत for तत्फले ५ B. D and I. omit -पितृ- ६ I. reads प्रोक्तेभ्यो for पूर्वोक्तेभ्यो-, while except A and I all others do not insert -ऽतिपातक-

'महापातकतुल्यानि पापान्युक्तानि यानि तु ।
तानि पातकसंज्ञानि तन्न्यूनमुपपातकम्' ॥
इति ।

**अथ उपपातकस्य साधारणं प्रायश्चित्तम् ।**

तस्य चोपपातकजातस्य साधारणं प्रायश्चित्तं विष्णुराह—

'उपपातकिनस्त्वेते कुर्युश्चान्द्रायणं नराः ।
पराकमथ वा कुर्युर्यजेयुर्गोसवेन च' ॥
( वि. स्मृ. ३७–३९ )

इति । तत्रैतेषामावृत्तानां सङ्घाते गोसवो द्रष्टव्यः* । एकैकस्य च शक्तम्प्रति पराकः अशक्तम्प्रति चान्द्रायणम् । याज्ञवल्क्योऽपि साधारणं प्रायश्चित्तमाह—

'उपपातकशुद्धि स्यादेवं चान्द्रायणेन वा ।
पयसा वाऽपि मासेन पराकेणाऽथ वा पुनः'॥
( या. स्मृ. ३. २६९ )

इति । एवमित्यनेन पदेन प्रकृतं गोवधव्रतमतिदिश्यते । अतिदेशस्योपदेशान्न्यूनविषयत्वात् । गोव्रताङ्गानि गोचर्मादीनि कानिचिद्विषयान्तरेषु निवर्तन्ते । एतच्च व्रतचतुष्टयमकामकारे शक्त्यपेक्षया विकल्पितं द्रष्टव्यम् । कामकारे तु—

---

* नरा इत्युक्तेः सर्वेषामेव वर्णानामिदं प्रायश्चित्तम् । तत्र क्षत्रियादीनामनधिकारात् गोसवो ब्राह्मणस्यैव, चान्द्रायण-पराके द्विजातिसाधारणे, शूद्रस्य दानादिकमिति व्यवस्था द्रष्टव्या ।

---

१ The text reads पराक च तथा for पराकमथ वा and substitutes गोसवेन for गोसवेन २. I. omits च and reads अशक्तम्प्रति पराक, and शक्तम्प्रति चान्द्रायणम् ३ B. D. G. and I. substitute निधि for पुन. ४. G. adds पुन before पदेन.

'एतदेव व्रतं कुर्युरुपपातकिनो द्विजाः।
अवकीर्णिव्रतं[1] शुद्ध्यर्थं चान्द्रायणमथापि वा[2]'॥
(म. स्मृ. ११. ११७)

इति मनुनोक्तं त्रैमासिकं द्रष्टव्यम्। एतच्च साधारणप्रायश्चित्तं प्रतिपदोक्तप्रायश्चित्ताभावे तदनुपलम्भे वा द्रष्टव्यम्।

**प्रतिपदोक्तप्रायश्चित्तानि।**

प्रतिपदोक्तानि प्रायश्चित्तानि यथासम्भवमुदाहरामः। तत्र गुरोरलीकनिर्बन्धोपपातकस्य प्रायश्चित्तं विष्णुराह—

'समुत्कर्षेऽनृते[3] गुरोरलीकनिर्बन्धे[4]
तदाक्षेपणे[5] च मासं पयसा वर्तेत[6]'।
(वि. स्मृ. ५४. ५४)

इति। अग्नित्यागे[7] स एवाह—

'वेदाग्न्युत्सादी[8] त्रिषवणस्नाय्यधःशायी
संवत्सरं सकृद्भैक्षेण वर्तेत'।
(वि. स्मृ. ५४–१३)

इति। वसिष्ठोऽपि—

'योऽग्नीनपविद्धयेत्[9] स कृच्छ्रं द्वादशरात्रं
चरित्वा पुनराधानं[10] कारयेत्'।
(व. स्मृ. २१. २७)

---

१. I. reads अवकीर्णी तु शुद्ध्यर्थं चरेच्चांद्रायण व्रतम्. २ G. substitutes च for वा. ३. I. reads समुत्कर्षेऽनृते ४. The text adds च after गुरो·· ५. We follow here only A. and the text, while all others read तदाक्षारणे for तदाक्षेपणे ६. J. reads चमसं for च मास. ७ Except A. and I. all others read विष्णु for स. ८ I. reads वेदाग्न्युत्सादित for वेदाग्न्युत्सादी. ९ The text omits स १०. C. F E. H. an read पुनराधेय for पुनराधानं.

इति । मनुरपि—

'अग्निहोत्र्यपविध्याग्नीन् ब्राह्मणः कामकारतः ।
चान्द्रायणं चरेन्मासं वीरहत्यासमं हि तत्' ॥
अग्निहोत्र्यपविध्याऽग्नीन् मासादूर्ध्वं तु कामतः ।
कृच्छ्रं चान्द्रायणं चैव कुर्यादेवाविचारयन् ॥
( म. स्मृ. ११. १२९–१३० आन्ध्र पुस्तके) ।

इति । हारीतः—

'संवत्सरोत्सन्नेऽग्निहोत्रे चान्द्रायणं कृत्वा पुनरादध्यात् । द्विवर्षोत्सन्ने सान्तपनं चान्द्रायणं च कुर्यात् । त्रिवर्षोत्सन्ने संवत्सरं कृच्छ्रमभ्यस्य पुनरादध्यात्' ।
( हा. स्मृ. ३. ११-२१ )

इति । शङ्खोऽपि—

'अभ्युत्सादी सांवत्सरं प्राजापत्यं चरेत् गां च दद्यात्' ।
( शं. स्मृ. ११. २३ )

इति । भरद्वाजः ।

'द्वादशाहातिक्रमे त्र्यहमुपवासः । मासातिक्रमे द्वादशाहमुपवासः । संवत्सरातिक्रमे मासोपवासः । पयोभक्षणं च' ।

---

१ I. reads सवत्सरोत्सन्नोऽग्निहोत्री for संवत्सरोत्सन्नेऽग्निहोत्रे. २. B. and D. read सोमपान for सान्तपन and omit चान्द्रायण च. C. and F. read the same, but do not omit चान्द्रायणं E. G. H. and J. read सोमायनं for सान्तपन, while J -त्सर्जने for -त्सन्ने. ३ G reads भारद्वाज for भरद्वाजः ४ B and D. read द्वादशातिक्रमे त्र्यहमुपवास संवत्सरातिक्रमे द्वादशाहमुपवासः पयोभक्षण च ।.

इति। एतत्सर्वमालस्यादग्निंत्यागविषयतया यथायोगमूहनीयम्। यत्तु भरद्वाजगृह्येऽभिहितम्—

'प्राणायामशतमा दशरात्रं कुर्यात्। उपवासः स्यादा विंशतिरात्रम्। अत ऊर्ध्वमा षष्टिरात्रं तिस्रो रात्रीरुपवसेत्। अत ऊर्ध्वमा संवत्सरात् प्राजापत्यं व्रतं चरेत्। अन ऊर्ध्वं कालबहुत्वे दोषबहुत्वम्'।

इति तत् प्रमादादग्निंत्यागविषयम्। नास्तिक्यात् त्यागे तु व्याघ्र आह—

'योऽग्निं त्यजति नास्तिक्यात् प्राजापत्यं चरेद् द्विजः। अन्यत्र पुनराधानं दानमेव तथैव च' ॥

इति। प्राजापत्यस्योपलक्षणत्वात् त्यागकालस्य गौरवलाघवानुसारेण व्रतान्तराण्यूहनीयानि। व्रतानन्तरभावि कर्तव्यमाह जातूकर्ण्यः—

'अतीतकालं जुहुयादग्नौ विप्रो यवानयम्।
नष्टेऽग्नौ विधिवद्दद्यात् कृत्वाऽऽधानं पुनर्द्विजः' ॥

इति। एतच्चौपासनाग्निविषयम्। दारत्यागे शातातप आह—

---

१ G. reads भारद्वाजगृह्ये २. C E. F add कुर्यात् after -मा दशरात्र, but of no use here. ३. E reads उपवास स्याद्विंशतिरात्र कुर्यात्, I. उपवासमा विंशतिरात्र कुर्यात् both for उपवासः स्यादा विंशतिरात्र ४ Except I. all others do not insert व्रत. ५. I.omits -भावि-. B and D, read व्रतान्तर कर्तव्यमाह and except E H व्रतान्तरभावि कर्तव्यमाह both for व्रतानन्तरभाविकर्तव्यमाह ६ We are unable to find out a correct reading B. and D. read विप्राय चाव्ययम्, C. and F विप्राय वायवम्, G. H. विप्रोऽथवा स्वयम्, E and J. विप्राय वायव्यम् all for विप्रो यवानयम्, while H. अतीते काले for अतीतकालं. ७ G. and H. read नाशेऽग्नौ for नष्टेऽग्नौ and C. and F. गलेऽग्नौ for the same.

'कौमारदारत्यागी* मासं पयोभक्षः शुद्ध्यति' ।
( शा. स्मृ. १. २७ )

इति । अभोज्याभक्ष्यभक्षणप्रायश्चित्तं त्वेकादशाध्याये प्रपञ्चितम् ।

**अथ परस्वहरणप्रायश्चित्तम् ।**

तत्र परस्वहरणे मनुराह—

'धान्या-ऽन्न-धन-चौर्याणि कृत्वा कामाद् द्विजोत्तमः ।
स्वजातीयगृहादेव कृच्छ्राब्देन विशुद्ध्यति ॥
मनुष्याणां तु हरणे स्त्रीणां क्षेत्र-गृहस्य च ।
कूप-वापी-जलानां च शुद्धिश्चान्द्रायणं स्मृतम् ॥
द्रव्याणामल्पसाराणां स्तेयं कृत्वाऽन्यवेश्मनः ।
चरेत् सान्तपनं कृच्छ्रं तन्निर्यात्यात्मशुद्धये ॥
भक्ष्य-भोज्यापहरणे यान-शय्यासनस्य च ।
पुष्प-मूल-फलानां च पञ्चगव्यं विशोधनम् ॥
तृण-काष्ठ-द्रुमाणां च शुष्कान्नस्य गुडस्य च ।

---

* 'कौमारदार'—इत्यनेन ब्राह्मेण विधिना कौमारे वयस्यूढा स्त्री उपलक्षिता भवति। तस्या एव त्यागे दोषः। नतु गान्धर्वादूढाया इति तात्पर्यम्।

---

१. H. omits following :—

अभोज्याभक्ष्यभक्षणप्रायश्चित्तं तु एकादशाध्याये प्रपञ्चितम् ।
तत्र परस्वहरणे मनुराह—
'धान्याऽन्न-धनचौर्याणि कृत्वा कामाद् द्विजोत्तम ।
सजातीयगृहादेव कृच्छ्राब्देन विशुद्ध्यति ॥;

while G. reads अभोज्यभक्षणे for अभोज्याभक्ष्यभक्षणे. २. J reads परस्वग्रहणे for परस्वहरणे. ३. I. reads सजातीय- for स्वजातीय-. ४. The text reads -वेइमत for -वेइमन.. ५. B. and D read तन्निर्यात्यविशुद्धये for तन्निर्यात्यात्मशुद्धये. ६. I. reads शुक्कान्नस्य for शुष्कान्नस्य.

चैल[1]-चर्मामिषाणां च त्रिरात्रं स्यादभोजनम् ॥
मणि-मुक्ता-प्रवालानां ताम्रस्य रजतस्य च ।
अयः कांस्योपलानां च द्वादशाहं कणाऽन्नता ॥
कार्पास-कीटजोर्णानां द्विशफैकशफस्य[2] च ।
पक्षि-गन्धौषधीनां च रज्ज्वाश्चैव त्र्यहं पयः' ॥[3]
( म. स्मृ. ११. १६२–१६८ )

इति । एतेषां विषयाणां मध्ये धान्यस्य परिमाणविशेषेण व्रतविशेषः स्मृत्यन्तरे ऽभिहितः—

'धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिके वधः[4]' ।

इति । यत्तु जाबालिनोक्तम्—

'तिल-धान्या-ऽन्न-वस्त्राणां शण्यानामामिषस्य[5] च ।
संवत्सरार्धं कुर्वीत व्रतमेतत्समाहितः' ॥

इति तदेतदकामकृत[6]विषयम् । अल्पत्वात् । भक्ष्यस्य तु सकृद्भोजनपर्याप्तिकस्यापहारे[7] पैठीनसिराह—

'भक्ष्य-भोज्यान्नस्योदरपूरणमात्रहरणे
त्रिरात्रं पञ्चगव्याहारः' ।

इति । यानि तु मनूक्तेषु विषयेषु व्रतान्तराण्यन्यैर्मुनिभि-

---

१ J. reads -तैल-, while B. D. I and the text चेल for चैल. २. B. C. D. E G. H. and J read द्विखुरैकखुरस्य for द्विशफैकशफस्य. ३. B. and D. read ऽभ्यधिको and I. ऽभ्यधिक for ऽभ्यधिके, while H. हृतेऽभ्याधिके वध for हरतोऽभ्यधिके वध. ४ B and D read शण्याया for शण्यानाम्. ५ H reads कामकृतविषयम् । अल्पभक्ष्यस्य तु for अकामकृतविषयम् । अल्पत्वात् । भक्ष्यस्य तु । ६ We follow here A and I.; while all others read सकृद्भोजनपर्याप्तादधिकस्यापहारे, but it is quite contrary to the quoted Sûtra.

र्दर्शितानि तेषु व्रतेषु यानि समानि न तत्र विवादः । न्यूनानामकामकारविषयत्वं अधिकानां तु कामकृताभ्यासविषयत्वमिति विवेकः । तत्र वचनानि—

'द्रव्याणामल्पसाराणां सान्तपनम् । (७) भक्ष्य-भोज्य-यान-शय्यासन-मूल-पुष्प-फलानां हरणे पञ्चगव्यपानम् । (८) तृण-काष्ठ-द्रुम-शुष्कान्न-गुड-वस्त्र-चर्मामिषाणां त्रिरात्रमुपवसेत् । (९) मणि-मुक्ता-प्रवालानां ताम्र-रजता-ऽयः-कांस्यानां द्वादशाहं कणानश्नीयात् । (१०) कार्पास-कीटजोर्णाद्यपहरणे त्रिरात्रं पयसा वर्तेत । (११) द्विशफैकशफहरणे त्रिरात्रमुपवसेत् (१२) पक्षि-गन्धौषधि-रज्जु-वैदलानामपहरणे दिनमुपवसेत् । (१३)

दत्त्वैवापहृतं द्रव्यं धनिकस्याभ्युपायतः ।
प्रायश्चित्तं ततः कुर्यात् कल्मषस्यापनुत्तये' ॥ (१४)
( वि. स्मृ. ५२. ७–१४ )

इति । जाबालिः—

'अश्व-गो-भूमि-कन्याश्च हृत्वा चान्द्रायणं चरेत् ।
अपहृत्य पशून् क्षुद्रान् प्राजापत्यं समाचरेत् ॥
गुड-कार्पास-धान्यानि सर्पिर्लवणमेव च ।
पक्वान्नमौषधं तैलं शय्यां वास उपानहौ ॥

---

१. The text and G. read -पान for -यान- and the text omits -हरणे २. G. reads -ताम्र-रजताद्यय -. ३ The text reads अपहरणे for -हरणे. ४. G and H. omit this Sûtra. ५ B and D read यत्रैवोपहृत for दत्त्वैवापहृत ६. The text reads ऽभ्युपायत.

कांस्या-ऽयस्ताम्र-सीसं वा कृच्छ्रं कृच्छ्रार्धमेव च ।
उदके फल-मूलेषु पुष्प-पर्ण-सुगन्धिषु ॥
मृद्भाण्ड-मधु-मांसेषु कृच्छ्रपादो विधीयते ।
*व्यापादनापहारेषु सन्तोष्य स्वामिनं ततः ॥
पापं निवेद्य विप्रेभ्यः प्रायश्चित्तेन युज्यते ।
अपहृत्य तु वर्णानां धनं विप्रः प्रमादतः ॥
प्रायश्चित्तं च यत्प्रोक्तं ब्राह्मणानुमते चरेत् ।
राजस्वस्यापहरणे रमणीनां† जनस्य च ॥
धनापहरणे चैव कुर्यात्संवत्सरव्रतम्' ।

इति। परदारगमनस्य तु प्रायश्चित्तं दशमाध्याये ऽभिहितम् ।

## अयाज्ययाजनप्रायश्चित्तम् ।

अयाज्ययाजने मनुराह—

---

*व्यापादनं तत्तद्द्रव्यनाशः। अपहारो ऽपहरणम्। तत्र प्रथमं तद्द्रव्यस्वामिनं प्रसाद्य अनन्तरं विप्रेभ्यः पापं निवेद्य प्रायश्चित्तमाचरेत्।

†अत्र 'रमणी'शब्देन सामान्यवनिता, वेश्योपलक्षितेति प्रतिभाति। राजद्रव्यवत् वेश्याद्रव्यमपि प्रतिग्रहानर्हमिति मन्वादिभिरुक्तम्। अथवा 'जनस्य रमणीनां' परस्त्रीणा परकीयधनस्य चापहरणे इत्येव व्याख्यातुमुचितं भवेत्।

---

१. B. and D substitute सकृत् for कृच्छ्रं and वा for च २. H. omits फल-मूलेषु, but it seems a mistake, while E. and I. पुष्पवर्ण- for पुष्प-पर्ण-. ३. B and D. read मृद्भाण्डसमस्तेषु for मृद्भाण्ड-मधु-मांसेषु and the next line:—

व्यापादनीयहारेषु सन्तोष्य स्वां तनुं ततः ।
for
व्यापादनापहारेषु सतोष्य स्वामिनं ततः ।.

४. B. D and G. read ब्राह्मणानुमत for ब्राह्मणानुमते ५. C. F G. and H. read राजन्यस्यापहरणे and J राजस्यापहरणे both for राजस्वस्यापहरणे, while A reads मणीना च जनस्य वा for रमणीना जनस्य च.

'व्रात्यानां याजनं कृत्वा परेषामन्त्यकर्म च[1] ।
अभिचारमहीनं[2] च त्रिभिः कृच्छ्रैर्व्यपोहति' ॥
(म. स्मृ. ११. १९७)

इति । यत्तु प्रचेतसा शूद्रयाजकादीननुक्रम्योक्तम्—
'एते* पञ्चतपो-ऽभ्रावकाश[3]-जलशयनाद्यनुष्ठेयुः
क्रमेण ग्रीष्म-वर्षा-हेमन्तेषु । मासं गोमूत्र-
यावकमश्नीयुः' ।

इति तत् कामकृताभ्यासविषयम् । यत्तु यमेनोक्तम्—
'पुरोधाः शूद्रवर्णस्य ब्रह्मणो यः प्रवर्तते ।
स्नेहादर्थप्रसङ्गाद्वा[4] तस्य कृच्छ्रं विशोधनम्'॥
(य. स्मृ. ६. ९)

इति तदशक्तविषयम् । यत्तु गौतमेनोक्तम्—
'निषिद्धमन्त्रप्रयोगे सहस्रानुवाकं जपेत्'[5]।
(गौ. स्मृ. २२. ३३)

---

‡ अत्र मूलपुस्तकोपलब्ध्यभावात्-'ऽभ्रावकाश'-इत्यस्य शुद्ध. पाठो न निश्चेतुं शक्यते । सर्वेष्वप्यादर्शपुस्तकेषु न्यूनाधिक्येनाशुद्धा एव पाठा दृश्यन्ते । वाक्यार्थस्तु—ग्रीष्मे पञ्चतपाः वर्षासु वृष्टिसहः हेमन्ते जलशायी भवेदिति । चतुर्षु दिक्षु चतुरोऽग्नीन् संस्थाप्य तन्मध्ये स्थित्वा पञ्चमं सूर्यतापं सहेत् इति पंचतपाः । जलशयनं च उदके आकण्ठमग्नस्तिष्ठेत् इति संक्षेपः ।

---

१ C F. G. and H. read अन्तकर्म, while J. येषामन्तकस्य च for परेषामन्त्यकर्म च २ B D and H. read अहीनां for अहीन ३. C and F. तपोस्तावकीश- and G -तपोऽभ्रावकीश- for -तपोऽभ्रावकाश-, while I. -तपोभुमौ जलशयनाद्यनुष्ठेयम् for -तपोऽभ्रावकाशजलशयनाद्यनुष्ठेयु ४. G. and J substitute -च for वा ५. text प्रतिषिद्धमन्त्रयोगे सहस्रानुवाकञ्चेत् and, except A., add सति to प्रयोगे.

इति तत् कामतोऽभ्यासविषयम्। यत्तु पैठीनसिनोक्तम्—

'शूद्रेयाजकः[1] सर्वद्रव्यपरित्यागात् पूतो भवति।
प्राणायामसहस्रेषु दशकृत्वोऽभ्यस्तेषु'।

इति तदकामतोऽभ्यासविषयम्। असत्प्रतिग्रहे याज्ञवल्क्य आह—

'गोष्ठे वसन्[2] ब्रह्मचारी मासमेकं पयोव्रतम्।
गायत्रीजाप्यनिरतः शुद्ध्यतेऽसत्प्रतिग्रहात्'॥
(या. स्मृ. ३. २९०)

इति। अत्र जपसङ्ख्या मनुना दर्शिता—

'जपित्वा त्रीणि सावित्र्याः सहस्राणि समाहितः।
मासं गोष्ठे पयः पीत्वा मुच्यतेऽसत्प्रतिग्रहात्'॥
(म. स्मृ. ११. १९४)

इति। एतच्च दातृ-द्रव्ययोरुभयोः[3] सत्त्वे वेदितव्यम्। अन्यतरस्यासत्त्वे तु षट्त्रिंशन्मते दर्शितम्—

'पवित्रेष्ट्या विशुद्ध्यन्ति सर्वे घोराः प्रतिग्रहाः।
ऐन्द्रवेन[4] मृगारेष्ट्या कयाचिन्मित्रविन्दया॥
देव्या लक्षजपेनैव शुद्ध्यन्ते[5]ऽसत्प्रतिग्रहात्'।

इति। यत्तु वृद्ध[6]हारीतवचनम्—

---

१. C. F. G and H read शूद्रस्य याजक for शूद्रयाजक. २. I. reads वसेत् for वसन्, while except A and the text all others पयोव्रतं for पयोव्रत and except A. H. and the text जप्यनिरत for जाप्यनिरतः. ३ B C. D. and F. omit उभयो. ४ I. reads विन्दवेन, but it seems incorrect. ५. I. substitutes शुद्धयते, J. शुद्धयतो for शुद्धयते and B. and D दुष्परिग्रहात् for ऽसत्प्रतिग्रहात् ६. G. reads बृहद्धारीत- for वृद्धहारीत-.

'राज्ञः प्रतिग्रहं कृत्वा मासमप्सु सदा वसेत् ।
षष्ठे काले पयोभक्षः पूर्णे मासे प्रमुच्यते ॥
तर्पयित्वा द्विजान् कामैः सततं नियतव्रतः ।
(वृ. हा. स्मृ. ११.७१–७२)

इति तदापदि कुरुक्षेत्रोपरागादौ कृष्णाजिनादिप्रतिग्रह-विषयम् । अल्पद्रव्यपरिग्रहे हारीतः—

'मणि-वासो-गवादीनां प्रतिग्रहे सावित्र्यष्टसहस्रं जपेत्'।
(हा. स्मृ. २१. ३)

इति । षट्त्रिंशन्मतेऽपि—

'भिक्षामात्रे गृहीते तु पुण्यं मन्त्रमुदीरयेत्' ।

इति । चतुर्विंशतिमतेऽपि[1]—

'प्रतिषिद्धेषु सर्वेषु षष्ठांशं परिकल्पयेत्' ।

इति । दैनार्थमिति शेषः । विकर्मणा जीवने तु चान्द्रायणम् । तथा च नटादीन् विकर्मणा जीविनोऽनुक्रम्य यम आह—

'एतेषामेव सर्वेषां प्रत्यापत्तिस्तु मृग्यताम् ।
भैक्ष्यान्नमुपयुञ्जानो द्विजश्चान्द्रायणं चरेत्' ॥
(य. स्मृ. ६. १३)

इति । नारदोऽपि—

---

१. B. C. F. D. G. and H. do not insert अपि. २. G. reads परिवर्जयेत् for परिकल्पयेत्. ३. E. adds तत् before दानार्थम् ४. I. reads जीवितान् for जीविन . ५. H. reads एतेषां नैव सर्वेषां for एतेषामेव सर्वेषां and गृह्यतां for मृग्यताम्, while I. reads प्रत्यापत्ति for प्रत्यापत्ति . ६. C. F. G. and H. substitute भक्ष्यान्नं for भैक्ष्यान्न and I. उपभुञ्जान for उपयुञ्जान .

'कर्मणा गर्हितेनैव यद्वित्तं समुपार्जितम्।
तस्य त्यागेन शुद्ध्यन्ति धर्मस्यान्वेषणेन वा॥
अप्सु प्रास्येत तद् द्रव्यमन्यायेन यदागतम्।
उपयुक्तानुशिष्टं च देयं वा ब्रह्मवादिने'॥
(ना. स्मृ. १४. ७–८)

इति। क्षत्रियादिवधस्य प्रायश्चित्तं षष्ठाध्याये वर्णितम। गोवधस्य त्वष्टम-नवमाध्याययोस्तत् प्रपञ्चितम्।

## अविक्रेयविक्रयप्रायश्चित्तम्।

अविक्रेयविक्रयस्य चतुर्विंशतिमते दर्शितम्–

सुराया विक्रयं कृत्वा चरेत् सौम्यचतुष्टयम्*।
लाक्षा-लवण-मांसानां चरेच्चान्द्रायणत्रयम्॥
मध्वाज्य-तैल-सोमानां चरेच्चान्द्राणद्वयम्।
पयः पायसापूपानां चरेच्चान्द्रायणव्रतम्॥
दध्याज्येक्षुरसानां च गुड-खण्डादिविक्रये।
सर्वेषां स्नेहपक्वानां पराकं तु समाचरेत्॥

*सोमसम्बन्धित्वादस्य कृच्छ्रस्य सौम्य इत्यभिधानम्। स च चान्द्रायणकृच्छ्रशब्देनान्यत्राभिहितः।

१. H. substitutes च for वा. २. H reads प्रास्येच्च for प्रास्येत. ३ G. omits च, while B. and D. read ब्राह्मणाय च for ब्रह्मवादिने. ४. B. and D. omit -वधस्य; while I. reads क्षत्रियावधस्य for क्षत्रियादिवधस्य ५ All, except A. and I., read अष्टम-नवमाध्याये for अष्टम-नवमाध्याययोः; while G. has mistaken and omits तु. ६. G reads सोम्य- for सौम्य- ७. G. substitutes मध्वाज्येक्षुरसं and E. दध्याज्येक्षुरस both for मध्वाज्येक्षुरसानां.

सिद्धान्नविक्रये विप्रः प्राजापत्यं समाचरेत् ।
उपवासं तु तक्रस्य नक्तं काञ्जिकविक्रये ॥
पूगीफलानि मञ्जिष्ठा द्राक्षा खर्जूरमेव च ।
एतेषां विक्रये कृच्छ्रं पनसस्य दिनत्रयम् ।
कदली नारिकेलं च नागरं बीजपूरकम् ।
एतेषां पादकृच्छ्रः स्याज्जम्बीरादेस्तथैव च ॥
कस्तूरिकादिगन्धानां विक्रये कृच्छ्रमाचरेत् ।
कर्पूरादेस्तदर्धं स्याद्धिंग्वादिविक्रये ॥
तिलानां विक्रयं कृत्वा प्राजापत्यं समाचरेत् ।
यज्ञार्थं कृषिजातांश्च दानलब्धांश्च विक्रयेत् ॥
रक्त-पीतानि वस्त्राणि कृष्णाजिनमथापि वा ।
एतेषां विक्रये कृच्छ्रं गर्गस्य वचनं यथा ॥
गोविक्रयं द्विजः कुर्याल्लाभार्थं धनमोहितः ।
प्राजापत्यं प्रकुर्वीत गजानामैन्दवं स्मृतम् ॥
खरा-ऽश्वा-ऽजाविकानां च करभाणां च विक्रये ।

---

१ B and D read शिष्टान्न- for सिद्धान्न-. २ B. and D read कर्पूरादि. for कर्पूरादे. ३. H. and I. read विक्रये for विक्रयेत्. ४. H. omits the following lines :—

रक्त-पीतानि वस्त्राणि कृष्णाजिनमथापि वा ।
एतेषां विक्रये कृच्छ्रं गर्गस्य वचन यथा ॥
गोविक्रय द्विज कुर्यात् लाभार्थं धनमोहित ।
प्राजापत्यं प्रकुर्वीत गजानामैन्दवं स्मृतम् ॥
खरा-ऽश्वा-ऽजाविकानां च करभाणां च विक्रये ।

५. C. and F. substitute शास्त्राणि for वस्त्राणि, but it does not give any good sense here. ६ Except A. H. and I. all others read -मथैव च for -मथापि वा. ७. I. reads शरभाणां for करभाणां.

पराकं तत्र कुर्वीत नृणां द्विगुणमाचरेत्*॥
नारीणां विक्रयं† कृत्वा चरेच्चान्द्रायणं व्रतम्।
द्विगुणं पुरुषाणां च व्रतमाहुर्मनीषिणः॥
चान्द्रायणं प्रकुर्वीत एकाहं वेदविक्रये।
अङ्गानां तु पराकं स्यात् स्मृतीनां कृच्छ्रमाचरेत्॥
इतिहासपुराणानां चरेत् सान्तपनं द्विजः।
रहस्य-पञ्चरात्राणां कृच्छ्रं तत्र समाचरेत्॥
गाथानां नीतिशास्त्राणां प्राकृतानां तथैव च।
सर्वासामेव विद्यानां पादकृच्छ्रं समाचरेत्‡॥

इति। हारीतोऽपि—

'गुड-तिल-पुष्प-मूल-फल-पक्कान्नविक्रये सौम्यायनम्। लाक्षा-लवण-मधु-मांस-तैल-क्षीरदधि-तक्र-घृत-गन्ध-चर्म-वाससामन्यतमविक्रये

---

* नृणां तत्तज्जातीयपुष्पशूनां विक्रये द्विगुणं पराकद्वयम्।

† मनुष्यजातीयस्त्रीणां विक्रये चान्द्रायणम्। तज्जातीयपुरुषाणां विक्रये पूर्ववदेव चान्द्रायणद्वयम्।

‡ अत्र अङ्गादीनां विक्रयो ऽध्यापनरूपेणैवेति भाति। नतु पुस्तकरूपेण। तथा सति सर्वसामान्यमेव प्रायश्चित्तं वदेत्। किञ्च 'सर्वासामेव विद्यानाम्' इति उपसंहारात् विद्याविक्रय एवात्र विवक्षितः। न पुस्तकविक्रय इति सुधियो विदां कुर्वन्तु।

---

१. All, except A and I others, read शुना for नृणां, while G. substitutes द्विगुणमेव च for द्विगुणमाचरेत्. २ G adds, इति after आचरेत्. ३. B. D. and G read सोमपानम्, C. and F. सोमयानम्, E. H. and J. सामायनम् all for सौम्यायनम्. ४ I omits क्षीर-, while B. and D. read -क्षीर-घृत-गन्ध- क्षौद्र-दधि-तक्र- for दधि-तक्र- घृत- गन्ध-.

इति। वसिष्ठोऽपि—

'पतितसावित्रीक उद्दालकव्रतं चरेत्। (७६) द्वौ मासौ यावकेन वर्तयेत् मासं पयसार्धमासमामिक्षया अष्टरात्रं घृतेन षड्रात्रमयाचितं हविष्यं भुञ्जीत त्रिरात्रमभक्षोऽहोरात्रमुपवसेत्। (७७) अश्वमेधावभृतं वा गच्छेत्। (७८) व्रात्यस्तोमेन वा यजेत'। (७९)

(व. स्मृ. ११. ७६–७९)

इति। तत्र मानवमापद्विषयम्। उद्दालकव्रतं त्वनापद्विषयम्। यत्तु यमेनोक्तम्—

'सावित्री पतिता यस्य दशवर्षाणि पञ्च च।
सशिखं वपनं कृत्वा व्रतं कुर्यात् समाहितः॥
एकविंशतिरात्रं च पिबेत्प्रसृतियावकम्।
हविषा भोजयेच्चैव ब्राह्मणान् सप्तपञ्च* च॥
ततो यावकगुद्धस्य तस्योपनयनं स्मृतम्'।

(य. स्मृ. ९. २७–२९)

इति तन् मनुसमानविषयम्। यस्य पित्रादयोऽप्यनुपनीताः तस्यापस्तम्बोक्तं द्रष्टव्यम्—

'अथ[2] यस्य पिता पितामह इत्यनुपेतौ[3] स्यातां ते ब्रह्महसंस्तुताः। (३२) तेषामभ्यागमनं भोजनं

---

* यदि चकारो विकल्पार्थो भवेत्तर्हि सप्त पञ्च वेति स्यात्। अन्यथा सप्तसहितपञ्चाशद्ब्राह्मणान् भोजयेदिति स्यात्।

---

१ All, except A. and I, omit द्रष्टव्यम् २ Except A. and the text all others omit अथ ३ B. C. D. E F G. H. and J read -पितामहश्चानुपनीतौ, while I. पितामह इत्यनुपनीतौ for पिता पितामह इत्यनुपेतौ.

विवाहमिति च वर्जयेत्। (३३) तेषामिच्छतां प्रायश्चित्तम्। (३४) यथा प्रथमेऽतिक्रमे ऋतुरेवं संवत्सरः। (३५) अथोपनयनम्। (३६) ततः संवत्सरमुदकोपस्पर्शनम्। (३७) प्रतिपूरुषं सङ्ख्याय संवत्सरान् यावन्तोऽनुपेताः स्युः। (१) सप्तभिः पावमानीभिः 'यदन्ति यच्च दूरक' इत्येताभिर्यजुःपवित्रेण सामपवित्रेणाङ्गिरसेनेति। (२) अथ वा व्याहृतिभिरेव। (३) अथाऽध्याप्यः। (४) अथ यस्य प्रपितामहादेर्नानुस्मर्यत उपनयनं ते इमशानसंस्तुताः। (५) तेषामभ्यागमनं भोजनं विवाहमिति च वर्जयेत्। (६) तेषामिच्छतां प्रायश्चित्तम्। (७) द्वादश-

---

१. Except A. I. and the text all others omit the following.—

ब्रह्मन्नसंस्तुता। तेषामभ्यागमनं भोजन विवाहमिति च वर्जयेत्। (३३) तेषामिच्छतां प्रायश्चित्तम् (३४॥) यथा प्रथमेऽतिक्रमे ऋतुरेव सवत्सर। (३५) अथोपनयनम्। (३६) तत. सवत्सरमुदकोपस्पर्शनम्। (३७) प्रतिपूरुष सख्याय सवत्सरान्यावन्ताऽनुपेता. स्यु॥ (१)॥ सप्तभि पावमानीभि' 'यदन्ति यच्च दूरक' इत्येताभिर्यजु पवित्रेण सामपवित्रेणाङ्गिरसेनेति। (२) अथवा व्याहृतिभिरेव। (३) अथाध्याप्य। (४) अथ यस्य प्रपितामहोर्नानुस्मर्यत उपनयन ते इमशानसंस्तुता। (५) तेषामभ्यागमन भोजनं विवाहमिति च वर्जयेत्। (६) तेषामिच्छतां प्रायश्चित्तम्।(७) द्वादशवर्षाणि त्रैविद्यक ब्रह्मचर्यं चरेदथोपनयन तत उदकोपस्पर्शन। पावमान्यादिभि'। (८),

and read for the above Sûtras —

तस्य वत्सर त्रैविद्यकं ब्रह्मचर्यं यस्य
प्रपितामहादेर्नानुस्मर्यत उपनयन तस्य
द्वादशवर्षाणि त्रैविद्यक ब्रह्मचर्यम्

while I. reads ब्रह्मन्नसंस्तुत. २. I does not insert च. ३. The text does not separate this Sûtra and omits सवत्सर. ४. The text substitutes अपि वा for अथ वा. ५. I. omits अथ. ६. The text reads -प्रपितामहादि for -प्रपितामहादे. ७. I. does not insert च.

वर्षाणि त्रैविद्यकं ब्रह्मचर्यं चरेदथोपनयनं तत उदकोपस्पर्शनम्। पावमान्यादिभिः'।

(आ. ध. सू. १. १. १. ३२–३७. २. १–८)

इति।

भृतकाध्ययनाध्यापनप्रायश्चित्तम्।

भृतकाध्ययनाध्यापनयोर्हारीत आह–

'भृतकाध्यापनं कुर्वन्[2] भृतकाध्यापितश्च यः।
अनुयोगप्रदानेन त्रीन् पक्षांस्तु पयः पिबेत्[3]'॥

इति। द्रुमादिहिंसायां मनुराह–

'फलदानां तु वृक्षाणां छेदने जप्यमृक्शतम्।
गुल्म-वल्ली-लतानां च पुष्पितानां च वीरुधाम्॥
कृष्टजानामौषधीनां जातानां च स्वयं वने।
वृथाऽऽलम्भेऽनुगच्छेद्गां दिनमेकं पयोव्रतम्[4]'॥

(म. स्मृ. ११. १४२–१४४)

इति। एतच्च यज्ञार्थवृक्षच्छेदनादिव्यतिरिक्तविषयम्। अत एव याज्ञवल्क्योऽपि वृथेति विशिनष्टि–

'वृक्ष-गुल्म-लता-वीरुच्छेदने जप्यमृक्शतम्।
स्यादोषधिवृथाच्छेदी[6] क्षीराशी गोऽनुगो दिनम्[7]'॥

(या. स्मृ. ३. २७६)

---

१. I. omits पावमान्यादिभि and separates one Sûtra into three. २ Except A and J. all others read कृत्वा for कुर्वन्. ३ G reads पिबन् for पिबेत्. ४. E and the text read पयोव्रत. ५. G. reads याज्ञवल्क्येनोक्तम्; while all others except I. वृथाच्छेदीति for वृथेति. ६ The text reads -छेदने for -छेदी ७ C. F. read हितम् for दिनम्.

इति । यत्तु हारीतेनोक्तम्—

'स्थावर-सरीसृपादीनां वधे यस्येदं प्राणमित्ये-
तयाऽज्यं हुत्वा[1] तिलपात्रं ब्राह्मणाय दद्यात्' ।
( हा. स्मृ. २१. ४९ )

इति तदश्वत्थादिपुण्यस्थावरविषयम् । महाफलप्रदस्य पनस-नारीकेलादिवृक्षजातस्य च्छेदनावृत्तौ शङ्ख आह—

'संवत्सरव्रतं कुर्याच्छित्वा वृक्षं फलप्रदम्[2]' ।
( शं स्मृ. १७. ४९ )

इति । दृष्टार्थत्वे न दोषः* ।

'फल-पुष्पोपगान् पादपान्[3] न हिंस्यात् ।
कर्षणकार्यार्थमुपहन्यात्' ।

इति स्मरणात्[4] ।

**अथ नास्तिक्यप्रायश्चित्तम् ।**

नास्तिक्यं तु वाचिकं[5] चेत्तदुपपातकम् । यथाऽऽहुः पौराणिकाः—

'नास्तिकाः त्रिविधाः प्रोक्ता धर्मज्ञैस्तत्त्वदर्शिभिः ।
क्रियादुष्टो मनोदुष्टो वाग्दुष्टश्च तथैव च ॥

---

*अपवादोऽयम् । यद्यपि फलदवृक्षच्छेदने दोषः पूर्वमुक्तः तथापि छेदने यदि दृष्टार्थत्वं दृष्टप्रयोजनत्वं स्यात् तदा न दोषः, तत्र प्रमाणमाह । फल-पुष्पोपगानिति ।

---

१. G. reads जुहुयात् for हुत्वा २ The text reads पिप्पलपादपम् for वृक्षं फलप्रदम् ३ H. reads पादपान्कर्षणकार्यार्थमुपहन्यात् for पादपान्न हिंस्यात् कर्षणकार्यार्थमुपहन्यात्' । ४ All others, except I., omit स्मरणात् ५ I. reads वाचनिक for वाचिकं

[1]उपपातकस्तु क्रियादुष्टो वाग्दुष्टः पातकः स्मृतः।
अभ्यासात्तु क्रियादुष्टो महापातक इष्यते' ॥
इति। तत्रोपपातकनास्तिक्ये वसिष्ठ आह—

'नास्तिकः कृच्छ्रं द्वादशरात्रं चरित्वा
विरमेन्नास्तिक्यात्'।
(व. स्मृ. २१. २९)

इति। यत्तु शङ्खेनोक्तम्—

'नास्तिको नास्तिकवृत्तिः कृतघ्नः कूटव्यवहारी मिथ्याभिशंसीत्येते पञ्च, संवत्सरं ब्राह्मणगृहे भैक्षं चरेयुः'।
इति [2]तदेतत् महापातकनास्तिक्यविषयम्।

व्रतलोपप्रायश्चित्तम्।

व्रतलोपिनो [3]ऽवकीर्णिव्रतं याज्ञवल्क्य आह—

'अवकीर्णी भवेद्[4]वत्वाँ ब्रह्मचारी तु योषितम्।
गर्दभं पशुमालभ्य नैर्ऋतं स विशुद्ध्यति'॥
(या. स्मृ. ३. २८०)

इति। मनुरपि—

'अवकीर्णी तु काणेन गर्दभेन चतुष्पथे।
स्थालीपाकविधानेन यजेत निर्ऋतिं निशि॥ (११८)

---

१ I. reads उपपातकी तु वाग्दुष्टो मनोदुष्टोऽनुपातकी for उपपातकस्तु क्रियादुष्टो वाग्दुष्ट पातक स्मृत and G. reads उपपातमनोदुष्टो वाग्दुष्ट पातक स्मृत for the same. २ B and D. read तदेतत्पातक नास्तिक्यविषयम् and C. E F. G H and J तदेतत्पातकनास्तिक्यविषयम्, the latter seems to be incorrect and the first does not give proper sense ३. B. and D. read ऽवकीर्णिनो व्रत, C. F. J. ऽवकीर्णं व्रतं and G. and H. ऽवकीर्णव्रत all for ऽवकीर्णिव्रत ४. H. reads हत्वा for गत्वा ५ The text reads पाकयज्ञविधानेन for स्थालीपाकविधानेन.

हुत्वाग्निं विधिवद्धोममन्ततश्च सम्मेत्यृचा[+] ।
वातेन्द्र-गुरु-वह्नीनां जुहुयात् सर्पिराऽऽहुतीः ॥ (११९)
एतस्मिन्नेनसि प्राप्ते वसित्वा गर्दभाजिनम् ।
सप्तागारान् चरेद्भैक्ष्यं स्वकर्म परिकीर्तयन् ॥ (१२०)
तेभ्यो लब्धेन भैक्षेण वर्तयन्नेककालिकम् ।
उपस्पृशंस्त्रिषवणमब्देन स विशुद्ध्यति' ॥
(म. स्मृ. ११. ११८–१२३)

इति । वसिष्ठोऽपि–

'ब्रह्मचारी चेत् स्त्रियमुपेयादरण्ये चतुष्पथे
लौकिकेऽग्नौ रक्षोदैवतं गर्दभं पशुमालभते ।
(१) नैर्ऋतं वा चरुं निर्वपेत् । (२)

---

*' काणः ' इत्ययं विशेषोऽत्र द्रष्टव्यः । नैर्ऋतदैवतैर्मन्त्रैः प्रधान-देवतायै वपादिहोमान् हुत्वा तदन्ते—

'सम्मा सिञ्चन्तु मरुतः समिन्द्रः सम्बृहस्पतिः ।
सञ्चायमग्निः सिञ्चतु प्रजया च धनेन च' ॥

इत्येतेन मन्त्रेण मारुतेन्द्र-बृहस्पत्यग्नीनां घृतेनाहुतीर्जुहुयात् । केषु-चित्पुस्तकेषु समाभिचतीति पाठः । केषुचिच्च शमित्यृचेति पाठः । तत्र शममिरमिरिति ऋक् ग्राह्या स्यात् । वस्तुतस्तु इदमप्रामाणिकमिति प्रतिभाति । विज्ञानेश्वरस्तु—

'समायमद्भि सिञ्चन्तां यशसा ब्रह्मवर्चसेन'

इति पठति तदपि चिन्त्यम् ।

---

१ All others, except A. I. and the text, read होमान् for होम २. B. C D. E. F. and I. read समि-त्यृचा, E. G. H and J शमित्यृचा both for सम्मेत्यृचा. ३. C. D E F. G. and J. read वायु- for वात ४. G. reads सप्तागारे for सप्तागारान् ५. The text adds तु after त्रिषवण ६. The text reads आलभेत् for आलभेत.

तस्य जुहुयात्—कामाय स्वाहा, कामकामाय स्वाहा, निर्ऋतये स्वाहा। रक्षो देवताभ्यः स्वाहा'। (३)

(व. स्मृ. २३. १–३)

इति। तत्र श्रोत्रियस्य पशुरश्रोत्रियस्य चरुरिति द्रष्टव्यम्। शङ्खस्तु[4] वर्णभेदेन व्रतविशेषमाह—

'गुप्तायां वैश्यायामवकीर्णः[5] संवत्सरं त्रिषवणमनुतिष्ठेत् क्षत्रियायां द्वे वर्षे। ब्राह्मण्यां त्रीणि वर्षाणि*'।

इति। यदप्यङ्गिरसोक्तम्—

'अवकीर्णिनिमित्तं[6] तु ब्रह्महत्याव्रतं चरेत्। चीरवासास्तु षण्मासान्[7] तथा मुच्येन किल्बिषात्'॥

इति तदीषद्व्यभिचारिणीविषयम्। अत्यन्तव्यभिचारिणीषु[8] पुनः शङ्ख आह—

---

*या स्त्री वैवाहिके पत्यौ मृते जीवति वा तमुत्सृज्य वञ्चयित्वा वान्यमेकमेवाश्रयेत्। नतु कुलटा भवेत् सा गुप्तेत्यभिधीयते। तादृशवैश्यजातीयस्त्रियामवकीर्णः क्षत्रियाब्राह्मण्योश्चावकीर्णः उक्तं प्रायश्चित्तमाचरेदित्यन्वयः।

---

१. All, except I and the text, add तत्र before तस्य २ B. D. G. and J. omit कामकामाय स्वाहा, while except A. B. D. and the text omit निर्ऋतये स्वाहा and B D and the text read नैर्ऋत्यै for निर्ऋतये. ३ B. C. and D. F. omit पशु अश्रोत्रियस्य. The Vijñâneśwara quotes following Sûtras under the name of Sankha-Likhitan and it may be possible. ४ I. reads अवकीर्णी for अवकीर्ण. ५. Except A. C. F. G. I all others read षण्मासात् ६. B. D and G read तदेतत् for तदीषत् ७ B and D. read अत्यन्तव्यभिचारितायां and C. F. G. H. and J. अत्यन्तव्यभिचारितासु all for अत्यन्तव्यभिचारिणीषु

'स्वैरिण्यां ब्राह्मण्यामवकीर्णः षड्रात्रमुपोषितो गां दद्यात्। क्षत्रियायामुपोषितस्त्रिरात्रं घृतपात्रं दद्यात्। वैश्यायां चतुर्थकालाहारो ब्राह्मणान् भोजयित्वा यवसभारं च[2] गोभ्यो दद्यात्। वृषल्यामवकीर्णः सचैलस्नात उदकुम्भं ब्राह्मणाय दद्यात्। गोष्ववकीर्णः प्राजापत्यं चरेत्। रण्डायामवकीर्णः पलालभारं सीसमाषं च दद्यात्'[3]।

इति। अत्र च

'ब्राह्मणस्यार्धं क्षत्रियस्य[4]'

इति न्यायो नास्ति किन्तु समानमेव त्रयाणां वर्णानाम्। तदाह शाण्डिल्यः—

'अवकीर्णी द्विजो राजा वैश्यश्चापि खरेण तु।
इष्ट्वा भैक्षाशिनो नित्यं शुद्ध्यन्त्यब्दात् समाहिताः'॥

इति। अभ्यासे कण्व आह—

'प्रथमे दिवसे रात्राववकीर्णी गर्दभेन तु।
यजेदेवं यथाभ्यासमब्देनैकेन शुद्ध्यति'[7]॥

---

१. Except A. and I all others omit घृतपात्र दद्यात्. २ B and D. omit च ३ We follow here A. and I., while all others read षण्डायां for रण्डायां and G सपलालभार for पलालभार Vijñāneśwara also reads षण्डायां ४. I. reads क्षत्रियस्य for क्षत्रिये ५. G. substitutes तथा for तत् ६ G. reads अवकीर्णा for अवकीर्णी ७. We are unable to find out the proper reading of this quotation. B C. D E F. G. H. and J. read प्रथमे दिवसे शत्रावकीर्णी गर्दभेन तु यजेतु। एव यथाऽभ्यासमब्देनैकेन शुद्ध्यति॥, while G omits तु and I reads अप्रर्थमे दिवसे रात्रावकीर्णी गर्दभेन यजेत्। यो यथाक्रुरुतेऽभ्यासमब्देनैकेन शुद्ध्यति॥.

इति। तत्र विशेषमाह गौतमः—

'तस्याजिनमूर्ध्ववालं परिधाय लोहितपात्रेः
सप्त गृहान् भैक्षं चरेत् कर्माचक्षाणः'।
(गौ. स्मृ. २४. १६)

इति। अवकीर्णिलक्षणमाह जातूकर्ण्यः—

'स्कन्दितं व्रतिना रेतो येन स्याद्ब्रह्मचारिणा।
कामतोऽकामतः प्राहुरवकीर्णीति तं बुधाः'॥

इति। यति-वनस्थयोस्त्वधिकं व्रतमाह शाण्डिल्यः—

'वानप्रस्थो यतिश्चैव स्कन्दने सति कामतः।
पराकत्रयसंयुक्तमवकीर्णिव्रतं चरेत्' ॥

इति। यतेः पुनर्गार्हस्थ्यस्वीकारे संवर्त आह—

'संन्यस्य दुर्मतिः कश्चित् प्रेत्यापत्तिं व्रजेद्यदि।
स कुर्यात् कृच्छ्रमश्रान्तः षण्मासान् प्रत्यनन्तरम्' ॥
(सं. स्मृ. १९९)

---

१ G. I and J. read लोहितपात्र for लोहितपात्र. २ C. D. F. G. and H substitute खण्डित for स्कन्दित, while I खण्डितव्रतिना for स्कन्दित व्रतिना ३. C and F. omit यति- ४ Except A. and J., all others substitute खण्डणे for स्कन्दने ५ B and D omit the following —

'संन्यस्य दुर्मति कश्चित्प्रत्यापत्तिं व्रजेद्यदि।
स कुर्यात्कृच्छ्रमश्रान्त षण्मासान् प्रत्यनन्तरम्' ॥

इति। वृद्धपराशरोऽपि—

'य प्रत्यवसितो विप्र प्रव्रज्यातो विनिर्गत।
अनाश्रमनिवृत्तश्च गार्हस्थ्यं च चिकीर्षति ॥
चरेत् षाण्मासिक कृच्छ्र नियतात्मा समाहित।
चरेत् त्रीणि च कृच्छ्राणि त्रीणि चान्द्रायणानि च ॥

६. H. reads प्रत्याद्यत्य for प्रत्यापत्तिं and the text reads —

- - - - - - - अपत्यार्थं स्त्रिय व्रजेत।
स कुर्यात् कृच्छ्रमश्रान्त षण्मासान्तदनन्तरम्' ॥,

while I reads प्रत्यह व्रतम् for प्रत्यनन्तरम्

इति । वृद्धपराशरोऽपि[1]—

'यः प्रत्यवसितो विप्रः प्रव्रज्यातो विनिर्गतः ।
अनाश्रकनिवृत्तश्च गार्हस्थ्यं च चिकीर्षति ॥
चरेत् षाण्मासिकं कृच्छ्रं नियतात्मा समाहितः ।
चरेत्त्रीणि च[2] कृच्छ्राणि त्रीणि चान्द्रायणानि च ॥
जातकर्मादिभिः सर्वैः संस्कृतः शुद्धिमाप्नुयात्' ।

इति । तत्र ब्राह्मणस्य षाण्मासिककृच्छ्रः । क्षत्रियस्य चान्द्रायणत्रयम् । वैश्यस्य कृच्छ्रत्रयमिति व्यवस्था । अत्र षाण्मासिकादिव्रतत्रयं ब्राह्मणस्यैव सकृदभ्यासाद्यपेक्षया व्यवस्थापनीयमित्यन्ये[3] । व्रतान्तरलोपेऽप्यवकीर्णिव्रतमतिदिशति मनुः—

'अकृत्वा भैक्षचरणमसमिद्ध्य च पावकम् ।
अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत्' ॥
( म. स्मृ. २. १८७ )

---

* विज्ञानेश्वरस्तु—'ब्राह्मणस्यैव शक्ति-सकृदभ्यासाद्यपेक्षया व्यवस्थितं प्रायश्चित्तं द्रष्टव्यम्'— इत्याह ।

---

१. C and F. read तत्पराशरोऽपि. The Vijñâneśvara quotes this following line under the name of Parâśara (*vide* 3 280 Com ) not Vridh Parâśara, but these lines do not occur in the text of Parâśara २ Vijñâneśvara substitutes चेत् for च Except I , all others omit this line —

चरेत्षाण्मासिक कृच्छ्र नियतात्मा समाहितः ।,

but the author Vijñâneśvara explains this line ३ A reads स चेत् त्रीणि. कृच्छ्राणि for चरेत्त्रीणि च कृच्छ्राणि. ४ All others, except A. and I , read व्यवस्थापनीयम् and omit इत्यन्ये

इति। यत्तु याज्ञवल्क्य आह—

'भैक्षाग्निकार्ये त्यक्त्वा तु* सप्तरात्रमनातुरः।
कामावकीर्ण इत्याभ्यां जुहुयादाहुतिद्वयम्॥
उपस्थानं ततः कुर्यात् सम्मासिञ्चेत्वनेन तु'।
(या. स्मृ. ३. २८१–२८२)

इति। होममन्त्रौ तु—

'कामावकीर्णोऽस्म्यवकीर्णोऽस्मि काम-
कामाय स्वाहा। कामावपन्नोऽस्म्यवपन्नो-
ऽस्मि कामकामाय स्वाहेति'।
(गौ. स्मृ. २९. ९–१०)

इति। एतच्च गुरुशुश्रूषादिकार्यव्यग्रतयाऽकरणे द्रष्टव्यम्॥

## सुतादिविक्रयप्रायश्चित्तम्।

सुतादिविक्रये उपपातकसाधारणोक्तं प्रायश्चित्तं योज्यम्। यत्तु शङ्खेनोक्तम्—

'देव-गृह-प्रतिश्रयोद्यानाऽऽराम-सभा-प्रपा-तटाक-
पुण्य-सेतु-सुतविक्रयं कृत्वा तप्तकृच्छ्रं चरेत्'।

---

*'अनातुरः' व्याधिरहितो ब्रह्मचारी। †'सम्मासिञ्चतु' इति मन्त्रः।

---

१. B. D. G. and J. read समाप्तिं च त्वनेन तु for सम्मासिञ्चत्त्वनेन तु, while I. is quite mistaken here. २ G. reads कामकीर्णोऽस्मि कामकामाय स्वाहा for कामावकीर्णोऽस्म्यवकीर्णोऽस्मि कामकामाय स्वाहा ३ I and the text read कामाभिदुग्धोऽस्म्यभिदुग्धोऽस्मि, but neither our manuscripts nor Vijñâneśvara follow this reading.

इति यच्च वृद्धपराशरेणोक्तम्—

'विक्रीय कन्यकां गां च कृच्छ्रं सान्तपनं चरेत्'।

इति तदापद्यकामतो द्रष्टव्यम्। यत्तु चतुर्विंशतिमतेऽभिहितम्—

'नारीणां विक्रयं कृत्वा चरेच्चान्द्रायणव्रतम्।
द्विगुणं पुरुषस्यैव व्रतमाहुर्मनीषिणः'॥

इति तत्तत्रैव कामतो द्रष्टव्यम्। यत्तु पैठीनसिराह—

'आराम-तटाकोदपान-पुष्करिणी-सुकृत-सुत-
विक्रये त्रिषवणस्नाय्यधःशायी ब्रह्मचारी
चतुर्थकालाहारः संवत्सरेण पूतो भवति'।

इति तदभ्यासविषयम्॥

## कन्यादूषणप्रायश्चित्तम्।

कन्यादूषणे उपपातकसाधारणप्रायश्चित्तं विज्ञेयम्। यत्तु शङ्ख आह—

'कन्यादूषी सोमविक्रयी च कृच्छ्रार्धं चरेयाताम्'।

---

१. B. and D. omit the following—

- - - - - - कृच्छ्रं सान्तपनं चरेत्'।

इति तदापद्यकामतो द्रष्टव्यम्। यत्तु चतुर्विंशतिमतेऽभिहितम्—
'नारीणां विक्रय कृत्वा चरेच्चान्द्रायणव्रतम्।
द्विगुण पुरुषस्यैव - - - - - - - -'॥

and H. omits the following —

यत्तु चतुर्विंशतिमतेऽभिहितम्—
'नारीणां विक्रय कृत्वा चरेच्चान्द्रायणव्रतम्।
द्विगुण पुरुषस्यैव व्रतमाहुर्मनीषिण'॥
इति तत्तत्रैव कामतो द्रष्टव्यम्।

२ G C. F. and J omit तत् before तत्रैव. ३ C. F do not insert -सुत. ४ B. D. and G read कृच्छ्रार्धं for कृच्छ्राब्दं.

इति यच्च हारीतः—

'कन्यादूषी[1] सोमविक्रयी वृषलीपतिः कौमार-दारत्यागी सुरा-मद्यपः शूद्रयाजको गुरोः प्रतिहन्ता नास्तिको[2] नास्तिकवृत्तिः कृतघ्नः कूटव्यवहारी ब्रह्मघ्नो मित्रघ्नो मिथ्याऽभिशंसी पतितसंव्यवहारी मित्रध्रुक् शरणागतघाती प्रतिरूपकवृत्तिरित्येते[3] पञ्चतपोऽभावकाशजल-शयनाद्यनुतिष्ठेयुर्ग्रीष्म-वर्षा-हेमन्तेषु। मासं गोमूत्रयावकमश्नीयुः'।

(हा. स्मृ. २. ४-९)

इति तत् प्रातिलौम्येन कन्यादूषणे द्रष्टव्यम्॥

## अथ द्यूतादिव्यसनप्रायश्चित्तम्।

द्यूतादिव्यसनेष्वप्युपपातकसाधारणोक्तं प्रायश्चित्तं योज्यम्। यत्तु बौधायनः संवत्सरव्रतमाह—

'अथाशुचिकराणि। (१९) द्यूतमभिचारोऽनाहिताग्नेरुञ्छवृत्तिता समावृत्तस्य भैक्ष-चर्या तस्य[4] चैव गुरुकुले वास ऊर्ध्वं चतुर्भ्यो

---

१. B D. and H. read कन्याविदूषी and G. reads कन्याविक्रयी for कन्यादूषी २. J. does not insert नास्तिको ३ Except I, all others read ब्राह्मण-मित्रघ्नो for ब्रह्मघ्नो मित्रघ्नो, C. and F. add प्रायश्चित्त विज्ञेयम्। यत्तु शङ्ख आह कन्यादूषी सोमगतघाती प्रतिरूपकवृत्तिः &c, after शरणा-. ४. All others, except A E H. and I, read प्रतिरूपकावृत्ति· for प्रति-रूपकवृत्ति. ५. I. reads पञ्चतपोभू-जल-शयनाद्यनुतिष्ठेयु for पंचतपो-भावकाशजलशयनाद्यनुतिष्ठेयु. ६. B. and D. read वदयं, C F आनदयं च, G. वदय च, H. E. and I. आनाश च and J. वस्य च all for तस्य चैव·

मासेभ्यो येश्च तमध्यापयति । नक्षत्रनिर्देशनं चेति । तेषां तु निर्वेशः (१६) द्वादश मासान् द्वादशार्धमासान् द्वादश द्वादशाहान् द्वादश-षडहान् द्वादश त्र्यहान् द्वादशाहं षडहं त्र्यह-मेकाहमिति अशुचिकरनिर्वेशः' । (१७)

( बौ. स्मृ. २. १. २. १५–१७ )

इति तदभ्यासविषयम् । यदर्थ्याह प्रचेताः–

अनृतवाक् तस्करो राजभृत्यो वृक्षारोपकवृत्ति-र्गरदोऽग्निदश्च रथ-गजारोहणवृत्तिः रङ्गोपजीवी कूटपणिकः गूढोपाध्यायो वृषलीपतिर्भाण्डको नक्षत्रोपजीवी श्ववृत्तिर्ब्रह्मजीवी चिकित्सको देवलकः पुरोहितः कितवो मद्यपः कूटकारको-ऽपत्यविक्रयी मनुष्य-पशुविक्रेता चेति । तानु-द्धरेत् समेत्य न्यायतो ब्राह्मणो व्यवस्थया सर्व-द्रव्यत्यागे चतुर्थकालाहाराः संवत्सरं त्रिषवण-

---

१. I. reads -यश्चिरमध्यापन and the text तस्य चाध्यापन for यश्च तमध्याप-यति, while G. adds अभि for अध्यापयति २. The text reads नक्षत्रनिर्देशः for नक्षत्रनिर्देशन ३ We follow here A and the text, while all others omit तेषां तु निर्वेशः. ४. G omits द्वादशार्धमासान् द्वादश. ९. G. reads षट्-द्वादश-त्र्यहान् for द्वादश षडहान् द्वादश त्र्यहान् ६ Except A and the text, all others omit द्वादशाह षडहं. ७. The text reads यथाकर्मा-भ्यास for अशुचिकरनिर्वेश. ८. G omits अपि. ९ B. D. and G. omit गरदोऽग्निदश्च रथ-गजारोहणवृत्ति, while, except A, all others read श्वगणिकः. १०. B D. and H omit श्ववृतिर्ब्रह्मजीवी. ११ G. substitutes वा for च. १२. C. F. and G. read सर्वत्यागे for सर्वद्रव्यत्यागे.

मुपस्पृशेयुः। तस्यान्ते देव-पितृतर्पणं गवाह्निकं चेत्येवं व्यवहार्याः'*।

इति तदभ्यासविषयम्॥

### अनाश्रमवासे प्रायश्चित्तम्।

अनाश्रमवासे हारीतेन प्रायश्चित्तमुक्तम्—

'अनाश्रमी संवत्सरं प्राजापत्यं कृच्छ्रं चरित्वा-ऽऽश्रममुपेयात्। द्वितीयेऽतिकृच्छ्रं तृतीये कृच्छ्रातिकृच्छ्रमत ऊर्ध्वं चान्द्रायणम्'॥

इति।

### शूद्रसेवाप्रायश्चित्तम्।

शूद्रसेवायां बौधायन आह—

'समुद्रसंयानम्(२) ब्राह्मणन्यासापहरणम् (३) सर्वापण्यैर्व्यवहरणम्। (५)भूम्यनृतम्। (४) शूद्रसेवनं च। (६) शूद्राभिजननम्। (७) तदपत्यत्वं च। (८) तेषां च निर्वेशः। (९)

---

* सर्वा अपीमावृत्तयो गर्ह्या ब्राह्मणादित्रैवर्णिकानामेव। अत एव प्रायश्चित्तमपि तेषामेव। न तु येषा पारम्पर्यक्रमेणागता वृक्षारोपणाद्या वृत्तयः। तत्र अनृतवाक् तस्करः गरदोऽग्निदश्च सर्ववर्णसाधारणाः। ब्रह्मजीव्यादयो द्विजा एव।

---

१. G reads चाह्निकं for गवाह्निक. २ H reads अतिकृच्छ्रातिकृच्छ्र for कृच्छ्रातिकृच्छ्र ३. B. and D. read सशूद्रयानम्, C. and F अशूद्रयानम् and E G H. and J read समुद्रयानम् all for समुद्रसंयानम्, while I reads समुद्रयाने। ब्राह्मणन्यासापहरणे। सर्वापण्यैर्व्यवहरणे। भूम्यनृते। ४. Th text reads ब्राह्मणस्वन्यासापहरणम् ५ The text interchanges these two Sûtras ६ Except A and I., all others read शूद्रसेवायां च। शूद्रायामभिजायते तदपत्य च भवति for शूद्रसेवनम्। शूद्राभिजननम। तदपत्यत्वं च।, while G omits च after सेवाया ७ The text reads एषामन्यसमत-मस्कृत्वा for तेषाच निर्वेश.

चतुर्थकाले मितभोजिनः स्युरपोऽभ्युपेयुः सवनानुकल्पम् । स्थानासनाभ्यां विहरन्त एते त्रिभिर्वर्षैस्तदपहन्ति पापम्' । ( १० )
( बौ. स्मृ. २. १. २. २–१० )

इति तद् बहुकालाभ्यासविषयम् ॥

**जातिभ्रंशकरपापप्रायश्चित्तम् ।**

उपपातकानन्तरं जातिभ्रंशकराणि विष्णुनाऽनुक्रान्तानि ।

'ब्राह्मणस्य रुजःकरणम् । (१) अग्रेयंमद्ययोर्घ्रातिः । (२) ज्यैह्यं पशुषु मैथुनाचरणं पुंसि च । (३) इति जातिभ्रंशकराणि' ।

इति । तेषु साधारणं प्रायश्चित्तं मनु-विष्णू आहतुः--

'जातिभ्रंशकरं कर्म कृत्वान्यतममिच्छया ।
चरेत्सान्तपनं कृच्छ्रं प्राजापत्यमनिच्छया' ॥
( म. स्मृ. ११. १२४; वि. स्मृ. ३८. ७ )

इति । तत्र ब्राह्मणस्य रुजःकरणे प्रायश्चित्तमेकादशाध्या-

---

१ I. reads चतुर्थकाल मितभोजनाः and the text चतुर्थकालामित्रभोजिन both for चतुर्थकाले मितभोजिन २ E reads सवनानुकल्पे, B. and D, सवनानुकूल्यम् for सवनानुकल्पम् ३ B. C D. E F. G. H and J. read तदपहरन्ति and the text तदपन्नन्ति for तदपहन्ति. ४. C. E F G. H. and J read अपेय- for अग्रेय-, while G. omits the following portion —

-र्घ्राति जैह्य पशुषु मैथुनाचरण पुसि च। इति जातिभ्रशकराणि'।
इति । तेषु साधारण प्रायश्चित्त मनु-विष्णू आहतु —
'जातिभ्रशकर कर्म कृत्वान्यतममिच्छया ।
चरेत्सान्तपन कृच्छ्र प्राजापत्यमनिच्छया' ॥
इति । तत्र ब्राह्मणस्य रुज करणे.

५ I. reads ज्यैह्य for जैह्यं, but it seems quite wrong ६ Except the text, all others omit पुसि. ७ The Vishnû reads कुर्यात् for चरेत्. ८. I. reads अत्र for तत्र.

ये (९२–९३ श्लोकाभ्याम्) अभिहितम्। पशु-
मैथुने तु दशमाध्याये (१३ श्लोके) अभिहितम्॥

सङ्करीकरणपापप्रायश्चित्तम्।

जातिभ्रंशकरानन्तरं सङ्करीकरणान्यनुक्रान्तवान् विष्णुः—

'ग्राम्यारण्यानां पशूनां हिंसा सङ्करीकरणम्'।

(वि. स्मृ. ३९. १)

इति। तत्र साधारणं प्रायश्चित्तं स एवाह—

'सङ्करीकरणं कृत्वा मासमश्नीत यावकम्।
कृच्छ्रातिकृच्छ्रमथ वा प्रायश्चित्तं तु कारयेत्'॥

(वि. स्मृ. ३९. २)

इति। प्रतिपदं तु षष्ठाध्याये (२–१५श्लोकैः) अभिहितम्।

अपात्रीकरणपापप्रायश्चित्तम्।

'सङ्करीकरणानन्तरमपात्रीकरणमनुक्रान्तवान् विष्णुः—

'निन्दितेभ्यो धनादानं वाणिज्यं कुसीदजीवनम्-
सत्यभाषणं शूद्रसेवनमित्यपात्रीकरणम्'।

(वि. स्मृ. ४०. १)

इति। तस्य च साधारणं प्रायश्चित्तं मनुराह—

'अपात्रीकरणं कृत्वा तप्तकृच्छ्रेण शुद्ध्यति।
शीतकृच्छ्रेण वा शुद्धिर्महासान्तपनेन वा'॥

(वि. स्मृ. ४०. २)

---

१ I. omits तु २ All others, except A. G. I. and the text, read संकीर्णकरणम् for संकरीकरणम्. ३. Here also, except A. G. I and the text, all read सकीर्णकरणम् for सकरीकरणम्. ४. I. reads कृषिजीवन for कुसीदजीवनम्. ५. The following quoted verse does not appear in the Manû, but appears in the Vishṇû. ६. The Vishṇû reads भूयो for शुद्धिः.

इति ॥

### मलिनीकरणपापप्रायश्चित्तम् ।

अपात्रीकरणानन्तरं मलिनीकरणमनुक्रान्तवान् विष्णुः—

'पक्षिणां[1] जलचराणां जलजानां च घातनम् ।(१)
कृमि-कीटानां च । (२) मद्यानुगतभोजनम् ।(३)
इति मलावहानि' । (४)

(वि. स्मृ. ४१. १–४)

इति । तत्र साधारणं प्रायश्चित्तं स एवाह—

'मलिनीकरणीयेषु तप्तकृच्छ्रं विशोधनम् ।
कृच्छ्रातिकृच्छ्रमथ वा प्रायश्चित्तं विशोधनम्' ॥

(वि. स्मृ. ४१. ५)

इति ॥

### प्रायश्चित्तविशेषः ।

अथ प्रकीर्णकप्रायश्चित्तविशेषोऽभिधीयते । तत्र शरणागतत्यागे मनुराह—

'शरणागतं परित्यज्य वेदं विप्लाव्य च द्विजः ।
संवत्सरं यवाहारस्तत्पापमपसेधति[2]' ॥

(म. स्मृ. ११. ११८)

इति । पतितादिसन्निधावध्ययने वसिष्ठ आह—

'पतित-चण्डाल[3]रावश्रवणे त्रिरात्रं वाग्य-

---

१ Except A. and the text, all omit पक्षिणां जलचराणां जलजानां च घातनम् and read कृमि-कीटघातनं for कृमि-कीटानां च २ B. D. and G read अवसेधति for अपसेधति; while E. has तप्तकृच्छ्रं विशोधनम् before शरणागत परित्यज्य. ३ B. C. D. F. and G. read चण्डालशवश्रवणे, but it may be चण्डालारावश्रवणे, while E I. and J. read -चण्डालादिश्रवणे and H. -श्रावणे for -चण्डालारावश्रवणे.

ता अनश्नन्त आसीरन्। (३४) सहस्रपरमां
वाचमभ्यस्य ततः पूता भवन्तीति विज्ञायते'।
(व. स्मृ. २३. ३४–३९)

इति। एतद्बुद्धिपूर्वकविषयम्। अबुद्धिपूर्वके तु षट्त्रिंश-
न्मतेऽभिहितम्—

'चण्डालश्रोत्रावकाशे श्रुति-स्मृतिपाठे
एकरात्रमभोजनम्'।

इति। सर्पाद्यन्तरागमने तु यम आह—

'सर्पस्य नकुलस्याथ अज-मार्जारयोस्तथा।
मूषिकस्य तथोष्ट्रस्य मण्डूकस्य च योषितः॥
पुरुषस्यैकस्यापि शुनोऽश्वस्य खरस्य च।
अन्तरागमने सद्यः प्रायश्चित्तमिदं शृणु॥
त्रिरात्रमुपवासश्च त्रिरह्नश्चाभिषेचनम्।
ग्रामान्तरं वा गन्तव्यं जानुभ्यां नात्र संशयः'॥
(य. स्मृ. ६. ४८–५०)

इति। खरोष्ट्रयानारोहणादौ प्रायश्चित्तमाह याज्ञवल्क्यः—

---

१ I. reads वाग्यतोनश्नन्नासीनः सहस्रपरमां वाच मभ्यस्य तत पूतो भवतीति. G. and the text omit वाच and the text substitutes -परमं for -परमां, while J reads सहस्रवरमा वा तदभ्यस्यान्तत पूतो भवतीति G. substitutes अन्तः for तत, while the text reads वा तदभ्यसन्त २. I omits तु. ३. I. adds कृते after -श्रोत्रावकाशे. ४. J. reads सर्वाद्यन्तरागमने, but it does not give any proper meaning.

'प्राणायामी जले स्नात्वा खरयानोष्ट्रयानगः ।
नग्नः स्नात्वा च भुक्त्वा च गत्वा चैव दिवा स्त्रियम्'॥
(या. स्मृ. ३. २९१)

इति । इदं चाकामकारविषयम् । कामकारे तु यम आह—

'खरोष्ट्रविषमा नारी समारुह्याथ वा पुमान् ।
यजने याजने कृच्छ्रमग्निश्चैव विनिर्दहति ॥
'उष्ट्रयानं समारुह्य खरयानं च कामतः ।
सवासा जलमाप्लुत्य प्राणायामेन शुद्ध्यति' ॥
(म. स्मृ. ११. २०१)

इति ॥

## मूत्र-पुरीषप्रायश्चित्तम् ।

अप्सु मूत्र-पुरीषादिकरणे मनुराह—

'विनाऽद्भिरप्सु वाऽऽर्त्यार्तः शारीरं सन्निवेदय तु ।
सचैलो बहिराऽऽप्लुत्य गामालभ्य विशुद्ध्यति' ॥
(म. स्मृ. ११. २०३)

इति । इदमकामकारविषयम् । कामकारे तु यम आह—

---

१ B. C. D and F. read प्राणायामं, H. प्राणायामो and I प्राणायामं all for प्राणायामी. २ A. I. and J. substitute मनु for यम the following quoted two verses are not found in the text of Manû. The second verse occurs in Manû, but differs in reading in the second half as follows·—

स्नात्वा तु विप्रो दिग्वासा - - - - - -॥.

३. This verse is omitted by all others except A. and G. ४. Manû reads तु for च. ५ B. and D. read स्नात·, H reads अनार्त and G. आप्याय्य all for आर्त. ६ All others, except A. I. and the text, read संनिवेद्य for सन्निवेदय, while the text substitutes च for तु ७. I. reads बहुधा for बहि..

'आपद्गतो विना तोयं शारीरं यो निषेवते।
एकाहं क्षपणं कृत्वा सचैलं स्नानमाचरेत्' ॥
(य. स्मृ. ५. २६)

इति। यच्चाह[1] सुमन्तुः—

'अप्स्वग्नौ वा मेहतस्तप्तकृच्छ्रं कायविशोधनम्'।

इति तदनार्तप्परतया योज्यम्।

कर्मलोपप्रायश्चित्तम्।

श्रौत-स्मार्तकर्मादिलोपे मनुराह—

'वेदोदितानां नित्यानां कर्मणां समतिक्रमे।
स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम्' ॥
(म. स्मृ. ११. २०३)

इति। अत्रोपवासस्य प्रतिपदोक्तेष्ट्यादिना समुच्चयः। पञ्चमहायज्ञाद्यकरणे बृहस्पतिराह[2]—

'अनिर्वर्त्य महायज्ञान् यो भुङ्क्ते प्रत्यहं गृही।
अनातुरः सति धने कृच्छ्रार्धेन विशुद्ध्यति ॥
आहिताग्निरुपस्थानं न कुर्याद्यज्ञकर्मणि[3]।
ऋतौ न गच्छेद्भार्यां वा सोऽपि कृच्छ्रार्धमाचरेत्' ॥
(बृ. स्मृ. २. १३-१४)

इति।

वैषम्यदानप्रायश्चित्तम्॥

एकपङ्क्त्युपविष्टानां वैषम्येण दानादौ यमः—

---

१ B. C. D E. F. H. and J. read अत्र यदाह and G. for यच्चाह. २ The word कायविशोधनम् occurs only in I. ३ All others, except A. and I., omit आह. ४. B. and D substitute यज्ञकर्मणा for यज्ञकर्मणि.

'न पङ्क्त्यां विषमं दद्यान्न याचेन्न च दापयेत् ।
प्राजापत्येन कृच्छ्रेण मुच्यते कर्मणस्ततः' ॥

इति । पतितादिसम्भाषणे तु गौतमः—

'न म्लेच्छाशुच्यधार्मिकैः सह सम्भाषेत । ( १९ )
सम्भाष्य पुण्यकृतो मनसा ध्यायेत् । ( २० )
ब्राह्मणेन वा सह सम्भाषेत' । ( २१ )
( गौ. स्मृ. ९. ११–२१ )

इति । अशुचेर्भोजने शातातप आह—

' मूत्रोच्चारं द्विजः कृत्वा अकृत्वा शौचमात्मनः ।
मोहाद्भुक्त्वा त्रिरात्रं स्याद्भुङ्क्त्वा सान्तपनं चरेत्' ॥
( शा. स्मृ. २. ६४ )

इति । वृद्धशातातपोऽपि—

' मूत्रयित्वा व्रजन्मार्गे स्मृतिभ्रंशाज्जलं पिबेत् ॥
अहोरात्रोषितः स्नात्वा जुहुयात्सर्पिषाऽऽहुतीः' ।
( वृ. शा. स्मृ. १३–१४ )

---

१. G. omits —
'— — विषमं दद्यान्न याचेन्न च दापयेत् ।
प्राजापत्येन कृच्छ्रेण मुच्यते कर्मणस्तत' ॥

२ B. and D read न म्लेच्छैरधार्मिकै omitting -ऽशुचि- C°E. F. and G. म्लेच्छाशुद्ध्यधार्मिकैः, but the word अशुद्धि seems to be incorrect, both for न म्लेच्छाशुच्यधार्मिकै. ३ G. H and I do not insert सह and J. also does the same. ४. B D. G. and J read अशुचौ for अशुचे and I. अशुचिभोजने for अशुचेर्भोजने ५. C and F. substitute तमोद्धारं for मूत्रोच्चार, but it is meaningless. ६. G. reads भुक्त्वा सतपनं for भुङ्क्त्वा सान्तपनं. ७.I reads मार्गे for मार्ग.

इति । व्याघ्रोऽपि—

'अस्पृश्यस्पर्शनं कृत्वा यदा भुङ्क्ते गृहाश्रमी ।
अकामतस्त्रिरात्रं स्यात् षड्रात्रं कामतश्चरेत् ॥
यतिश्चैव वनस्थश्च कुर्यातां तौ तदेव तु' ।

इति । उशना अपि—

'चण्डाल-श्वपचैः स्पृष्टो विण्मूत्रोच्छिष्ट एव च ।
त्रिरात्रेण विशुद्धः स्याद्भुक्तोच्छिष्टः षडाचरेत्' ॥

इति । बृहस्पतिरपि—

'अस्नात्वा तु यदा भुङ्क्ते पिण्डं दत्त्वा पितुर्व्रती ।
स्पृष्ट्वा शवमुदक्यां वा चण्डालं सूतिकां तथा ॥
अकामतस्त्रिरात्रं स्याद्बुद्ध्या सान्तपनं चरेत्' ।

इति । ब्रह्मसूत्रं विना मूत्र-पुरीषादिकरणे स्मृत्यन्तरे प्रायश्चित्तमुक्तम्—

'विना यज्ञोपवीतेन यद्युच्छिष्टो भवेद् द्विजः ।
प्रायश्चित्तमहोरात्रं गायत्र्यष्टशतं तु वा' ॥

इति । इदं च कामकारविषयम् । अकामतस्तु—

'पिबतो मेहतश्चैव भुञ्जतोऽनुपवीतिनः ।
प्राणायामत्रयं षट्कं नक्तं च त्रितयं क्रमात्' ॥

---

१ J. reads तदैव for तदेव २. Except A, all others read विशुद्धि for विशुद्धः. ३. I reads दत्त्वाऽपि तद्भर्त्री for दत्त्वा पितुर्व्रती ४ C F. and G substitute च for वा. ५. G. reads बुध्वा for बुद्ध्या ६ B. and D. omit the following:—

ब्रह्मसूत्रं विना मूत्र-पुरीषादिकरणे स्मृत्यन्तरे प्रायश्चित्तमुक्तम्—
'विना यज्ञोपवीतेन यद्युच्छिष्टो भवेद् द्विजः ।

७. I. reads जपेत् for तु वा and G. भवेत् for the same; while some substitute च for वा. ८. Except A., all others omit च.

इति । भोजनान्तरमाचमनमकृत्वासनादुत्थाने प्रायश्चित्तमाश्वमेधिकेऽभिहितम्[1]—

'*यद्युत्तिष्ठत्यनाचान्तो भुक्त्वानासनात्ततः[2] ।
सद्यःस्नानं प्रकुर्वीत सोऽन्यथाऽप्रयतो भवेत्' ॥
(भा. आ. प. १०६.२०)

इति । अपाङ्क्तेयपङ्क्तौ भोजने मार्कण्डेय आह—

'अपाङ्क्तेयस्य[3] यः कश्चित् पङ्क्तौ भुङ्क्ते द्विजोत्तमः ।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति' ॥

इति । नीलीरक्तवस्त्रधारणे त्वापस्तम्ब आह—

'नीलीरक्तं यदा वस्त्रं ब्राह्मणोऽङ्गेषु धारयेत्[4] ।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ॥ (४)
रोमकूपैर्यदाऽऽगच्छेद्रसो नील्यास्तु कस्यचित्[5] ।

---

* वचनमिदं 'त्रिवेन्द्रम्' नगरीस्थराजकीयपुस्तकसङ्ग्रहस्थभारतान्तर्गते आश्वमेधिके पर्वणि द्रष्टव्यम् । देवनागराक्षरमुद्रितपुस्तकेषु नोपलभ्येत इति शोधकैर्वेदितव्यम् ।

---

१. B and D. read प्रायश्चित्तमुक्तम् for ऽभिहितम् २ text reads यश्च तिष्ठत्यनाचान्तो भुक्तवानासने ततः and E and D read नान्यथा ऽप्रयतो for सोऽन्यथा प्रयतो. ३. B. and D. read अपाङ्क्तेयश्च for अपाङ्क्तेयस्य ४. B. C. D F. G and J. omit the following —

नीलीरक्तवस्त्रधारणे त्वापस्तम्ब आह—
'नीलीरक्तं यदा वस्त्रं ब्राह्मणोऽङ्गेषु धारयेत् ।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ॥,

५. The text reads कर्हिचित् for कस्यचित्

त्रिवर्णेषु च सामान्यं तप्तकृच्छ्रं विशोधनम् ॥ (५)
पालनं विक्रयश्चैव तद्वृत्त्या तूपजीवनम् ।
पतितस्तु भवेद्विप्रः त्रिभिः कृच्छ्रैर्विशुद्ध्यति ॥ (२)
स्नानं दानं जपो होमः स्वाध्यायः पितृतर्पणम् ।
वृथा तस्य महायज्ञा नीलीसूत्रस्य धारणात् ॥ (३)
नीलीमध्ये तु गच्छेद्वा प्रमादाद्ब्राह्मणः क्वचित् ।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ॥ (७)
नीलीदारु यदा भिन्द्याद्ब्राह्मणस्य शरीरकम् ।
शोणितं दृश्यते तत्र द्विजश्चान्द्रायणं चरेत् ॥ (६)
स्त्रीणां क्रीडार्थ-संभोगे शयनीये न दुष्यति ॥ (१)
नीलीरक्तेन वस्त्रेण यदन्नमुपनीयते ।
दातारं नोपतिष्ठेत भोक्ता भुञ्जीत किल्विषम्' ॥ (८)
( आ. स्मृ. ६. १–८ )

---

१ The text does not give the following two lines —

त्रिवर्णेषु च सामान्य तप्तकृच्छ्र विशोधनम् ॥
पालन विक्रयश्चैव तद्वृत्त्या तूपजीवनम् ।

२. B and D read पावन for पालन ३ We follow here A. and the text, while B. and D read पावन तु, G and J पालन तु, C. and F. quite mistaken, H पातन तु and I पातक तु all for पतितस्तु, while I reads विप्रे for विप्र ४ Except A and the text all read व्यपोह्यति for विशुद्ध्यति ५ H I. and J. read -यज्ञो for -यज्ञा, while the text omits the following —

स्नान दानं जपो होम स्वाध्याय. पितृतर्पणम् ।
वृथा तस्य महायज्ञा नीलीसूत्रस्य धारणात् ॥

६ The text reads this verse after the next verse. ७ The text reads यदा गच्छेत् for तु गच्छेद्वा ८ We follow here only A and the text, while I. reads पदा भिन्नात् for यदा भिन्द्यात् and B C D E F G. H. and I read शरीरत and J विशेषत. both for शरीरकम् ९ All others, except A and the text, substitute यत्र for तत्र १०. The text does not insert this line ११ J reads यद्भक्तम् for यदन्नम् १२ The text reads · —

भक्षीत्वा तद् द्विजातीना भुक्त्वा चान्द्रायण चरेत् ।

इति । भृगुरपि—

'स्त्रीधृता शयने नीली ब्राह्मणस्य न दुष्यति ।
नृपस्य वृद्धवैश्यस्य पर्ववर्ज्यं हि धारणम् ॥
कम्बले पट्टसूत्रे च नीलीरागो न दुष्यति' ।

इति । ब्रह्मतरुनिर्मितखट्वाद्यारोहणे शङ्खः—

'अध्यास्य शयनं यानमासनं पादुके तथा ।
द्विजः पलाशवृक्षस्य त्रिरात्रं तु व्रती भवेत् ॥
क्षत्रियस्तु रणेऽदत्त्वा पृष्ठं प्राणपरायणः ।
संवत्सरं व्रतं कुर्याच्छित्त्वा पिप्पलपादपम् ॥ (४९)
द्वौ विप्रौ ब्राह्मणा-ऽग्नी वा दम्पती गो-द्विजोत्तमौ ।
अन्तरेण यदा गच्छेत् कृच्छ्रं सान्तपनं चरेत् ॥
होमकाले तथा दोहे स्वाध्याये दारसङ्गमे ।
अन्तरेण यदा गच्छेत् द्विजश्चान्द्रायणं चरेत्' ॥

( शं. स्मृ. १७. ४८–५१ )

---

१ C F read वृद्धौ वैश्यस्य for वृद्धवैश्यस्य and B. C. D E F. G and H read पर्वपदर्थं विधारणम्, while I. स्पर्शो वर्ज्यं तु धारणम् both for पर्ववर्ज्यं हि धारणम् २. B. reads कम्बली पदशुभ्र च नीलरागो D reads the same, but substitutes पद for पद ३ B. and D read यद्यस्य for अध्यास्य, but it seems to be a mistake; while G. reads अध्यस्य for the same and the text omits this and following one line ४ I. reads त्रिशत्रस्तु for त्रिरात्र तु. ५. We follow here A and the text, while all others read पृष्ठ दत्त्वा for ऽदत्त्वा पृष्ठ and the text substitutes हत्वा for दत्त्वा and प्राणपरायणम् for प्राणपरायणः ६. Except A. and the text all others read वृक्षफल-प्रदम् for पिप्पलपादपम्, but the reading is quite useless here. ७. This and the following three lines are not found in the printed copy of the text Bombay edition, but these occur in the manuscript copy. ८. B. and D. omit this and the following one line.

इति। दुःस्वप्नारिष्टदर्शनादौ स एवाह—

'दुःस्वप्नारिष्टदर्शनादौ घृतं हिरण्यं च दद्यात्'।

इति। तीर्थयात्रामन्तरेण देशान्तरगमने देवलः प्रायश्चित्तमाह—

'सिन्धु-सौराष्ट्र-सौवीरान् तथा प्रत्यन्तवासिनः।
अङ्ग-वङ्ग-कलिङ्गांश्च गत्वा संस्कारमर्हति'॥
(दे. स्मृ. ६१)

इति। सूर्योदयादिकालशयने प्रायश्चित्तमाह यमः—

'सूर्योदये तु यः शेते सूर्याभ्युदित उच्यते।
अस्तं गते तु यः शेते सूर्यनिर्मुक्त उच्यते॥
ब्रह्महत्यावुभौ सम्यगहोरात्रोषितौ शुची।
गायत्र्या दशसाहस्रं कुर्यादैकाह्निकं पृथक्'॥

इति। मनुरपि—

'तं चेदभ्युदियात् सूर्यः शयानं कामकारतः।
निम्लोचेद्वाऽप्यविज्ञानात् जपन्नुपवसेदिनम्'॥
(म. स्मृ. २. २२०)

---

१ All others, except A. and I, omit -ऽरिष्ट-. २ B and D. read स्वारिष्टदर्शने, E and H दु स्वप्नारिष्टदर्शनात् both for दु स्वप्नारिष्टदर्शनादौ ३ J. reads सावीरा for -सौवीरान् ४. I. reads कलिङ्गान्वान् for कलिंगान्वा and G पुन for गत्वा. ५ C. and F. omit सूर्योदयादिकालशयने प्रायश्चित्तमाह यम; while B and D. omit only यम ४ Except A and J. all others read अहोरात्रोषित. शुचि ६ B. and D. read कुर्यादेवाह्निकं, G. कुर्यादेवाह्निके both for कुर्यादैकाह्निकं, while I substitutes बुध for पृथक्. ७ B. D and G. read अभ्युदित for अभ्युदियात्. ८ The text reads कामचारत. for कामकारत. ९ B. and D read निम्लोचे वा for निम्लोचेद्वा

इति । गौतमस्तु ब्रह्मचारिणे विशेषमाह—

'सूर्याभ्युदितो ब्रह्मचारी तिष्ठेदहरभुञ्जानो
ऽभ्यस्तमितश्च रात्रिं जपेत् सावित्रीम्' ।

( गौ. स्मृ. २३. २१ )

इति । यति-वनस्थयोर्विशेषमाह वसिष्ठः—

'वनस्थश्च यतिश्चैव सूर्येणाभ्युदितौ यदि ।
ब्रह्मकूर्चाशिनौ भूत्वा जपेतां प्रणवं त्वहः' ॥

( व. स्मृ. २८. ४१ आन्ध्रपुस्तके )

इति । दण्ड-कमण्डल्वादिनाशे प्रायश्चित्तमाह पैठीनसिः—

'नष्टे दण्डकाष्टे भैक्षं दत्त्वा ब्राह्मणाय तदह-
रुपवसेत् । अन्यं प्रयच्छेद्गुरुः । कमण्डलाव-
प्येवमेव । नष्टायां मेखलायां त्रिवृतमाचरेत्' ।

इति । सन्ध्या-ऽग्निकार्यलोपे संवर्तः—

'सन्ध्यामापदि नोपास्ते अग्निकार्यं यथाविधि ।
सावित्र्यष्टसहस्रं तु जपेत् स्नात्वा समाहितः' ॥

( सं. स्मृ. २. २७ )

इति । स्वशकृन्निरीक्षणे प्रायश्चित्तमाह यमः—

---

१ All others, except A. I. and J, read त्रिरात्र or रात्रि २ B C. D. E F. G. H. I. and J read सूर्येणाभ्युदितो for सूर्येणाभ्युदितौ ३ We follow here A. and J, while B C D F. G and H read गत्वा दत्वा, E. omits दत्वा and I. गत्वा तदहत्वा all for दत्वा ४ G. reads सन्ध्यामपरिभोज्यास्ते for सन्ध्यामापदि नोपास्ते ५ Except A. and I all others do not insert यम, but the quoted verse elsewhere is quoted under the same name (Vol. I, Part I, p 226, l. 4)

'प्रत्यादित्यं न मेहेत न पश्येदात्मनः शकृत्।
दृष्ट्वा सूर्यं निरीक्षेत गामग्निं ब्राह्मणं तथा' ॥
(य.स्मृ. ५·१३)

इति। भोजनकालेऽशुचित्वे वृद्धज्ञातातपः—

'यदा भोजनकाले तु अशुचिर्भवति द्विजः।
भूमौ निक्षिप्य तं ग्रासं स्नात्वा विप्रो विशुद्ध्यति ॥
भक्षयित्वा तु तं ग्रासमहोरात्रेण शुद्ध्यति।
अशित्वा सर्वमेवान्नं त्रिरात्रेण विशुद्ध्यति' ॥
(वृ. ज्ञा. स्मृ. १६–१७)

इति। श्राद्धे निमन्त्रितस्य कालातिक्रमे यम आह—

'केतनं कारयित्वा तु योऽतिपातयते द्विजः।
ब्रह्महत्यामवाप्नोति शूद्रयोनौ प्रजायते ॥
एतस्मिन्नेनसि प्राप्ते ब्राह्मणो नियतव्रतः।
यतिचान्द्रायणं चीर्त्वा ततश्चान्द्रायणं चरेत्' ॥
(य. स्मृ. ५. १४-१५)

इति। क्षत्रियाद्युपसंग्रहणे हारीत आह—

'क्षत्रियाभिवादने ऽहोरात्रमुपवसेत्। वै-
श्यस्यापि। शूद्रस्याभिवादने त्रिरा-
त्रमुपवासः। तथा शय्याऽऽरूढपादुको-

---

१. G. substitutes च for तु २. B. C D G and H. read समाप्नोति for भवाप्नोति. ३. A. reads तीर्त्वा for चीर्त्वा. ४ J. omits क्षत्रियाद्युपसंग्रहणे हारीत आह–, while B. and D. read हारीत· omitting आह. ५ H. and I. read उपवास·; while I inserts स्यात् after उपवास.. ६. C. F. and J. omit अपि। शूद्रस्या- and read वैश्यस्याभिवादने, while B and D omit अपि ७ B. and D omit शय्यारूढपादुकोपानद्वारोपितपादोच्छिष्टांधकारस्थ-श्राद्धकृज्जपदेवतापूजाभिरताऽभिवादने

पानदारोपितपादोच्छिष्टा-ऽन्धकारस्थ-श्राद्ध-
कृज्जपदेवतापूजाभिरताऽभिवादने त्रिरात्र-
मुपवासः स्यात् । अन्यत्र निमन्त्रितेनान्यत्र भोजने ऽपि त्रिरात्रमुपवासः' ।

( हा. स्मृ. २१. ७-१२ )

इति ॥

अभिशसनप्रायश्चित्तम् ।

मिथ्याभिशंसने* प्रायश्चित्तमाह याज्ञवल्क्यः—

'महापापोपपापाभ्यां योऽभिशंसेन्मृषा परम् ।
अब्भक्षो मासमासीत स जापी नियतेन्द्रियः' ॥

( या. स्मृ. ३. २८९ )

इति । जपश्च शुद्धवतीनां† कार्यः । तथा च वसिष्ठः—

'ब्राह्मणमनृतेनाभिशंस्य पत्नीयेनोप-
पत्नीयेन वा मासमब्भक्षः शुद्धवती-
रावर्तयेत् । अश्वमेधावभृथं वा गच्छेत्' ।

( व. स्मृ. २३. ३१ )

---

* मिथ्याभिशंसनं निर्दुष्टमपि दोषवानयमिति प्रख्यापनम् ।

†'एतोन्विन्द्रंस्तवामीशानं'—इत्यादिका ऋचः शुद्धवतीसंज्ञकाः । ता आवर्तयेत् जपेदित्यर्थः ।

---

१ C and F. read -पादुकोपलहासेऽपि for पादुकोपानदारोपित, while H. and J. - पादुकोपानहारोपित- for the same and - अन्धकारस्थ for -अन्धकारस्थ २ All others, except A I, read निमन्त्रितेऽन्यत्र for निमन्त्रितेनान्यत्र ३ B D and H insert स्यात् after उपवास. ४. G. and I. read नरम् for परम्. ५. G. and J read अभक्षो for अब्भक्षो. ६ Except A. G. and the text all others read अभिशस्य for अभिशस्य ७. Except A I. and the text all read स मासम् for मासम्

इति । हारीतोऽपि—

'अनृताभिशंसनाक्रोशे[1] गुरूणां पैशुनेषु[2] च ।
एकविंशतिरात्रं तु पिबेद्ब्राह्मीं सुवर्चलाम्' ॥
( हा. स्मृ. २१. ३ )

इति ।शङ्ख-लिखितौ—

'नास्तिकवृत्तिः कृतघ्नः कूटव्यवहारी
ब्राह्मणवृत्तिघ्नो मिथ्याभिशंसन इत्येते
पञ्चसंवत्सरान् ब्राह्मणगृहे भैक्ष्यं
चरेयुः । संवत्सरं धौतं[3] भैक्ष्यमश्नीयुः ।
षण्मासान् वा[4] गा अनुगच्छेयुः' ।

इति । एतेषां वचनानां यथायोगं व्यवस्था द्रष्टव्या ॥

## अभिशस्तप्रायश्चित्तम् ।

अभिशस्तप्रायश्चित्तमाह याज्ञवल्क्यः—

'अभिशस्तो मृषा कृच्छ्रं चरेदाग्नेयमेव वा ।
निर्वपेत्तु पुरोडाशं वायव्यं पशुमेव वा'[5]* ॥
( या. स्मृ. ३. २८७ )

---

* आग्नेयमग्निदेवताकं चरुं निर्वपेत् । अथ वा वायुदेवताकं चरुमित्यन्वयः । अपरार्कादिसर्वसम्मतो ऽयमेव पाठः । क्वचित् 'चरुम्' इति पाठो दृश्यते । तत्र अग्निदेवताकं चरुं वायुदेवताकं पशुमित्यन्वयः । तथापि नायं पाठो युक्तः । चरुनिर्वापस्य पश्वालभनस्य च लघुत्व-गुरुत्वात् तयोः समविकल्पो न सम्भवति ।

---

१ G reads अनृताभिशंसनक्रोधे for अनृताभिशसनाक्रोशे २ E and I. read पैशून्ये च for पैशुनेषु च. ३ J omits धौतं ४ G and I omit वा. ५. Only A. and the text substitute चरुम् for पशुम् and G. reads च for वा.

इति । यत्तु वसिष्ठवचनम्—

'एतेनैवाभिशस्तो व्याख्यातः' ।

( व. स्मृ. २३. ३७ )

इति तत्तदैवाकृतप्रायश्चित्तस्य द्रष्टव्यम् । यत्तु पैठीनसिनोक्तम्—

' अनृतेनाभिशस्तः कृच्छ्रं चरेत् । मासं पातकेषु । महापातकेषु द्विमासम्'*।

इति तदपि वसिष्ठेन समानविषयम् ।

तदेवं विष्णुनाऽनुक्रान्तानामतिपातकादीनां प्रकीर्णकान्तानां दशविधानां पापानां सामान्यतो विशेषतश्च प्रायश्चित्तानि प्रतिपादितानि ॥

## अथ रहस्यप्रायश्चित्तान्यभिधीयन्ते ।

यत् पापं कर्तृव्यतिरिक्तेनान्येन केनचिदपि न ज्ञातं तद्रहस्यम् । तस्य प्रायश्चित्तमपि रहस्येव कर्तव्यम् । तथा च हारीतः—

---

*पातकलक्षणं पूर्वमुक्तम् । तेन पातकेनाभिशस्तो मासं महापातकेनाभिशस्तो मासद्वयं कृच्छ्रमाचरेत् ।

---

१. B C. D. and F read अकृतप्रायश्चित्त for अकृतप्रायश्चित्तस्य and G omits यत्तु before पैठीनसिनोक्तम् २ G. and H read विष्णुनाक्रान्तानां for विष्णुनानुक्रान्ताना ३ B. C. and D. omit प्रकीर्णकान्तानां दशविधाना, while G. omits दशविधाना.

'अथ ब्राह्मणस्य श्रुतधर्मशास्त्रस्य *रहस्यमनुक्रमिष्यामः। रहस्ये रहस्यं प्रकाशे प्रकाशम्'।
(हा. स्मृ. ३०. १–२)

इति। यमः–

'रहस्ये रहस्यं प्रकाशे प्रकाशम्। रहस्यकृते रहस्यमेव कर्तव्यम्। प्रकाशकृते प्रकाशमेव कर्तव्यम्'।

इति। रहस्यत्वादेव नास्ति परिषदनुमत्यपेक्षा। तदाहतुर्बृहस्पति-याज्ञवल्क्यौ–

'विख्यातदोषः कुर्वीत पर्षदोनुमतं व्रतम्।
अनभिख्यातदोषस्तु रहस्यव्रतमाचरेत्'† ॥
(या. स्मृ. ३. ३०१)

---

*श्रुतधर्मशास्त्रस्येति विशेषणात् धर्मशास्त्रज्ञ एव रहस्यप्रायश्चित्तं कर्तुमर्हति। न पुनः शास्त्रानभिज्ञ इति सिद्धं भवति।

† अत्र विज्ञानेश्वरव्याख्यानमतीव समीचीनं विशदं चेति मत्वा तदेव सङ्गृह्यते—

'कर्तृव्यतिरिक्तैरनभिख्यातो दोषो यस्याऽसौ। रहस्यं अप्रकाशं प्रायश्चित्तमनुतिष्ठेत्। अतः स्त्रीसम्भोगादौ तस्या अपि कारकत्वात् तदितरैरविज्ञातदोषस्य रहस्यव्रतमिति मन्तव्यम्। * * * अत एव स्त्री-शूद्रयोरप्यमुनैव मार्गेण रहस्यव्रतज्ञानसिद्धेरधिकारसिद्धिः। नच वाच्यं–रहस्यव्रतानां जपादिप्रधानत्वादविद्ययोश्च स्त्री-शूद्रयोस्तदनुपपत्तेरनधिकार–इति। यतो नैकान्ततो रहस्यव्रतानां जपादिप्रधानत्वम्। दानादेरप्युपदेशात् गौतमोक्तप्राणायामादेरपि सम्भवाच्च'–

इत्यलं विस्तरेण।

---

१ H. reads श्रुति- for श्रुत–, but it seems incorrect. २ Except A. G. and H. all others omit रहस्ये रहस्यं प्रकाशे प्रकाशम्' । इति यम . I also omits this and also omits रहस्ये रहस्य प्रकाशे प्रकाशम् ३. I. reads पर्षद्य for पर्षदो. ४. The text reads हरस्य व्रतम् for रहस्यव्रतम्.

इति। न च—विनापरिषदं व्रतज्ञानाभाव-इति शङ्क्यम्। शास्त्रज्ञस्य तद्विज्ञानसम्भवात्। इतरेणापि बुद्धिमता[1] विद्वद्वोष्ठ्यां केनचिद्व्याजेनावगन्तुं शक्यत्वात्*। यदि तदभिज्ञानाय परिषदोऽग्रे पापं प्रकटीकुर्यात्तदा प्रायश्चित्तं बहुलं भवति। द्विविधा ह्यशुद्धिः पापेन जन्यते। ऐहिक्यामुष्मिकी च। तयोरैहिकी शिष्टैः सह व्यवहारं वारयति। आमुष्मिकी तु नरकं प्रापयति। तत्र प्रकटपापेषु द्विविधाऽशुद्धिसद्भावात्तन्निवृत्तये प्रायश्चित्तबाहुल्यमपेक्षितम्। रहस्ये त्वैहिकाऽशुद्ध्यभावादामुष्मिकमात्राऽशुद्धिः स्वल्पेनापि जप-होमादिना निवर्तते। अत एव मनुः प्राजापत्यादिव्रतानां जपादीनां च व्यवस्थामाह—

'एतैर्द्विजातयः शोध्या व्रतैरविष्कृतैनसः।
अनाविष्कृतपापांस्तु मन्त्रैर्होमैश्च शोधयेत्' ॥
(म. स्मृ. ११. २२६)

इति। तत्र रहस्यानां साधारणं प्रायश्चित्तं स एवाह—

'वेदाभ्यासोऽन्वहं शक्त्या महायज्ञक्रिया क्षमा।
नाशयन्त्याशु पापानि महापातकजान्यपि ॥ (२४९)

---

*रहस्यप्रायश्चित्ताधिकारिणश्चतुर्विंशतिमते दर्शिताः—
'आहिताग्नेर्विनीतस्य वृद्धस्य विदुषः प्रायश्चित्तं
रहस्योक्त पूर्वोक्तमितरस्याऽपि'।
इति।

---

१ G reads शुद्धिमता for बुद्धिमता २ B and D. omit यदि. ३. J. omits ऽशुद्धि and except A. and I. all होम-. ४. E. I. and J. read -पापास्तु; while B. and D.-पापाना.

यथैधस्तेजसा वह्निः प्राप्तं निर्दहति क्षणात् ।
तथाऽज्ञानकृतं पापं कृत्स्नं दहति वेदवित् ॥ (२४६)

सव्याहृति-प्रणवकाः प्राणायामास्तु षोडश ।
अपि भ्रूणहणं मासात् पुनन्त्यहरहःकृताः' ॥ (२४८)
( म. स्मृ. ११. २४५–२४८)

इति । वसिष्ठः—

'यद्यकार्यशतं साग्रं कृतं वेदश्च धार्यते ।
सर्वं तत्तस्य वेदाग्निर्दहत्यग्निरिवेन्धनम्' ॥
( व. स्मृ. २७. १ )

इति । चतुर्विंशतिमते—

'कृतैश्च क्रियमाणैश्च करिष्यद्भिर्न संशयः ।
ब्रह्म प्रतिष्ठेत्येतावत् अनुवाकौ जपेद् द्विजः' ॥

---

१ B. and D read this line as follows —
यथैषा तेजसां वह्नि प्राप्तान्निर्दहति क्षणात् ।,
C. and F. यथैषां तेजसा वह्नि प्राप्तौ निर्दहति क्षणात् ।,
G. reads यथैधांस्तेजसा वह्नि प्राप्तान्निर्दहति स्वयम् ।,
E. H and J. यथैधांस्तेजसा वह्नि प्राप्तान्निर्दहति क्षणात् ।,
but J. differs in प्राप्तो for प्राप्तान् all for—
यथैधस्तेजसा वह्नि प्राप्तं निर्दहति क्षणात् ।

२. The text reads this line as —
तथा ज्ञानाग्निना पाप सर्वं दहति वेदवित् ॥

३ B. C D. F H. and J. read सव्याहृतिका प्रणवा, E. सव्याहृनीका प्रणवा, G. सव्याहृतिका सप्रणवा all for सव्याहृति-प्रणवका· ४ G. omits -हण मासात् पुनन्त्यह- ५. B. D and H. read यद्यकार्यं कृतं मास शत and C E. F. and J. यद्य कार्यं कृतं साग्र शतं for यद्यकार्यशत साग्र कृतं, while G. substitutes वेग for वेद ६ G. reads सर्वतर तस्य and C. and F सर्वत्र तस्य for सर्वं तत्तस्य. ७. B and D read पावनो यजुषि, C F. and H पावनो यजुषु, G. पावनो यजुष, E., पावनो यजुषो and I. पवनाय जपेत् All for अनुवाकौ जपेद्.

इति । यमः—

'सहस्रपरमां देवीं शतमध्यां दशावराम्[1] ।
गायत्रीं स जपेन्नित्यं महापातकनाशिनीम् ॥
विराजं[2] द्विगुणं जप्त्वा तदह्नैव विशुद्ध्यति[3] ।
वामदेव्यं त्रिरावर्त्य तदह्नैव विशुद्ध्यति ॥
पौरुषं सूक्तमावर्त्य मुच्यते सर्वकिल्बिषात्[4] ।
वृषभं शतशो[5] जप्त्वा तदह्नैव विशुद्ध्यति ॥
वेदमेकगुणं कृत्वा तदह्नैव विशुद्ध्यति ।
रुद्रैकादशकं जप्त्वा तदह्नैव विशुद्ध्यति' ॥

इति । विष्णुः—

'अथातः सर्ववेदपवित्राणि भवन्ति (१) येषां[7] जपैश्च होमैश्च द्विजातयः पापेभ्यः[8] पूयन्ते । (२)

---

१. H reads दशावरम् for दशावराम् २. B D. and G read विरजा–, C. F. E and H read विरजा both for विराज, while G reads दत्वा for जप्त्वा. ३. G inserts इति after विशुद्ध्यति ४ B. and D. omit the following —

वामदेव्य त्रिरावर्त्य तदह्नैव विशुद्ध्यति ।
पौरुष सूक्तमावर्त्य मुच्यते सर्वकिल्बिषात् ॥
वृषभ शतधा जप्त्वा तदह्नैव विशुद्ध्यति ।
वेदमेकगुणं कृत्वा तदह्नैव विशुद्ध्यति ॥.

५ I. reads शतधा for शतशो ६ E. I. omit this line ७ Except A. I. and the text all others read एषां for येषां. ८. Except A. I. and the text all others read पापैः for पापेभ्य , while C. and F. substitute प्रपूयन्ते for पूयन्ते and J. प्रमुच्यन्ते for पूयन्ते.

अवमर्षणम्। (३) देवकृतम्। (४) शुद्धवत्यः (५)। तरत्समन्दीयम्। (६) कूष्माण्ड्यः। (७) पावमान्यः। (८) दुर्गाः सावित्री। (९) अभीषङ्गाः। (१०) पदस्तोभाः। (११) सामानि। १२) व्याहृतयो भारुण्डानि। (१३) चन्द्रसाम। (१४) पुरुषव्रते सामनी। (१५) अङ्गिरगम्। (१६) बार्हस्पत्यम्। (१७) गोसूक्तम्। (१८) वाक्सूक्तम्। (१९) अश्वसूक्तम्। (२०) मध्वर्चं सामनी चेन्द्रशुद्धे। (२०) शतरुद्रीयम्। (२१) अथर्वशिरः। (२२) त्रिसुपर्णम्। (२३) महाव्रतम्। (२४) नारायणीयम्। (२५) पुरुषसूक्तं च। (२६)

त्रीण्याज्यदोहानि रथन्तरं च
अग्नेर्व्रतं वामदेव्यं बृहच्च।

---

१. Here also we follow A and I., while all others read तत्समन्दीय धावति and E reads तरत्समन्दीधावति for तरत्समन्दीयम् २ I. and the text read दुर्गासावित्री for दुर्गा सावित्री ३ The text substitutes अतीषङ्गा· and B. C. D F G H. and J. read अभिषङ्गा for अभीषङ्गा.. ४. G. reads महाव्याहृतयः for सामानि। व्याहृतयो. ५. B. and D. पुरुषो व्रतं देवतं भासमङ्गिगा, C and F. पुरुषव्रते देवत भासमालिङ्गा, E. and G पुरुषव्रतं देवत भासमलिंगा, H. पुरुषव्रतं देवते भासमाङ्गिगा and J. पुरुषव्रत दैवत भासमङ्गिलङ्गम् .All for पुरुषव्रते सामनी। अङ्गिलङ्गम् ६ The text and I do not insert वाक्सूक्तम्. ७ The text and I read अश्वसूक्तम्, while C. and F. substitute असूक्तम्। गोसूक्तम्। अश्वसूक्तम् ८ The text and I do not insert मध्वर्चं ; while E. reads मदुधः and H also reads the same in the marginal correction. ९ The text and I. read सामनी चन्द्रसूक्ते च for सामनी चेन्द्रशुद्धे. १०. I. and the text read त्रिसुपर्ण for त्रिसुपर्णम्. ११. Except A. I. and the text all others omit च. १२. I. reads आग्नेयं व्रत, C. F. and the text अग्निव्रत for अग्नेर्व्रतं

UNIVERSITY

इति । चतुर्विंशतिमते—

पावमानीस्तथा कौत्सं[1] पौरुषं सूक्तमेव च ।
जप्त्वा पापैः प्रमुच्येत पवित्रं मधुच्छन्दसम् ॥
मण्डलब्राह्मणं[2] रुद्रं शुक्रियो[3] मोक्षकस्तथा ।
वामदेव्यं बृहत्साम जप्त्वा पापैः प्रमुच्यते ॥
यज्ञायज्ञीयमादित्यं[4] ज्येष्ठसाम च राजनम्[5] ।
पौरुच्छेपं[6] च सामानि जप्त्वा मुच्येत किल्बिषात्॥
अथर्वशिरसं चैव पौरुषं सूक्तमेव च ।
नीलरुद्रं[7] तथैवैन्द्रं जप्त्वा पापैः प्रमुच्यते ॥
आथर्वणाश्च ये केचित् मन्त्राः कामविवर्जिताः।
ते सर्वे पापहन्तारो याज्ञवल्क्यवचो यथा ॥
सिंहे मे[8] मन्युरित्येतदनुवाकं जपेद् द्विजः ।
जप्त्वा पापै प्रमुच्येत बौधायनवचो *यथा ॥
ऋग्वेदमभ्यसेद्यस्तु यजुःशाखामथापि वा ।
सामानि सरहस्यानि[9] अथर्वाङ्गिरसस्तथा ॥
ब्राह्मणानि च कल्पांश्च षडङ्गानि तथैव च ।

---

यथा च बौधायनधर्मशास्त्रे—

'सिंहे मे इत्यपां पूर्णपात्रेऽवेक्ष्य चतुष्पथे ।
मुच्यते सर्वपापेभ्यो महतः पातकादपि'॥
(बौ. स्मृ. ४. ७. ७)

---

१ We follow here only G, while all others read सपुत्रं for पवित्रं. २. G. reads मण्डल, while B C. D. E. F H and J read बिडालब्राह्मणं for मण्डलब्राह्मणं ३. G reads शुक्तियो and J. शुक्तिया both for शुक्रियो. ४. B and D. read जप्त्वा for यज्ञा-, while J. substitutes यज्ञ for यज्ञा- ५ B C. D G and F. read राजतम् ६ B. and D. read पौरुच्छेप च, E मारुच्छेपं च and G पारुच्छेपश्च all for पारुच्छेप च ७ Except A and I all read नीलरुद्रा for नीलरुद्र. ८. B. and D read हिंसे मे and I. संहोमे for सिंहे मे. ९. G. reads चरवस्थानि for सरहस्यानि.

आख्यानानि तथाऽन्यानि जप्त्वा पापैः प्रमुच्यते* ॥
इतिहास-पुराणानि देवतास्तवनानि च ।
जप्त्वा पापैः प्रमुच्येत धर्मस्थानैस्तथा परैः' ॥

इति । बौधायनः—

'विधिना शास्त्रदृष्टेन प्राणायामान् षडाचरेत् ।
यदुपस्थकृतं पापं पद्भ्यां वा यत् कृतं भवेत् ॥
बाहुभ्यां मनसा वाचा श्रोत्र-त्वक्-घ्राण-चक्षुषा' ।
सायंसन्ध्यामुपस्थाय तेन तस्मात् प्रमुच्यते'† ॥

( बौ. स्मृ. २. ४. ७. १८ )

इति । मनुः—

'महापातकिनश्चैव शेषाश्चाकार्यकारिणः ।
तपसैव सुतप्तेन मुच्यन्ते किल्बिषात्ततः ॥ (२३९)
यत्किञ्चिदेनः कुर्वन्ति मनो-वाक्कर्मभिर्जनाः ।
तत्सर्वं निर्णुदन्त्याशु तपसैव तपोधनाः'‡ ॥ (२४१)

( म. स्मृ. ११. २३९–२४१ )

---

* कौत्सं कुत्सर्षिणा दृष्टं–'अपनः शोशूचदघम्'–इत्येतत् सूक्तम्'। माधुच्छन्दसं–'अग्निमीळे' इत्यादि । अन्यत् पूर्वमुक्तम् ।

† नित्यसन्ध्यातिरिक्तेयं प्रायश्चित्तरूपा सन्ध्या पृथगेवोपास्या ।

‡ तपोरूपमिद प्रायश्चित्तं तदेव स्तूयते । मेधातिथ्यादयस्तु पूर्वोक्त-व्रताचरणमेव तपः तस्यैवेयं स्तुतिरिति मन्यन्ते । मम तु 'तप सन्तापे' इत्य-स्माद्धातोर्निष्पन्नेन तपश्शब्देन पञ्चाग्निसाधनादिकं तप एव ग्राह्यं न व्रतादिकमिति प्रतिभाति ।

---

१ B. and D. substitute यथा- for तथा-. २. G. omits this verse. ३. This line does not appear in the text. ४ E reads समाचरेत् for षडाचरेत् ५. The text reads वापि वाचा वा यत्कृत भवेत् for वाचा श्रोत्र-त्वक्-घ्राण-चक्षुषा ६. This line does not appear in any of the manuscript except A. and the text. ७. B C. D. F. and G. substitute किल्-बषान्विता for किल्बिषात्तत . ८. The text reads मनो-वाङ्मूर्तिभिर्जना. for मनो-वाक्कर्मभिर्जना. ९ The text reads निर्दहन्ति for निर्णुदन्ति, while B. C. and F. read तपो जनाः for तपोधना .

इति । कूर्मपुराणेऽपि—

'जपस्तुपस्तीर्थसेवा देव-ब्राह्मणपूजनम् ।
ग्रहणादिषु कालेषु महापातकशोधनम् ॥ (१०८)
पुण्यक्षेत्राभिगमनं सर्वपापप्रणाशनम् ।
देवताभ्यर्चनं नृणामशेषाघविनाशनम् ॥ (१७)
अमावास्यां तिथि प्राप्य यः समाराधयेद्भवम् ।
ब्राह्मणान् भोजयित्वा च सर्वपापैः प्रमुच्यते ॥ (१८)
कृष्णाष्टम्यां महादेवीं तथा कृष्णचतुर्दशीम् ।
सम्पूज्य ब्राह्मणमुखे सर्वपापैः प्रमुच्यते ॥ (१९)
त्रयोदश्यां तथा रात्रौ सोपहारं त्रिलोचनम् ।
इष्ट्वेशं प्रथमे यामे मुच्यते सर्वपातकैः ॥ (१००)
एकादश्यां निराहारः समभ्यर्च्य जनार्दनम् ।
द्वादश्यां शुक्लपक्षस्य सर्वपापैः प्रमुच्यते ॥ (१०७)
उपोषितश्चतुर्दश्यां कृष्णपक्षे समाहितः ।
यमाय धर्मराजाय मृत्यवे चान्तकाय च ॥ (१०१)
वैवस्वताय कालाय सर्वभूतक्षयाय च ।
प्रत्येकं तिलसंयुक्तान् दद्यात्सप्तोदकाञ्जलीन् ॥ (१०२)

---

१. The text reads -त्रिनाशनम् for -प्रणाशनम्. २ The text reads पूजयित्वा for भोजयित्वा. ३. We follow here only A. and the text, while all others read महादेव for महादेवी. ४. B. D E. I. G. J. read दृष्ट्वेश for इष्ट्वेशं; while C. F. and H. दृष्ट्वेश प्रयतो for इष्ट्वेश प्रथमे. ५. The text reads महापापै. for सर्वपापै ६. After this line I inserts the following two lines —

औदुम्बराय दक्षाय नीलाय परमेष्ठिने।
वृकोदराय चित्राय चित्रगुप्ताय ते नमः ॥,

These lines are neither found in our manuscripts nor in the text and the seven names of Yama are complete in this śloka, therefore these lines are quite useless here.

स्नात्वा नद्यां तु पूर्वाह्णे मुच्यते सर्वपातकैः'॥(१०२)
(कू. पु. १. २. ३३.१७–१०८)

इति। पैठीनसिः—

'सर्वपापप्रसक्तोऽपि ध्यायन्निमिषमच्युतम्।
पुनस्तपस्वी भवति पङ्क्तिपावनपावनः'॥

इति। चतुर्विंशतिमते—

'मृगारेष्टिः पवित्रेष्टिस्त्रिहविः पावमान्यपि।
इष्टयः पापनाशिन्यो वैश्वानर्या समन्विताः'॥

इति। कूर्मपुराणे—

'अस्मिन् कलियुगे घोरे लोकाः पापानुवर्त्तिनः।
भविष्यन्ति महाबाहो वर्णाश्रमविवर्जिताः॥
नान्यत् पश्यामि जन्तूनां मुक्त्वा वाराणसीं पुरीम्।
सर्वपापप्रशमनं प्रायश्चित्तं कलौ युगे'॥
(कू. पु. १. १. २८. ९–१०)

इति। इति साधारणप्रायश्चित्तानि॥

## अथ प्रतिपदोक्तानि प्रायश्चित्तानि।

तत्र याज्ञवल्क्यः—

---

१ The text substitutes इत्याह for नद्यां तु, but it appears meaningless here. २ These quoted four lines are found in the printed copy of the said Purâna, but they do not exist in the manuscript copy, which is written in Telegu.

'त्रिरात्रोपोषितो जप्त्वा ब्रह्महा स्वघमर्षणम्।
अन्तर्जले[1] विशुद्ध्येत गां दत्वा च पयस्विनीम्' ॥
(या. स्मृ. ३. ३०२)

इति। शङ्ख-लिखितावपि—

'ब्रह्महा त्रिरात्रोपोषितोऽन्तर्जले[2] ऽघमर्षणं
त्रिरावर्तयेत्'।

इति। एतच्च कामकारविषयम्। अकामकारविषये तु यमः—

'एवं ब्रह्महत्या-सुरापान-सुवर्णस्तेय-गुरुत-
ल्पेषु प्राणायामैः श्रान्तोऽघमर्षणं जपेत्'।

इति। बौधायनः—

'ग्रामात्[3] प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य
स्नातः शुचिरुदकान्ते स्थण्डिलमुपलिप्य स-
कृत् क्लिन्नवासाः सकृत् पूतेन पाणिना आदि-
त्याभिमुखोऽघमर्षणस्वाध्यायमधीयीत। (२)
प्रातःशतं माध्याह्ने शतं अपराह्णे[4] शतमपरि-
मितं वा। (३) उदितेषु नक्षत्रेषु प्रसूतियावकं
प्राश्नीयात्[5]। (४) ज्ञानकृतेभ्योऽज्ञानकृतेभ्य-
श्चोपपातकेभ्यः[6] सप्तरात्रात् प्रमुच्यते। (५)

---

१ C and F omit the following portion :—
अन्तर्जले विशुद्ध्येत गां दत्वा च पयस्विनीम्' ॥
इति। शख-लिखितावपि—
'ब्रह्महा त्रिरात्रोपोषितोऽन्तर्जले ऽघमर्षणं.

२ B. and D त्रिवार त्रि. ३. The text reads तीर्थं गत्वा स्नात शुचिवासा उदकान्ते स्थण्डिलमुद्धृत्य for ग्रामात्प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य स्नात शुचिरुदकान्ते स्थण्डिलमुपलिप्य ४ We follow here only A. and the text; while all others read सायाह्ने शतं परिमित च for अपराह्णे शतमपरिमित वा ५. Except A. and the text all others read अश्नीयात् for प्राश्नीयात् ६ Except A. and the text all others omit अज्ञानकृतेभ्य and insert च after उपपातकेभ्य and read द्वादशरात्रान्महापातकेभ्यः। एवं ब्रह्महत्या सुवर्णस्तेय सुरापानं च for द्वादशरात्राद्भ्रूणहनन गुरुतल्पगमन सुवर्णस्तैन्यं सुरापान-मिति च.

द्वादशरात्राद्भ्रूणहननं गुरुतल्पगमनं सुवर्णस्तैन्यं सुरापानमिति च वर्जयित्वा। (६)
एकविंशतिरात्रात् तोन्यप्यतितरति[1]'। (७)
(बौ. स्मृ. ३. ९. २–७)

इति। मनुरपि—

'अरण्ये वा त्रिरभ्यस्य प्रयतो वेदसंहिताम्।
मुच्यते पातकैः सर्वैः पराकैः शोधितस्त्रिभिः[2]'॥
(म. स्मृ. ११. २५८)

इति। बृहद्विष्णुरपि—

'ब्रह्महत्यां कृत्वा प्राचीमुदीचीं वा दिशमुपप्रभूतेनेन्धनेनाग्निं प्रज्वाल्याघमर्षणेनाष्टसहस्रमाज्याहुतीर्जुहुयात्तदेतस्मात्पूतो भवति[3]'।

इति। एतानि कामाकामकारादिभेदेन व्यवस्थापनीयानि। सुरापाने यम आह—

---

१. I. reads अभितरति and the text अपि तरति for अप्यतितरति and adds तान्यपि जयति, २. J reads शोधितै for शोधित. ३. B D. E. and H. read आहुती for आज्याहुती. ४. B. C. D. F. and G. omit the following portion —

एतानि कामाकामकारादिभेदेन व्यवस्थापनीयानि। सुरापाने यम आह—

'सुरापः कण्ठमात्रमुदकमवतीर्य सुतसोमात् प्रसृतिमादायोदुम्बरेणाभिमन्त्र्य पिबेत्। ततोऽप्सु निमग्नो मानस्तोकीय जपेत्'।

इति। याज्ञवल्क्य —

'त्रिरात्रोपोषितो हुत्वा कूष्माण्डीभिर्घृतं शुचि'।

इति। मनुः—

'कौर्म्मं जप्त्वापि—&c. ..... &c., up to page 168, line 12.

' सुरापः कण्ठमात्रमुदकमवतीर्य सुतसोमात्
प्रसृतिमादायोङ्कारेणाभिमन्त्र्य पिबेत् । ततो
ऽप्सु निमग्नो मानस्तोकीयं जपेत् ' ।

इति । याज्ञवल्क्यः—

'त्रिरात्रोपोषितो हुत्वा कूष्माण्डीभिर्घृतं शुचिः'।
( या. स्मृ. ३. ३०४ )

इति । मनुः—

' कौत्सं जप्त्वाप इत्येतद्वासिष्ठं च प्रतीत्यृचम् ।
माहित्रं शुद्धवत्यश्च सुरापोऽपि विशुद्ध्यति ॥ (२४९)
मन्त्रैः शाकलहोमीयैरब्दं हुत्वा घृतं द्विजः ।
सुगुर्वप्यपहन्त्येनो जप्त्वा वा नम इत्यृचम् ॥ (२५६)
महापातकसंयुक्तोऽनुगच्छेद्गाः समाहितः ।
अभ्यस्याब्दं पावमानीर्भैक्षाहारो विशुद्ध्यति* ॥(२५७)
( म. स्मृ. ११. २४९–२५७ )

---

* कौत्सं–'अपनः शोशुचदघमित्येतत् । वासिष्ठं–'प्रतिस्तोमेभिरूषसं वसिष्ठा' इत्येतत् । माहित्रं–'महित्रीणामवोचमिति । शुद्धवत्यः–पूर्वमुक्ताः । 'देवकृतस्यैनसो' इत्यादयो ऽष्टौ मंत्राः शाकलहोमीयाः । नम इत्यृचं–'नम

---

१ J. reads सुतसोमात् वसृप्तिमादाय for सुतसोमात् प्रसृतिमादाय २ E. H. and J. read जपित्वा for जप्त्वा, while I reads this line as follows .—
' कौत्स जपित्वाऽपैत्येनो वासिष्ठं चेत्यृचम्प्रति ।.
३. E. and H read वासिष्ठ चेति ऋचम्प्रति, but E. substitutes ऋचे for ऋचम् and J वासिष्ठञ्च ऋचं प्रति both for वासिष्ठ च प्रतीत्यृचम् ४. J. reads सकलहोमीयैरिष्ट for शाकलहोमीयैरब्दं. ५ A. reads मन इत्यृचम् the Commentator Medhâtithi follows this reading, while I reads नमत् for नम, but it seems to be incorrect. ६. J reads समाहिता for समाहित.

इति । वसिष्ठेः—

'सुरां पीत्वाऽप्सु निर्मज्य त्रिः पठेदघमर्षणम् ।
यथाऽश्वमेधावभृथस्तादृशं मनुरब्रवीत्' ॥
(व. स्मृ. २६. ८)

इति । अत्र ज्ञानाज्ञानाभ्यासानभ्यासैर्वैयवस्था द्रष्टव्या । सुवर्णस्तेये शातातपः—

'मद्यं पीत्वा गुरुदारांश्च गत्वा
स्तेयं कृत्वा ब्रह्महत्यां च कृत्वा ।
भस्मच्छन्नो भस्मशय्यां शयानो
रुद्राध्यायी मुच्यते सर्वपापैः' ॥
(शा. स्मृ. १. ७१)

इति । यमः—

'ब्राह्मणः सुवर्णस्तेयं कृत्वा हिरण्यं शालायां प्रक्षिप्याऽप्सु स्नातो ग्रीवामात्रमुदकं हिरण्यवर्णाभिश्चतसृभिरात्मानमभ्युक्ष्य त्रीन् प्राणायामान् कृत्वा तदेतस्मात् पापात् पूतो भवति' ।

---

आविवेश-' इत्यृचमिति सर्वज्ञनारायणः । 'उग्रं नम आविवास' इति रामचन्द्रः । पावमान्यः ऋक्संहिताया नवमं मण्डलं स्वादिष्ठयेत्यारभ्य 'यत्तेराजन्' इत्यन्तम् ।

---

१ E and H. omit वसिष्ठ २ The text reads आपो वाऽप्सु निमज्जान त्रिर्जपेत् for सुरा पीत्वाऽप्सु निर्मज्य त्रि पठेत् ३ I. reads -शय्याशयनो and J reads -शय्याशयानो both for -शय्यां शयानो ४. E and H. omit यम. ५. J reads हिरण्यशालायां for हिरण्य शालाया. ६. E. H. and J. read निष्णात for स्नात

इति । बृहस्पतिः—

'सकृज्जप्त्वाऽस्यवामीयं शिवसङ्कल्पमेव वा।
अपहृत्य सुवर्णं वा क्षणाद्भवति निर्मलः' ॥

इति । याज्ञवल्क्यः—

'ब्राह्मणः स्वर्णहारी तु रुद्रजापी जले स्थितः'।
(या. स्मृ. ३. ३०४)

इति । जपश्चैकादशकृत्वा कार्यः । तदाह अत्रिः—

'एकादश गुणान् वाऽपि रुद्रानावर्त्य धर्मवित् ॥
महापापैरपि स्पृष्टो मुच्यते नात्र संशयः' ॥
(बृ. अ. स्मृ. ४. ६)

इति । गुरुतल्पे याज्ञवल्क्यः—

'सहस्रशीर्षाजापी च मुच्यते गुरुतल्पगः।
गौर्दया कर्मणोऽस्यान्ते पृथगेभिः पयस्विनी'॥
(या. स्मृ. ३. ३०५)

इति । यमोऽपि—

'अथ गुरुतल्पगमनं कृत्वाऽघमर्षणमन्तर्जले
त्रिरावर्त्य तदेतस्मात् पापात् पूतो भवति'।

---

१ E I and J. read ब्राह्मणस्वर्णहारी for ब्राह्मण स्वर्णहारी २. The verse occurs in Vrid-dhatri Samhitâ, but not Atri or Âtreya It reads शुद्धयति for धर्मवित् and for the second line it reads महापातकोपपातकेभ्यो मलिनीकरणेभ्यो मुच्येत for महापापैरपि स्पृष्टो मुच्यते नात्र संशयः. ३. E. I. and J. read सहस्रशीर्षजापी for सहस्रशीर्षाजापी.

इति । मनुरपि—

'हविष्पान्तीयमभ्यस्य न तमंह इतीति च ।
जप्त्वा च पौरुषं सूक्तं मुच्यते गुरुतल्पगः' ॥
( म. स्मृ. ११. २५१ )

इति । संसर्गी येन सह संसर्गं करोति स तदीयमेव प्रायश्चित्तं कुर्यात् ।

'स तस्यैव व्रतं कुर्यात्'।

इति पूर्वमेवोक्तत्वात् ॥

अथोपपातकरहस्यप्रायश्चित्तानि ।

तत्र यमः—

'दशप्रणवसंयुक्तैः प्राणायामैश्चतुःशतैः ।
मुच्यते ब्रह्महत्यायाः किं पुनः शेषपातकैः'॥

इति । याज्ञवल्क्योऽपि—

'प्राणायामशतं कार्यं सर्वपापापनुत्तये ।
उपपातकजातानामनादिष्टस्य चैव हि' ॥
( या. स्मृ. ३. ३०६ )

---

१ We follow here A. and G, while B and D. read हविष्याशी समभ्यस्य and others read हविष्यन्तीयमभ्यस्य for हविष्पान्तीयमभ्यस्य. in the text ( Bombay, Mandlik's edition). Some places have हविष्यन्तीयम् and some हविष्यन्तम्, but the quoted Mantra is हविष्पान्तमजर, &c. Therefore all these readings seem incorrect. २ The text read जपित्वा for जप्त्वा च; while H. substitutes तु for च ३ I. reads संसर्गे for संसर्गी. ४. G. substitutes यथा for अथ ५ B and D. omit तत्र यम ; while E. H. G. I. and J. substitute अत्र for तत्र. ६. B. and D. read सर्वपापप्रणुत्तये for सर्वपापापनुत्तये.

इति। मनुरपि—

'एनसां स्थूल-सूक्ष्माणां चिकीर्षन्नपनोदनम्।
अवेत्यृचं जपेदब्दं यत्किञ्चेदमितीति च' ॥
(म. स्मृ. ११. २५२)

इति। अत्र सकृदभ्यासादिभेदेन व्यवस्था द्रष्टव्या॥

अथ व्रतलक्षणानि।

तत्र सर्वव्रतस्य[1] साधारणान्यङ्गानि याज्ञवल्क्य आह—

'ब्रह्मचर्यं दया क्षान्तिर्दानं सत्यमकल्कता[3]।
अहिंसाऽस्तेय-माधुर्यं[4] दमश्चेति यमाः स्मृताः॥
स्नान[5]-मौनोपवासेज्या-स्वाध्यायोपस्थनिग्रहाः।
नियमा गुरुशुश्रूषा-शौचा-ऽक्रोधा-ऽप्रमादिताः[7]॥
(या. स्मृ. ३. ३१३–३३४)

इति। अत्र ब्रह्मचर्यं सर्वेन्द्रियनिग्रहः। उपस्थनिग्रहो लिङ्गनिरोधः। तयोर्गो-बलीवर्दन्यायेन पुनरुक्तिः। अकल्कत्वमकुटिलत्वम्।

---

१. The text reads वा for च २ Except A all omit तत्र and I reads सर्वव्रतसाधारणाङ्गानि for सर्वव्रतस्य साधारणान्यङ्गानि. ३ B D G and J. read अकल्पता for अकल्कता ४ Except E G. I and the text read -ऽस्तेयमाधुर्यदमाश्चेति and H -ऽस्तेयमाधुर्यं दमश्चेति both for ऽस्तेय-माधुर्यं दमश्चेति ५ G and the text read स्नान for स्नान-, while I. and some others substitute -निग्रह for -निग्रहाः. ६ B D and the text read -ऽप्रमादता for -ऽप्रमादिताः. ७ B. and D read अथ for अत्र, while H. व्रतचय, C. and F व्रतचर्यं for ब्रह्मचर्यं ८. C F. and G. substitute तथा for तयो, while except G. and J. read अपुनरुक्ति for पुनरुक्ति. ९ J reads अकल्पत्वम् for अकल्कत्वम्.

इति । मनुरपि—

'अहिंसां सत्यमक्रोधमार्जवं च समाचरेत् । (२२२)
त्रिरह्नि त्रिर्निशायां च सवासा जलमाविशेत् ।
स्त्री-शूद्र-पतितांश्चैव नाभिभाषेत कांहिचित् ॥ (२२३)
स्थानासनाभ्यां विहरेदशक्तोऽधः शयीत वा ।
ब्रह्मचारी व्रती च स्याद् गुरु-देव-द्विजार्चकः ॥(२२४)
सावित्रीं च जपेन्नित्यं पवित्राणि च शक्तितः ।
सर्वेष्वेव व्रतेष्वेवं प्रायश्चित्तार्थमादृतः' ॥ (२२५)
( म. स्मृ. ११. २२२–२२५ )

इति । तत्र प्राजापत्यव्रतलक्षणमाह हारीतः—

'त्र्यहं सायं त्र्यहं प्रातस्त्र्यहमद्यादयाचितम् ।
परं त्र्यहं वायुभक्ष एष कृच्छ्रः प्रजापतेः' ॥

इति । मनुरपि—

'त्र्यहं* प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम् ।
त्र्यहं परं तु नाऽश्नीयात् प्राजापत्यं चरन्द्विजः' ॥
( म. स्मृ. ११. २११ )

---

* अत्र द्वौ पक्षौ । तत्र प्रथमः स्वस्थानविवृद्धिपक्षोऽयं मनुना दर्शितः—'त्र्यहं प्रातर्भोजनं त्र्यहं सायमेवं भोजनं । त्र्यहमयाचितभोजनमिति एक एव नियमः दिनत्रयं धार्य इत्युक्तमतस्तस्य वृद्धिःस्वस्थान एव भवति ।

---

१. The following quoted verses are not found in the MS of the text of Manu २. B C. D E. F. and G. read त्रिरह for त्रिरह्नि, while G reads आदिशेत् for आविशेत् ३ I reads अक्रोधो for अक्रोधं ४. G. reads स्वशक्तत for च शक्तित ५. B and D read आहूतः, I. and J. आदृता for आदृत. ६. I reads अत्र for तत्र. ७. I. reads प्रजापति for प्रजापतेः. ८. B. D. and J do not insert मनुरपि ; while B. substitutes अस्यैनुरपि. This may be the writer's mistake. ९. The text reads च for तु. १०. G. reads चरेत् for चरन्.

इति। अस्यैवाधिकारिभेदेन प्रयोगान्तरमाह वसिष्ठः—

'अहः प्रातरहर्नक्तमहमेकमयाचितम्।
अहः पराकं तत्रैकमेवं चतुरहौ परौ॥
अनुग्रहार्थं विप्राणां मनुर्धर्मभृतां वरः।
बाल-वृद्धा-ऽऽतुराणां* च शिशुकृच्छ्रमुवाच ह'॥
(व. स्मृ. २३. ४२–४३)

इति। एतदुभयमपि प्राजापत्यकृच्छ्रं दर्शयति याज्ञवल्क्यः—

'एकभक्तेन नक्तेन तथैवायाचितेन च।
उपवासेन चैकेन[1] पादकृच्छ्रः प्रकीर्तितः॥
यथाकथंचित्त्रिगुणः प्राजापत्योऽयमुच्यते'॥
(या. स्मृ. ३. ३१९. ३२०)

---

द्वितीयः दण्डकलितवदावृत्तिपक्षोऽयं वसिष्ठेन दर्शितः—
तत्र प्रथमे ऽह्नि प्रातरेवैकवारं हविष्यान्नभोजनं कार्यम्। द्वितीये ऽह्नि सायमेकवारमेव न दिवा। तृतीये ऽह्नि एकवारमयाचितमश्नीयात्। अत्र सर्वत्र भोजनं परिमितमेव कार्यम्। न यथेष्टम्। प्रायश्चित्तार्थत्वात्। चतुर्थे ऽह्नि पराकम्। तल्लक्षणं पूर्वमेवोक्तम्। एव प्रथमं चतुरहमतीत्य द्वितीयं तृतीयमपि चतुरहमेवमेव निर्वर्तयेदेवं द्वादशदिनसाध्योऽयं कृच्छ्र'।

* यथाह मनुः—

'चतुरः प्रातरश्नीयात् पिण्डान् विप्रः समाहितः।
चतुरोऽस्तमिते सूर्ये शिशुचान्द्रायणं स्मृतम्'॥

इत्याद्यनुसन्धेयम्।

---

१. The text reads बाल-वृद्धा-ऽऽतुरेष्वेव for बाल वृद्धा-ऽऽतुराणां च २. E. reads वैकेन and the text चैवाद्यं both for चैकेन.

इति । एकभुक्तेन दिवैव सकृद्भोजनेन । नैक्तेन रात्रौ सकृद्भोजनेन । अयाचितेन न विद्यते याचितं यस्मिन् भोजने तदयाचितम् । तेन । अत्र कालविशेषाप्रतीतेर्दिवा रात्रौ वा सकृद्भोजनेन । उपवासेन चैकेन एकस्मिन् दिनेऽनशनेन च पादकृच्छ्रो भवति । अयमेव पादकृच्छ्रः स्वस्थानविवृद्ध्या वा दैण्डकलितवदावृत्त्या वा यथा कथंचिन्निगुणः निरभ्यस्तः प्राजापत्य इत्युच्यते इत्यर्थः । एकभक्तादिषु ग्राससङ्ख्या आपस्तम्बेन दर्शिता—

'सायं द्वाविंशतिर्ग्रासाः प्रातः षड्विंशतिःस्मृताः ।
चतुर्विंशतिरभ्याद्याः परं निरशनं स्मृतम् ' ॥
( आ. स्मृ. १. २९ )

इति । तत्परिमाणमपि तेनैवोक्तम्—

'कुक्कुटाण्डप्रमाणं तु यथा वाऽऽस्यं विशेत्सुखम्' ।
(आ. स्मृ. १. ९०)

इति । चतुर्विंशतिमते तु प्रकारान्तरेण सङ्ख्या श्रूयते—

' प्रातस्तु द्वादश ग्रासाः सायं पञ्चदशैव तु ।
अयाचिते च द्वावष्टौ परं वै मारुताशनः' ॥

इति । अत्र शक्त्यपेक्षया व्यवस्था द्रष्टव्या । आपस्तम्बस्तु चतुरः पादकृच्छ्रान् कृत्वा तेषां वर्णभेदेन व्यवस्थामाह—

---

१. B. and D omit नक्तेन रात्रौ सकृद्भोजनेन २ Except A and I read दण्डकरितवत् for दण्डकलितवत् ३ B C D. E. F. G. and H. substitute मता for स्मृताः ४ G. reads चतुर्विंशतिरात्रौ च for चतुर्विंशतिरभ्याद्याः. ५ G. and I. omit तु. ६. G. substitutes वा for च and reads व्यहं च, C. and F. read व्यह वा and J. व्यहे वा all for परं वै, while B. and D. अहं वै for the same.

'त्र्यहं निरशनं पादः पादश्चायाचितं त्र्यहम्।
सायं त्र्यहं तथा पादः पादः प्रातस्तथा त्र्यहम् ॥ (१३)
प्रातःपादं चरेच्छूद्रः सायं वैश्यस्य दापयेत्।
अयाचितं तु राजन्ये त्रिरात्रं ब्राह्मणे स्मृतम्' ॥ (१५)
( आ. स्मृ. १. १३–१५ )

इति। अर्धकृच्छ्र-पादोनकृच्छ्रयोरपि स्वरूपं स एवाह—

'सायं-प्रातर्दिनार्धं स्यात् पादोनं नक्तवर्जितम्'।
( आ. स्मृ. १. १४ )

इति। अयमर्थः। अयाचितोपवासे-त्र्यह-द्वयानुष्ठानेनार्ध-कृच्छ्रो भवति। नक्तत्र्यहव्यतिरिक्तत्र्यहत्रयानुष्ठानेन पादोनकृच्छ्रो भवति। अर्धकृच्छ्रप्रकारोऽपि तेनैवोक्तः—

'सायं प्रातस्तथैवोक्तं दिनद्वयमयाचितम् ॥
दिनद्वयं तु नाऽश्नीयात् कृच्छ्रार्धं तद्विधीयते'।
( आ. स्मृ. ९. ४१–४२ )

---

१. The text reads पादात् for पाद २ G reads तत for पाद ३ B. and D. read अयाचिते त्र्यहम्, C. and F अयाचितं त्र्यहे both for अयाचित त्र्यहम्, while H. reads अयाचन त्र्यहम् for the same. ४. The text reads this line thus —

पाद साय त्र्यहं पाद प्रातर्भोज्य तथा त्र्यहम्।

५. E and J. read पाद for साय. ६. The text reads ब्राह्मणस्य च for ब्राह्मणे स्मृतम् ७. The text reads this line thus :—

प्रात साय दिनार्धं च पादोन सायवर्ज्जितम्।

८. Except A. and I read अयाचितोपवासयोरुभय-द्वया- for अयाचितोपवास-त्र्यह-. ९. The text reads this verse as follows —

'साय प्रातस्त्वहोरात्र पाद कृच्छ्रस्य तं विदु ॥
सायं प्रातस्तथैवैक दिनद्वयमयाचितम्'।

इति । अत्रापि शक्त्यपेक्षया व्यवस्था द्रष्टव्या । यत्तु जप-होमादिबह्वङ्गसहितं प्राजापत्यकृच्छ्रं गौतमेनाभिहितम्—

'हविष्यान् प्रातराशान् भुक्त्वा[1] तिस्रो रात्रीर्नाश्नीयात् । (२) अथापरं त्र्यहं नक्तं भुञ्जीत । (३) अथापरं त्र्यहं न कञ्चन याचेत । (४) अथापरं[3] त्र्यहमुपवसेत् । (५) तिष्ठेद्दहनि, रात्रावासीत । (६) क्षिप्रकामः । (७) सत्यं वदेत् । (८) अनार्यैर्न[4] सम्भाषेत । (९) रौरव-यौधाजपे *नित्यं प्रयुञ्जीत । (१०) अनुसवनमुदकोपस्पर्शनमापोहिष्ठेति तिसृभिः पवित्रवतीभिर्मार्जयीत[5] । (११) हिरण्यवर्णाः शुचयः पावका इत्यष्टाभिः । (१२) अथोदकतर्पणम् । (१३) ॐ नमो हेमाय[6] मोहमाय संहमाय धुन्वते तापसाय पुनर्वसवे[7] । (१४) नमो नमो

---

* रौरव-यौधाजपे सामनी 'पुनानः सोमधारया' इत्यस्यामृचि गीते । ते च नित्यं प्रयुञ्जीत गायेतेत्यर्थः । केचनात्र 'नित्यं पुनः प्रयुञ्जीत' इत्यपि पठन्ति । विज्ञानेश्वरस्तु—'रौरवयोधा जपेत्' इत्यमेव पठति ।

---

१ B. and D. read प्रातराशात् भुक्त्वा and H substitutes भुक्त्वा for भुक्त्वा. २ B. D. G. and J substitute तथापर for अथापर ३ I reads -अनार्यै for अनार्यैः. ४. Except A. and the text all others read यौधाजये, while B and D. read- यौवाजये for the same. ५. The text reads मार्जयेत् and I. मार्जयित्वा for मार्जयीत. ६. We consult here the five manuscripts of the text. Except A and these manuscripts all others read नमो हमाय मोहमाय and I. नमो हमाय सहमाय both for नमो हमायमोहमाय संहमाय; while G. omits मोहमाय and reads गूहमाय for सहमाय. ७. G. reads पुनर्वासाय for पुनर्वसवे.

मौञ्जायोर्म्यायं वसुविन्दाय सर्वविन्दायै नमो
नमः पाराय सुपाराय महापाराय पारदाय पार-
यिष्णवे । (१५) नमो नमो रुद्राय पशुपतये
महते देवाय त्र्यम्बकायैकचरायाधिपतये ह-
राय शर्वायेशानायोग्राय वज्रिणे घृणिने कप-
र्दिने । (१६) नमो नमः सूर्यायादित्याय ।
(१७) नमो नमो नीलग्रीवाय शितिकण्ठाय ।
(१८) नमो नमः कृष्णाय पिङ्गलाय । (१९)
नमो नमो ज्येष्ठाय श्रेष्ठाय वृद्धायेन्द्राय हरि-
केशायोर्ध्वरेतसे । (२०) नमो नमः सत्याय
पावकाय पावकवर्णाय कामाय कामरूपाय ।
(२१) नमो नमो दीप्ताय दीप्तरूपिणे । (२२)
नमो नमस्तीक्ष्णाय तीक्ष्णरूपिणे । (२३) नमो
नमः सौम्याय सुपुरुषाय महापुरुषाय मध्यम-
पुरुषाय उत्तमपुरुषाय ब्रह्मचारिणे । (२४)

---

१ Except A and the text others do not repeat नम. २ I. reads ऊर्म्याय for ऊर्म्यायं, but it seems wrong ३ G. and I. omit सर्वविन्दाय. ४ G and I omit नमो and I reads नम पराय महापराय परदाय omitting सुपाराय The text omits पारदाय. G omits महापाराय and substitutes वरदाय for पारदाय ५ Except A and the text all others do not repeat नम. ६ Except A I and the text all others read हरये for हराय; while B and D omit शर्वाय E and H. read साम्बाय and I ईश्वराय all for शर्वाय. ७. Except A. and the text all others omit नम throughout. ८. D and I. read नीलकण्ठाय शितिकेशाय for नीलग्रीवाय शितिकण्ठाय; while B E. G H J. read नीलकण्ठाय for नीलग्रीवाय. ९ I. reads पावकसर्गाय for पावकवर्णाय. १०. Except J. and the text all others do not insert महापुरुषाय.

नमो नमश्चन्द्रललाटाय कृत्तिवाससे पिनाकहस्ताय नमो नम इति। (२५) एतदेवादित्योपस्थानम्। (२६) एता एवाज्याहुतयः। (२७) द्वादशरात्रस्यान्ते चरुं श्रपयित्वैताभ्यो देवताभ्यो जुहुयात्। अग्नये स्वाहा सोमाय स्वाहा अग्नीषोमाभ्यामिन्द्राग्निभ्यामिन्द्राय विश्वेभ्यो देवेभ्यो ब्रह्मणे प्रजापतये अग्नये स्विष्टकृते इति। (२८) अन्ते ब्राह्मणभोजनम्'। (२९)

(गौ. स्मृ. २७. २–२९)

इति। हविष्यानित्याद्युपवसेदित्यन्तेन प्राजापत्यस्य स्वरूपमुक्तम्। तिष्ठेदित्यादिना तस्यैवेतिकर्तव्यतोच्यते। अहनि तिष्ठेदित्यनेन भोजनाद्यविरुद्धकालेषु अहरुत्थित एव स्यात्। रात्रावासीतेत्यनेन निद्राया आवश्यकत्वात् तामारीन एव सेवेतेत्युक्तं भवति। क्षिप्रकामोऽपि भवेत्। शीघ्रं शुद्धः स्यामिति सञ्जातकामोऽपि भवेदित्यर्थः। अथवा शीघ्रं शुद्धिकामोऽहनि तिष्ठेद्रात्रावासीतेत्यर्थः।

---

१ Except the text all others omit पिनाकहस्ताय नमो नम इति। २. I omits एव ३ B. and D. omit देवताभ्यो ४ I omits इन्द्राग्निभ्याम् ५. The text reads ब्राह्मणतर्पणम् for ब्राह्मणभोजनम् ६ Except A and I all others omit इत्यनेन. ७ G reads अनावश्यकत्वाद् for आवश्यकत्वात् ८. B D. and H. read स्यादिति for स्यामिति.

एव सत्यं वदेदित्याद्यङ्गकलापे क्षिप्रकाम इति अधिकारिविशेषणमनुषङ्गनीयम्। अनेन यः शनैः शनैः शुद्धो भवामीति मन्यते तस्य नाय नियम इति अवगम्यते। रौरवयौधाजपे सामनी। नमोऽहमायेत्यादयस्त्रयोदश मन्त्रास्तर्पणसूर्योपस्थाना-ऽऽज्यहोमेषु द्रष्टव्याः। अथवा सम्प्रदानविभक्त्यन्ताः षट्पञ्चाशन्मन्त्राः। तर्पणमनुसवनं कर्तव्यम्। स्नानाङ्गत्वात्तर्पणस्य। तथा च भृगुः—

'नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते।
तर्पणं त्रिविधस्याङ्गमेष एव विधिः सदा' ॥

इति। आदित्योपस्थाना-ऽऽज्यहोमौ तु प्रतिदिनं सकृत् सकृत् कार्यौ। 'अथोदकतर्पणमादित्योपस्थानमाज्यहोमश्च'—इति वक्तव्ये

'एतदेवादित्योपस्थानम्। एता एवाज्याहुतयः'।

इति पृथग्योगकरणात्। शिष्टं स्पष्टम्। एतद्वारीताद्युक्त-

---

* वसिष्ठोऽप्येवमेवाह—
'हविष्यान् प्रातराशास्त्रीन् सायमाशास्तथैव च'।
इत्याद्युक्त्वा—
'रात्रौ जलाशये व्युष्टः प्राजापत्येन तत्समम्' ॥ (१७)
(व. स्मृ. १७–१७)
इत्यादिना।

---

१. B. C D E F G do not repeat शनै २ B. and D omit मन्त्रा ३ G substitutes मनु for भृगु ४ B D and H do not repeat सकृत्. while I. substitutes कर्तव्यौ for कार्यौ. ५ G. and I. omit एव.

जप-होमाद्यङ्गरहितप्राजापत्यद्वयस्थाने[1] वेदितव्यम्। बहुप्रयास-साध्यत्वेनातिगुरुत्वात्। अथवा येषां शूद्रादीनां मन्त्राधिकारो[2] नास्ति तेषां जप-होमादिरहितं[3] प्राजापत्यं वेदितव्यम्। अत-एवोक्तमङ्गिरसा—

'तस्माच्छूद्रं समासाद्य सदा धर्मपथे स्थितम्[4]।
प्रायश्चित्तं प्रदातव्यं जप-होमविवर्जितम्' ॥

इति। येषां ब्राह्मणादीनां जप-होमादिष्वधिकारस्तेषां गौ-तमोक्तं वेदितव्यम्॥

अथातिकृच्छ्रः।

तस्य[5] लक्षणमुक्तं चतुर्विंशतिमते—

'एकैकं ग्रासमश्नीयात् त्र्यहाणि त्रीणि पूर्ववत्।
त्र्यहं[6] चोपवसेन्नित्यमतिकृच्छ्रं चरन् द्विजः' ॥

इति। एकभक्त-नक्ता-ऽयाचितदिवसेषु नवस्वेकैकं ग्रासम-श्नीयात् त्र्यहं चोपवसेत्। एवं चातिकृच्छ्रो भवतीत्यर्थः। यत्तु याज्ञवल्क्येनोक्तम्—

'अयमेवातिकृच्छ्रः स्यात् पाणिपूरान्नभोजनैः[7]'।

( या. स्मृ. ३. ३२० )

---

१ B C D F G and H read -द्वयेन व्यवस्थाने for -द्वयस्थाने, while H and J -द्वयव्यवस्थाने for the same, but H gives marginal reading -द्वयस्थाने २ B D G and J read चाधिकारो, C. and F. वाधिकारो both for मन्त्राधिकारो, while G omits शूद्रादीना ३. B C. D F. and G read जप-होमादिक for जप-होमादिरहित ४. B. and D. read स्थित for स्थितम. ५. G. omits तस्य ६ C F and I. read अह for त्र्यह; while H. reads चरेदिति, G and I. चरेद् द्विज. for चरन् द्विज. ७. H and I read -भोजने for -भोजन

इति—अयमेव प्राजापत्यकृच्छ्रः एकभक्त-नक्तायाचितदिवसेषु नवसु पाणिपूरान्नभोजनयुक्तोऽतिकृच्छ्रो भवतीत्यर्थः। तदेतदशक्तविषयम्। पाणिपूरान्नस्य ग्रासपरिमितादन्नादधिकपरिमाणत्वात् ॥

अथ कृच्छ्रातिकृच्छ्रः।

तस्य लक्षणं याज्ञवल्क्येनोक्तम्—

'कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिम्'।

(या. स्मृ. ३, ३२१)

इति। विष्णुरपि—

'कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिक्षपणम्'।

(वि. स्मृ. ४६. १३)

इति। यत्तु गौतमः—

'अब्भक्षस्तृतीयः सं कृच्छ्रातिकृच्छ्रः'।

(गौ. स्मृ. २७. ३२)

इति एकभक्त-नक्तायाचितदिवसेषु यो भोजनकालः तस्मिन्नेव काले केवलमुदकेन वर्तनं कृच्छ्रातिकृच्छ्रो भवतीति तदेतच्छक्तविषयम्। अतिकृच्छ्र-कृच्छ्रातिकृच्छ्रयोरपि प्राजापत्यकृच्छ्रोक्तेतिकर्तव्यता द्रष्टव्या।

---

१. G and I read this —

कृच्छ्रातिकृच्छ्र पयसा दिवसानेकविंशतिम्।,

but I adds इति and reads क्षपयेदिति शेष for-क्षपणम् २ We follow here A. and the text; while all others omit स.

'एतेनैव* कृच्छ्रातिकृच्छ्रौ व्याख्यातौ'।

(गौ स्मृ. २७. ३१)

इति गौतमस्मरणात्। पराकलक्षणमाह यमः[1]—

'द्वादशाहं निराहारो यतात्मा[3] संशितव्रतः।
कृच्छ्रः पराकनामैष सर्वपापप्रणाशनः'॥

इति। पर्णकृच्छ्रलक्षणमाह याज्ञवल्क्यः—

'पर्णोदुम्बर-राजीव-बिल्वपत्र-कुशोदकैः।
प्रत्येकं प्रत्यहं पीतैः पर्णकृच्छ्र उदाहृतः'॥

(या. स्मृ. ३. ३१७)

---

* इद सर्वथा मूलविरुद्धमिवेति प्रतिभाति। मूले तु, एकोनत्रिंशद्भिः सूत्रैः पूर्वं कृच्छ्रमभिधाय अनन्तरम्—

'एतेनैवातिकृच्छ्रो व्याख्यातः'।

इत्यनेन द्वितीयमतिकृच्छ्रमभिधाय—

'अब्भक्षस्तृतीयः स कृच्छ्रातिकृच्छ्रः'।

इत्यनेन तृतीयः कृच्छ्र उक्तः। तत्कथमय पाठः सङ्गच्छत इति चिन्तनीयं विद्वद्भिः।

---

१ The text reads अतिकृच्छ्रो व्याख्यात for कृच्छ्रातिकृच्छ्रौ व्याख्यातौ २ E G and I substitute -वचनात् for -स्मरणात् C and F omit यम, while G omits the following portion —

'द्वादशाह निराहारो यतात्मा सशितव्रत।
कृच्छ्र पराकनामैष सर्वपापप्रणाशन'॥

इति। पर्णकृच्छ्रलक्षणमाह याज्ञवल्क्य —

'पर्णोदुम्बर राजीव-बिल्वपत्र कुशोदकै।
प्रत्येक प्रत्यह पीते पर्णकृच्छ्र उदाहृत'॥

इति। पलाशोदुम्बरराजीवबिल्वपर्णानामेकैकेन कथितमुदक प्रत्यह पिबेत। कुशोदक चैकस्मिन्नहनीति। पर्णकृच्छ्रस्य लक्षणान्तरमाह यम —

३ B C. D F and H. read जितात्मा for यतात्मा, while some read ह्रासित- for सशित-

इति। पलाशोदुम्बरारविन्द-बिल्वपर्णानामेकैकेन क्वथितमुदकं प्रत्यहं पिबेत्। कुशोदकं चैकस्मिन्नहनीति। पर्णकृच्छ्रस्य लक्षणान्तरमाह यमः—

'एतान्येव समस्तानि त्रिरात्रोपोषितः शुचिः।
क्वाथयित्वा पिबेदद्भिः पर्णकृच्छ्रो विधीयते'॥

इति। यदा पलाशादिपत्राण्येकीकृत्याम्भसा क्वाथयित्वा त्रिरात्रोपवासान्ते क्वथितं तत्पिबेत् तदा पर्णकृच्छ्रो भवतीत्यर्थः। फलकृच्छ्रादीनां स्वरूपमाह मार्कण्डेयः—

'फलैर्मासेन कथितः फलकृच्छ्रो मनीषिभिः।
श्रीकृच्छ्रः श्रीफलैः प्रोक्तः पद्माक्षैरपरस्तथा॥
मासेनामलकैरेवं श्रीकृच्छ्रमपरं स्मृतम्।
पत्रैर्नतः पत्रकृच्छ्रः पुष्पैस्तत्कृच्छ्र उच्यते॥
मूलकृच्छ्रः स्मृतो मूलैस्तोयकृच्छ्रो जलेन तु'।

इति। यदा बिल्वादिफलान्यम्भसा क्वाथयित्वा मासमेकं तदम्भः पिबति तदा फलकृच्छ्रो भवति। यदा बिल्व-पद्माक्ष-मूलानामन्यतमस्य क्वाथं मासं पिबेत्तदा पत्र-पुष्प-मूलकृच्छ्राणि भवन्ति।

---

१ Except A, all others do not insert कुशोदकं चैकस्मिन्नहनीति In connection with this omission the editor of the Calcutta edition of this work published in B. Indica Series, is quite misled, he writes in foot-note, page 465 "इत्थमेव पाठः सर्वत्र बिल्व-पर्ण-कुशानामेकैकेन—इति तु भवितुं युक्तम्"। २. Except A. and I. others read लक्षणमाह for लक्षणान्तरमाह ३. G. does not insert the commentary of this Sloka, ४. G. reads यदि for यदा ५. H. reads यदि for यदा.

वारुण-स्त्रीकृच्छ्रयोर्लक्षणमाह यमः—

'ब्रह्मचारी जितक्रोधो मासेऽप्युदकसक्तुकान् ।
पिबेच्च नियताहारः कृच्छ्रं वारुणमुच्यते ॥
त्र्यहं पिबेत्तु गोमूत्रं त्र्यहं वै गोमयं पिबेत् ।
त्र्यहं वै यावकेनैव स्त्रीकृच्छ्रं ह्येतदुच्यते' ॥
(य. स्मृ. ५. ३१)

इति । सौम्यकृच्छ्रस्वरूपमाह याज्ञवल्क्यः—

'पिण्याका-ऽऽचाम-तक्रा-ऽम्बु-सक्तूनां प्रतिवासरम् ।
एकरात्रोपवासश्च कृच्छ्रः सौम्योऽयमुच्यते' ॥
(या. स्मृ. ३. ३२२)

इति । आचाम ओदननिःस्रावः । पिण्याकादीनां पञ्चानामेकैकं प्रतिदिनमुपभुज्य षष्ठेऽहन्युपवसेत् । एष सौम्यकृच्छ्रः । यत्तु जाबालेन चतुरहव्यापी सौम्यकृच्छ्र इत्युक्तम्—

---

१ Only I reads वारुणीश्रीकृच्छ्र- for वारुण-स्त्रीकृच्छ्र- २ C and F. read मासेषु for मासेऽपि, while I जितक्रोध आमिक्षोदकसक्तुकान् for जितक्रोधो मासेऽप्युदकसक्तुकान् ३ B omits —

मुच्यते ।
त्र्यह पिबेत्तु गोमूत्र त्र्यह वै गोमय पिबेत् ।
त्र्यह वै यावकेनैव स्त्रीकृच्छ्र ह्येतदुच्यते ॥.

४, I reads श्रीकृच्छ्र, while H. तु तदुच्यते for ह्येतदुच्यते ५ B D G. and H. omit -स्वरूपम् ६ J. omits the following —

'पिण्याका-ऽऽचाम-तक्राम्बु-सक्तूना प्रतिवासरम् ।
एकरात्रोपवासश्च कृच्छ्र. सौम्योऽयमुच्यते' ॥
इति। आचाम ओदननि.स्राव

७. C, and F omit the following —

पिण्याकादीना पञ्चानामेकैक प्रतिदिनमुपभुज्य षष्ठेऽहन्युपवसेत् । एष सौम्यकृच्छ्र । यत्तु जाबालेन चतुरहव्यापी सौम्यकृच्छ्र इत्युक्तम्

८. G reads उपभुज्य for उपभुज्य

'पिण्याकं सक्तवस्तक्रं चतुर्थेऽह्न्यभोजनम्।
वासो वै दक्षिणां दद्यात् सौम्योऽयं कृच्छ्र उच्यते' ॥

इति तदेतदशक्तविषयम् ॥

अथ तुलापुरुषः।

तत्र जाबालिः—

'पिण्याकं च तथाऽऽचामं तक्रं चोदकसक्तवः।
त्रिरात्रमुपवासश्च तुलापुरुष उच्यते' ॥

इति। सोयमष्टदिवससाध्यः। याज्ञवल्क्यस्तु पञ्चदश-दिवससाध्यमाह—

'एषां त्रिरात्रमभ्यासादेकैकस्य यथाक्रमम्।
तुलापुरुष इत्येवं ज्ञेयः पञ्चदशाहिकः' ॥
(या. स्मृ. ३. ३२३)

इति। एषां प्रकृतानां पिण्याकादीना पञ्चद्रव्याणाम्। यमस्त्वेकविंशतिदिवससाध्यमाह—

'आचाममथ पिण्याकं तक्रं चोदक-सक्तुकान्।

---

१ B. and D omit एतत्. २ B D G. and J. omit -दश- and read पञ्चदिवससाध्यम् ३. B. and D omit the following.—

'एषां त्रिरात्रमभ्यासादेकैकस्य यथाक्रमम्।
तुलापुरुष इत्येव ज्ञेय पञ्चदशाहिक' ॥

इति। एषां प्रकृतानां पिण्याकादीनां पञ्चद्रव्याणाम्। यमस्त्वेकविंशति-दिवससाध्यमाह ४. The text reads इत्येष. for इत्येव ५. G omits पिण्याकादीना पञ्चद्रव्याणाम्। यमस्त्वेकविंशतिदिवससाध्यमाह—

आचाममथ - - - - - - - - -।

६ B and D read -सक्तुमत्, G.-सक्तवान् J.-सक्तुवान् all for -सक्तुकान्.

त्र्यहं त्र्यहं प्रभुञ्जानो वायुभक्षस्त्र्यहद्वयम् ॥
एकविंशतिरात्रस्तु तुलापुरुष उच्यते[1] ।

इति तदेतत्त्रयं पापतारतम्यविषयतया व्यवस्थापनीयम् । अत्रेतिकर्तव्यतामाह हारीतः—

'अथातस्त्रिणयनोक्तस्य तुलापुरुषस्य कल्पं व्याख्यास्यामः । (६९)
अयाज्ययाजनं कृत्वा प्राश्य मूत्र-पुरीषयोः ।
अप्रतिग्राह्यमादाय याजयित्वा विनिन्दितान् ॥ (७०)
त्रिनायकोपसृष्टस्य महाव्याधिहतस्य च ।
एतत् कृच्छ्रं तुलापूर्षं* महापातकनाशनम् ॥ (७१)
स्वर्गद्वारमिदं पुण्यं महादेवेन निर्मितम्† ।
आचाममथ पिण्याकं तक्रं चोदकसक्तुकान् ॥ (७२)
त्र्यहं त्र्यहं प्रयुञ्जानो वायुभक्षस्त्र्यहद्वयम् ।
वाचा कायेन मनसा कृतानि विविधानि च ॥ (७३)

---

* तुलापुरुषमिति वक्तव्ये तुलापूर्षमित्यार्षम् । छन्दोऽनुरोधाद्वोक्तमिति यथाकथञ्चिद्योजनीयमिति प्रतिभाति ।

† तत्र तावत् तुलापुरुष केन कार्यः? तदाह । अयाज्ययाजनमित्यादि महाव्याधिहतस्य चेत्यन्तेन । एतत् कृच्छ्रमित्यनेन तस्य पापापनोदकत्वमाह । स्वर्गद्वारमित्येनेन परत्रोत्तमलोकप्राप्तिकरत्वमुक्तम् । अत एवायं तुलापुरुष न केवल प्रायश्चित्तार्थमेव कर्तव्य इत्युक्त भवति ।

---

१ B and D read -द्वयहम् for द्वयम् २ We follow here A B and D, while all others read -पुरुष for पूर्ष and G. reads सहपातक for महापातकं. No doubt the form पूर्ष seems incorrect, but in the Vaidik rule it is correct ३ B C D E F G and H read पर त्र्यहम् for त्र्यहद्वयम्, while G reads उपयुञ्जान for प्रयुञ्जानः ४ B C. D. F and G read हतानि विधृतानि च for कृतानि विविधानि च.

आचामस्तानि निर्हन्ति ब्रवश्राद्धं च सूतकम्।
तैक्ष्ण्यं च दारुणं चैतत्केशकीटहतं च यत्॥ (७४)
आखोर्मूत्र-पुरीषं च ब्रह्महस्पृष्टमेव च।
पिण्याकस्तानि निर्हन्ति अस्थि भित्त्वा तु यत् स्थितम्॥(७५)
आहारेषु च ये दोषाः स्नेहदोषाश्च ये क्वचित्।
खरोष्ट्रमुखसंस्पृष्टमुग्रसंस्पृष्टमेव च॥ (७६)
तक्रेण तानि निर्हन्ति यच्चान्यत् श्वावलोकितम्।
कनका-ऽश्व-तिला गावो भूमिराच्छादनं स्त्रियः॥ (७७)
सर्वं पुनाति धर्मात्मा गूढं चोदकसक्तुभिः*। (७८)

ब्रह्महत्यां भ्रूणहत्यां स्वर्णस्तेयं सुरापानं गुरुदाराभिगमनं कन्यादूषणं क्लीबाभिगमनमुदक्याभिगमनं वायुभक्षः पुनाति। (७९)

---

* आचाममथेत्यादि वायुभक्षः पुनातीत्यन्तेन तुलापुरुषकर्तुर्देहशुद्ध्यर्थमधिकारसिद्ध्यर्थं च पूर्वकर्तव्यं तत्फलं चोक्तम्। अनन्तरं गन्धोशीरमयौ इत्यनेन मूर्तिद्वयं कर्तव्यतयोक्तम्।

---

१ I. reads भिक्षां च for तैक्ष्ण्य च; while B. and D. तैक्ष्य for तैक्ष्ण्य २. B. D E. G. H. read ब्रह्मसस्पृष्टम्, C F and J. ब्रह्मसस्पृष्टम् both for ब्रह्महस्पृष्टम्. ३ C and F. read नवश्राद्धं च सूतकम् for अस्थि भित्त्वा तु यत् स्थितम्; while G omits the following:—

- - - - - - - - -अस्थि भित्वा तु यत्स्थितम्।
आहारेषु च ये दोषा स्नेहदोषाश्च ये क्वचित्॥
खरोष्ट्रमुखसस्पृष्टमुग्रसस्पृष्टमेव च।
तक्रेण तानि निर्हन्ति - - - - - - - - - ॥.

४ B and D उग्रसंसृष्ट एव च, C and F. अघसस्पृष्टमेव च and E. and H. उपसस्पृष्टमेव च all for उग्रसस्पृष्टमेव च ५. B. C. D. F. G H and J. read कनकाश्च, E. कनकांश्च both for कनका-ऽश्व-. ६. E. H. I. and J. omit सुरापान. ७. B. and D. omit कन्यादूषण क्लीबाभिगमनमुदक्याभिगमनं

गन्धोशीरमयौ कार्यौ पुरुषौ पलसम्मितौ ।
नदीमृत्तिकया वापि पुरुषौ द्वौ च कारयेत् ॥ (८०)

महापशुर्येन शरेण विद्धो[1]
यद्वा शस्त्रमुभयतो यच्च लक्ष्यम् ।
तेनायसीं सुकृतां कारयित्वा
प्रादेशमात्रामुभयतो जातशिक्याम् ॥ (८१)

सौवर्णी राजतीं वाऽपि तुलां देवीं तु कारयेत् ।
अपि[2] चन्दनवृक्षस्य खदिरस्यापि कारयेत् ।
तस्याऽलाभे तुला कार्या यथा वाऽप्युपपद्यते *॥(८२)

यः[3] पुरुषः पिङ्गलो बभ्रुर्हल-मुसल-चक्रपाणि-
स्तमहं पिङ्गलं चक्र-हल-मुसल-शूल-वज्रपाणि-
मावाहयामि । ( ८३ ) स्वं[4] एत एहि सूत एहि
स्वयाम एहि नाग एहि कृष्णाजिन एहि । (८४)

---

* महापशुर्येन इत्यादि यथावाप्युपपद्यते इत्यन्तेन कस्य द्रव्यस्य कथं वा तुला कार्येत्युक्तम् । यः पुरुष. इत्यादि सत्यवादिनि इत्यन्तेन देवता-पूजनमुक्तम् । देशाना सम्पदमित्यादिना प्रार्थनोक्ता । अग्नये इत्यादि-ना होम उक्त. ।

---

१ We follow here A C. and F , while all others read तच्चन्दनोशीर-मयौ पुरुषौ कारयेत्पदे, B and D substituting यत् for तद् &rd पदे for पदे २ B and D. substitute बद्धो for विद्धो. ३ B and D. read उद्यतो, G. उग्रतो, C. and F. उभयतः, E and F. उपगत all for उभयतो ४. B. D and G omit this line. ५. Except A. C and F all others are mistaken here I. omits य . B. D E. G. H. and I. omit पुरुष पिङ्गलो बभ्रुर्हल मुसल-चक्रपाणिस्तमह and substitute पुरुषं for पुरुष . ६. I. reads स्वसरेहि मातरेहि स्तुषामं for स्वत एहि सूत एहि स्वयाम; while C. and F. omit सूत एहि स्वयाम एहि.

स्वागतमनु स्वागतम्।(८५)भगवते तुलापुरुषाय महादेवायेदमासनमिदं पाद्यमिदमाचमनीयमिदं गन्ध-माल्य-धूप-दीपं-नैवेद्यं प्रतिगृहाण प्रसीद देव तुभ्यं नमः। (८६) अक्रुद्धः सुमना भव। (८७) अथ तुलामभिमन्त्रयेत्। (८८) ऋषि-सत्यं ब्रह्मसत्यं देवसत्यं अन्तःसत्यं तेन सत्येन सत्यवादिनि। (८९)

देशानां सम्पदं ब्रूहि कं देशं वर्धयिष्यसि ?।
बीजानां सम्पदं ब्रूहि किं बीजं वर्धयिष्यसि ?।
राज्ञां च सम्पदं ब्रूहि कं नृपं वर्धयिष्यसि ?॥ (९०)
अस्माकं सम्पदं ब्रूहि किमस्माकं भविष्यति ?।
यदा तु गुरुमात्मानमसकृत्तुलया धृतम्।
परं चैव लघुं मन्येत् तदा कर्मसमारभेत्॥ (९१)
अग्नये पृथिव्यधिपतये स्वाहा। (९२) वायवेऽन्त-रिक्षाधिपतँये स्वाहा। (९३)

---

१. J omits तुलापुरुषाय २ B D. and G. omit-दीपनैवेद्य, C. and F.-नैवेद्य and E. H and J. substitute-जल्य- for-दीप- and omit नैवेद्य ३. H. reads सम्पदाना सम्पद ब्रूहि किं देशो वर्धयि-ष्यति. B D. G E and J. substitute वर्धयिष्यति for वर्धयिष्यसि. ४ Except A C. and F all others omit this line and the fol-lowing बीजानां सम्पद ब्रूहि किं बीज वर्धयिष्यति. ५ Here also the above manuscripts omit - - - - कं नृप वर्धयिष्यसि ॥ अस्माक सम्पद ब्रूहि - - -. ६. B. D. H. G. I. and J read यदात्मानमसत्कर्तु तुलासमधृत पदम्। यदा च लघु मन्येत - - - - ॥, while E and G read समुद्धृत परम्, H. समपदं धृतम्, I. समधृतं परम् and J समधृत वरम् all for तुलया धृतम्. ७ J. reads अन्तरिक्षाय for अन्तरिक्षाधिपतये and omits सूर्याय दिवोधिपतये स्वाहा.

सूर्याय दिवोऽधिपतये स्वाहा[1]। (९४) सोमाय नक्षत्राधिपतये स्वाहा । (९५) वासुकये नागाधिपतये स्वाहा। (९६) कुबेराय यक्षाधिपतये स्वाहा। (९७) इन्द्राय देवाधिपतये स्वाहा। (९८) ब्रह्मणे त्रैलोक्याधिपतये स्वाहा। (९९) देव्यै भगाधिपतये स्वाहा। (१००) सालकटंकटाय स्वाहा। (१०१) कूष्माण्डराजपुत्राय स्वाहा । (१०२) विनायकाय स्वाहा। (१०३) महाविनायकाय स्वाहा। (१०४) महामहाविनायकाय स्वाहा। (१०५) वक्रतुण्डाय गणानां पतये स्वाहा। (१०६) धर्माय स्वाहा। (१०७) अधर्माय स्वाहा (१०८) तुलायै स्वाहा।

---

१ B. C D F and G omit the following Sûtras —
सूर्याय दिवोऽधिपतये स्वाहा। सोमाय नक्षत्राधिपतये स्वाहा। वासुकये नागाधिपतये स्वाहा। कुबेराय यक्षाधिपतये स्वाहा। इन्द्राय देवाधिपतये स्वाहा। ब्रह्मणे त्रैलोक्याधिपतये स्वाहा। देव्यै भगाधिपतये स्वाहा.

२ I reads दिनाधिपतये for दिवोऽधिपतये ३ E. H and J also omit the following Sûtras —
वासुकये नागाधिपतये स्वाहा। कुबेराय यक्षाधिपतये स्वाहा। इन्द्राय देवाधिपतये स्वाहा।

४ I reads हलकण्टकाय, J. reads सालकंटपकाय both for सालकटकटाय; while B D and G omit this and the following one Sûtra —
सालकटकटाय स्वाहा। कूष्माण्डराजपुत्राय स्वाहा।

५. B and D. omit the Sûtras as —
महाविनायकाय स्वाहा। महामहा विनायकाय स्वाहा। वक्रतुण्डाय गणाना पतये स्वाहा। धर्माय स्वाहा। अधर्माय स्वाहा। तुलायै स्वाहा। तुलापुरुषाय स्वाहा। देव्यै पुनरागमनाय स्वाहा।

६ Except A and I. all others omit this Sûtra. ७. G and H read गणपतये for गणाना पतये ८ G. omits अधर्माय स्वाहा.

(१०९) तुलापुरुषाय स्वाहा। (११०) देव्यै पुनरागमनाय स्वाहा। (१११)*सकृच्चरित्वा शुचिः पुण्यः कर्मण्यो भवति। (११२) द्वितीयं चरित्वा गाणपत्यं प्राप्नोति। (११३) त्रिश्चरित्वा महादेवस्यावसथं प्राप्नोति। (११४) आषाढ्यां कार्तिक्यां वा फाल्गुन्यां वा पुण्ये नक्षत्रे एष विहितो धर्मः। (११५)

(हा. स्मृ. २८. ६१–११५)

इति ॥

## अथ कृच्छ्राः।

### वारुणकृच्छ्रः।

तत्र वारुणकृच्छ्रमाह यमः—

'ब्रह्मचारी जितक्रोधो मासेऽप्युदकसक्तुकान्।
पिबेच्च नियताहारः कृच्छ्रं वारुणमुच्यते' ॥

इति ॥

### अथाघमर्षणकृच्छ्रः।

अघमर्षणकृच्छ्रमाह विष्णुः—

'अथ कृच्छ्राणि भवन्ति। (१) त्र्यहं नाऽश्नीयात्।

---

*सकृच्चरित्वेत्यादिना फलं कालश्चोक्तः। उत्तानार्थत्वात् प्रतिपदं न व्याख्यातम्।

---

१ G omits तुलापुरुषाय स्वाहा. २ Except I and I all others read कर्मणो for कर्मण्यो. ३ I. reads द्वतीय for द्वि.; while B and D. omit this Sûtra as —

त्रिश्चरित्वा महादेवस्यावसथ प्राप्नोति।

४. C and F read अधासनं and G अवसाय for आवसथं. ५. I. omits वा ६ B and D. read सक्तुमान् for -सक्तुकान् ७. B. D. and H. read अघमर्षणम् for अघमर्षणकृच्छ्रम्.

(२) प्रत्यहं च त्रिषवणं स्नानमाचरेत् । (३) मग्नस्त्रिरघमर्षणं जपेत् । (५) दिवा स्थितास्तिष्ठेत् । (६) रात्रावासीत[2] । (७) कर्मणोऽन्ते पयस्विनीं दद्यात् । (८) इत्यघमर्षणम्[3] ।

(वि. स्मृ. ४६. १–९)

इति । शङ्खस्तु प्रकारान्तरेणाघमर्षणकृच्छ्रमाह[4]—

'त्र्यहं त्रिषवणस्नायी मौनी स्यादघमर्षणम् ।
मनसा त्रिः पठेदप्सु न भुञ्जीत दिनत्रयम् ॥
वीरासनं[5] सदा तिष्ठेत् गां च दद्यात् पयस्विनीम् ।
अघमर्षणमित्येतद् व्रतं[6] सर्वाघसूदनम्' ॥

(शं. स्मृ. १८. १–२)

इति ॥

अथ यज्ञकृच्छ्रः ।

तत्राऽऽहाऽङ्गिराः—

'युक्तस्त्रिषवणस्नायी संयतो[7] मौनमास्थितः ।
प्रातःस्नानसमारम्भं[8] कुर्याज्जप्यं च नित्यशः ॥

---

१ B and D read त्र्यह for प्रत्यह च. २ The text reads रात्रावासीनः for रात्रावासीत. ३ B. and D add गां after पयस्विनीं. ४. B D. and I. omit अघमर्षणकृच्छ्रम्. ५. Except A. I and J all others substitute मुनि. for मौनी, while J शुचि for the same and the text adds more one line and reads these lines thus —

'त्र्यह त्रिषवणस्नाने प्रकुर्यादघमर्षणम् ।
निमज्य नक्त सरिति न भुञ्जीत दिनत्रयम् ॥.

६. Except A. and the text all others omit this line —
वीरासन सदा तिष्ठेद्गा च दद्यात्पयस्विनीम् ।.

७. The text reads कृतं सर्वाघनाशनम् for व्रतं सर्वाघसूदनम्. ८ J. interchanges these three lines, third for the first and reads सम्पन्नो for सयतो. ९. B and D. read-समाचारं for-समारम्भ.

सावित्रीं व्याहृतीश्चैव[1] जपेदष्टसहस्रकम् ।
ॐकारमादितः कृत्वा रूपे रूपे तथाऽन्ततः ॥
भूमौ वोरासने युक्तः कुर्याज्जप्यं सुसंयतः ।
आसीनश्च स्थितो वाऽपि पिबेद्द्रव्यं पयः सकृत् ॥
गव्यस्य[2] पयसोऽलाभे गव्यमेव भवेद्दधि[3] ।
दध्नोऽभावे भवेत्तक्रं तक्राभावे तु यावकम् ॥
एषामन्यतमं यद्यदुपपद्येत[4] तत् पिबेत् ।
गोमूत्रेण समायुक्तं यावकं चोपयोजयेत् ॥
एकाहेन तु कृच्छ्रोऽयमुक्तस्त्वङ्गिरसा स्वयम् ।
सर्वपापहरो दिव्यो नाम्ना यज्ञ इति स्मृतः ॥
एतत् पातकयुक्तानां तथा चाप्युपपातकैः ।
महद्भिश्चापि युक्तानां प्रायश्चित्तमिदं शुभम्[5] ॥
इति ॥

## अथ देवकृच्छ्र ।

देवकृतं[6] कृच्छ्रं दर्शयति यमः—

'यवागूं यावकं शाकं क्षीरं दधि घृतं तथा ।
त्र्यहं त्र्यहं तु प्राश्नीयाद्वायुभक्षः परं त्र्यहम्[7] ॥

---

१. Except A I. and J. all others read व्याहृतिं for व्याहृतीः.
२ C. and F omit the following —

गव्यस्य पयसो ऽलाभे गव्यमेव भवेद्दधि ।
दध्नोऽभावे भवेत्तक्रं तक्राभाव तु यावकम् ॥
एषामन्यतम यद्यदुपपद्येत तत्पिबेत् ।.

३. G. reads पयोदधि for भवेद्दधि. ४. I reads यद्येत् for यद्यत्. ५ G. reads शुभं स्मृतम् for इदं शुभम्. ६. B. and D omit -कृत. ७ G. reads अहं त्र्यह for त्र्यहं त्र्यह ८. The manuscript C. ends here at the word प्राश्नीयात् and the following is colophon —

॥ राम ॥ रामः ॥ श्री ॥ राम ॥ श्री ॥ रामाय नम ॥
श्रीगणेशाय नम ॥ राम. . ~ ~ ~ ~.

and consequently we have no assistance of this manuscript hereafter.

कृच्छ्रं देवकृतं नाम सर्वकल्मषनाशनम् ।
मरुद्भिर्वसुभी रुद्रैरादित्यैश्चरितं व्रतम् ॥
व्रतस्यास्य प्रभावेन विरजस्का हि तेऽभवन्' ।

इति ॥

**अथ यावककृच्छ्रः ।**

यावककृच्छ्रमाह शङ्खः—

'गोपुरीष-यवाभ्यासो मासमेकं समाहितः ।
व्रतं तु यावकं कुर्यात् सर्वपापापनुत्तये' ॥
(शं. स्मृ. १८. १०)

इति । देवलोऽपि—

'यवानामप्सु साधितानां सप्तरात्रं पक्षं मासं वा प्राशनं यावकः । एतेन यावक-पायसौदकानि व्याख्यातानि । यावक-पायसौदकानि प्राजापत्यविधानेन व्याख्यातानि भवन्ति' ।

इति ॥

**अथ प्रसृतियावककृच्छ्रः ।**

अथ प्रसृतियावकः । तत्र हारीतः—

'यं आत्मकृतैः कर्मभिर्गुरुमात्मानं पश्येत् आत्मार्थं प्रसृतियावकं श्रपयेत् । (२१) ततोऽग्नौ

---

१. I. reads गोपुरीष-यवाभ्यां च for गोपुरीष-यवाभ्यास , while the text reads गोपुरीषाशनो भूत्वा मास नित्य for गोपुरीष-यवाभ्यासो मासमेक २ The text reads वार्द्धिक for यावक. ३. Except A. and I all others omit भवन्ति ४. E. G. F. H. and J. read प्रसृत-for प्रसृति ५. B D. and F read अथात्मकृतै , E. and H. अयमात्मकृतै , G. अप्यात्मकृतै all for य आत्मकृतै ; while E. substitutes कर्मकृतैः for कर्मभि and B. D. F. and G omit the same. ६. A. E. F. G. and J. read प्रसृत-for प्रसृति.—

जुहुयात्। (३२) तूदेव बलिकर्म। (३३)
शृतं चाभिमन्त्रयेत्। (३४]
यवोऽसि धान्यराजो वा वारुणो मधुसंयुतः।
निर्णोदः सर्वपापानां पवित्रमृषिभिः स्तुतम् ॥ (३५)
घृतं यवा मधु यवा आपोहिष्ठाऽमृतं यवाः।
सर्वं पुनन्तु मे पापं यन्मया दुष्कृतं कृतम् ॥ (३६)
वाचाकृतं कर्मकृतं मनसा दुर्धिचिन्तितम्।
अलक्ष्मीं कालकर्णीं च सर्वं पुनत मे यवाः ॥ (३७)
माता-पित्रोरशुश्रूषां यौवने कारितां तथा।
श्व-सूकरावलीढं च उच्छिष्टोपहतं च यत् ॥ (३८)
सुवर्णस्तेयं ब्राह्म्यत्वं बालत्वादात्मनस्तथा।
ब्राह्मणानां परीवादं सर्वं पुनत मे यवाः ॥ (३९)
श्रूयमाणे रक्षां कुर्यात्।(४०)नमो रुद्राय भूता-
धिपतये द्यौः सावित्री मानस्तोकेति पात्रे त्रिर्नि-
षिच्य 'ये देवा मनोजाता मनोयुजः सुदक्षा दक्ष-
पितरस्ते नः पान्तु ते नोऽवन्तु तेभ्यो नमस्तेभ्यः

---

१ G. and H. read श्रुत for शृत and G. and J substitute वा for च. २. I reads पवित्र ऋषिभि स्तुत for पवित्रमृषिभि स्तुतम्, but the Vaidik Brahmins read in the Śrāddha ceremony this mantra पवित्रमृषिभि स्तुतम् ३. B D. E and G. read पुनातु पुनन्तु, while G substitutes सर्वं for सर्वं ४ B and D read यौवनात्, while E F G H and J. read यौवने, the latter for यौवने ५ B D and G read ब्राह्मित्व, चात्मज; while G. ब्राह्मत्व for ब्राह्म्यत्व and बालत्व, चात्मान J बाधित्वाचाऽन्त्यज all for बालत्वादात्मन. ६ B D and G read श्रव्यमाण-F श्रव्यमार्ण, E वेक्ष्यमाण and H and I वक्ष्यमाणा all for श्रूयमाणे ७. All others except A and I omit त्रि ८ B and D. read मनोयुजा and E. F. H मनोयुवाः for मनोयुज ९. E F and H. read दक्षपितरः (?) for दक्षपितर.

स्वाहा'—इत्यात्मनि जुहुयात्*[1]। (४१) त्रिरात्रमेवा[2]र्थार्थी। पापकृ[3]त् षड्रात्रं पीत्वा पूतो भवति (४२) सप्तरात्रं महापातकी। (४३) द्वादशरात्रं पीत्वा सर्वं पुरुषकृतं पापं निर्दहति। (४४) निःसृतानां यवाना[4]मेकविंशतिरात्रं पीत्वा गणान् पश्यति। (४५) गणाधिपतिं पश्यति। (४६) विद्यां पश्यति। (४७) विद्याधिपतिं पश्यति। (४८) योऽग्नीयाद्यावकं पक्वं गोमू[5]त्रे सकृदधि-क्षीर-सर्पिः प्रमुच्यते सोऽहँसः क्षणादित्याह भगवान् मैत्रावरुणिः'। (४८)

(हा. स्मृ. २८. ३२–४८)

इति। इत्थं प्राजापत्यादिव्रतानि निरूपितानि॥

अथ व्रतग्रहणप्रकारः।

तत्र विष्णुः—

'सर्वपापेषु सर्वेषां व्रतानां विधिपूर्वकम्।
ग्रहणं सम्प्रवक्ष्यामि प्रायश्चित्ते चिकीर्षिते'॥

---

*यवोऽसीत्यादिना प्रार्थनोक्ता। नमो रुद्रायेत्यादयो हवनमन्त्राः। हवनं च स्वात्मन्येव। त्रिरात्रमेवेत्यादिना काम्यत्वनिर्देशपूर्वकं प्रायश्चित्तार्थत्वेन फलमुक्तम्।

---

१. G reads त्रिरात्रमेवार्थी for त्रिरात्रमेवार्थार्थी. २ Except A and I all others read पापकृतः for पापकृत् ३. G reads निर्हरति for निर्दहति. ४. G reads गोमूत्र- for गोमूत्रे ५ The Manuscript F. ends here and following is colophon —

इति श्रीमहाराजाधिराज-परमेश्वर-वैदिकमार्गप्रवर्तक-श्रीवीरबुक्कभूपाल-साम्राज्यधुरधरस्य माधवामात्यस्य कृतौ पाराशरस्मृतिव्याख्यायां माधवीयाभे नाम द्वादशोऽध्यायः॥ १२॥
श्रीशुभ भवतु॥ :॥

दिनान्ते नख-रोमाद्दीन् प्रवाप्य स्नानमाचरेत्।
भस्म-गोमय-मृद्दारि-पञ्चगव्यादिकल्पितैः॥
मलापकर्षणं कार्यं बाह्यशौचोपसिद्धये।
दन्तधावनपूर्वेण पञ्चगव्येन संयुतम्॥
व्रतं निशामुखे ग्राह्यं बहिस्तारकदर्शने।
आचम्यातःपरं मौनी ध्यायन् दुष्कृतमात्मनः॥
मनःसन्तापनं तीव्रमुद्वहेच्छोकमन्ततः'।
(वि. स्मृ. ३. २१–२९)

इति। बहिः ग्रामान्निष्क्रम्येत्यर्थः। पूर्वेद्युर्निशामुखे व्रतं परिषदुद्दिष्टप्रकारेण सङ्कल्प्य परेद्युस्त्रिषवणस्नान-प्रातर्होमाद्यङ्गसहितं व्रतमनुष्ठातुमारभेत्। प्रातर्होमाद्यङ्गानि च जाबालेन दर्शितानि–

'आरम्भे सर्वकृच्छ्राणां समाप्तौ च विशेषतः।
आज्येनैव हि शालाग्नौ जुहुयादाहुतीः पृथक्॥
श्राद्धं कुर्याद्व्रतान्ते च गो-हिरण्यादिदक्षिणाम्'।

इति। यमोऽपि–

'पश्चात्तापो निवृत्तिश्च स्नानं चाङ्गतयोदितम्।
नैमित्तिकानां सर्वेषां व्रतानां विधिपूर्वकम्॥

---

१ B. and D. read ग्राह्यशौचोपसिद्धये for बाह्यशौचोपसिद्धये २ J. reads एतां निशामये for व्रत निशामुखे. ३ G reads आरम्भ for आरम्भ. ४. B. and D. substitute वै for च and -दक्षिणा for -दक्षिणाम्. ५ B and D. read पश्चात्तापौ निवृत्तश्च for पश्चात्तापो निवृत्तिश्च

गात्राभ्यङ्गं शिरोऽभ्यङ्गं ताम्बूलमनुलेपनम् ।
व्रतस्थो वर्जयेत् सर्वं यच्चान्यद्बल-राग़कृत्' ॥
(य. स्मृ. ६.१४)

इति । गृहीतस्य व्रतस्याऽसमापने प्रत्यवायमाह छागलेयः—

'पूर्वं व्रतं गृहीत्वा तु नाचरेत् कामतो हि यः ।
जीवन् भवति चाण्डालो मृतः श्वा चाभिजायते' ॥

इति ॥

अथ प्रत्याम्नायाः ।

अथ पूर्वोक्तानां व्रतानां केनचिन्निमित्तेनानुष्ठानाशक्तौ यथायोगं प्रत्याम्नाया उच्यन्ते । तत्र प्राजापत्यस्य प्रत्याम्नायाश्चतुर्विंशतिमते दर्शिताः—

'कृच्छ्रो देव्ययुतं चैव प्राणायामशतद्वयम् ।
तिलहोमसहस्रं तु वेदपारायणं तथा ॥
द्विजा द्वादश वा भोज्याः पावकेष्टिस्तथैव च ।
अथवा पावमानेष्टिः समान्याहुर्मनीषिणः' ॥

इति । स्मृत्यन्तरेऽपि—

---

१ B. D J and G read कामनोहित. for कामतो हि य, while G omits the following

जीवन् भवति चाण्डालो मृत श्वा चाभिजायते' ॥
इति । अथ पूर्वोक्तानां व्रतानां केनचिन्निमित्तेनानुष्ठानाशक्तौ यथायोगं प्रत्याम्नाया उच्यन्ते । तत्र प्राजापत्यस्य प्रत्याम्नायाश्चतुर्विंशतिमते दर्शिताः

२. B and D. read कृच्छ्रे and G कृच्छ्र both for कृच्छ्रः ३ E G. H and J. substitute अन्या वा for अथवा, while B. and D. omit the following —

'अथवा पावमानेष्टिः समान्याहुर्मनीषिणः' ।
इति । स्मृत्यन्तरेऽपि—
'कृच्छ्रोऽयुतं तु गायत्र्या उदवासस्तथैव च ।

४. Except A. and I all others omit स्मृत्यन्तरेऽपि.

'कृच्छ्रोऽयुतं तु गाम्नाय्या उदवासस्तथैव च।
धेनुप्रदानं विप्राय सममेतच्चतुष्टयम्'॥

इति। स्मृत्यन्तरेऽपि—

'प्राजापत्यक्रियाऽशक्तौ धेनुं दद्याद् द्विजोत्तमः।
धेनोरभावे दातव्यं मूल्यं तुल्यं न संशयः'॥

इति। मूल्यं च यथाशक्ति देयम्। अत एव ब्रह्मपुराणे—

'गवामभावे निष्कं स्यात्तदर्धं पादमेव वा'।

इति। यत्र यावत्सङ्ख्यया प्राजापत्यान्यावर्तनीयानि भवन्ति तत्र तावत्सङ्ख्यया गोदानान्यावर्तनीयानि। तदपि चतुर्विंशतिमते दर्शितम्—

'जन्मप्रभृति पापानि बहूनि विविधानि च।
अर्वाक् तु भ्रूणहत्यायाः षडब्दं कृच्छ्रमाचरेत्॥
प्रत्याम्नाये गवां देयं साशीति धनिना शतम्।
तथाष्टादशलक्षाणि गायत्र्या वा जपेद्बुधः'॥

इति। ननु—उक्तरीत्या द्वादशवार्षिकस्य प्राजापत्यस्य प्रत्या-

---

१. A G and J read उपवास for उदवास. २. B. and D. omit ऽपि. ३. B and D omit दातव्यं and read मूल्यं तु तुल्यं तेन for दातव्यं मूल्यं तुल्यं. ४ B. D. and G substitute च for वा ५ G. reads जलप्रभृति for जन्मप्रभृति ६ I. reads ब्रह्महत्यायाः for भ्रूणहत्यायाः. ७ G reads प्रत्यंनायां for प्रत्याम्नाये ८ G. reads साशीति for साशीति and J reads this line प्रत्याम्नायो गवा देय साशीतिधननाशनम्. ९. ✓. reads गायत्री for गायत्र्या. १०. F. H and J. read -नीत्या for -रीत्या. ११. G. and I. omit प्राजापत्यस्य and B and D. read दशवार्षिकप्राजापत्याम्नायत्वेन for द्वादश-वार्षिकस्य प्राजापत्यस्य प्रत्याम्नायत्वेन.

म्नायत्वेन षट्त्रिंशल्लक्षसङ्ख्याको गायत्रीजपः प्राप्नोति । कोटिसङ्ख्याकस्तु चतुर्विंशतिमत एव स्मर्यते—

'गायत्र्यास्तु जपन्[1] कोटिं ब्रह्महत्यां व्यपोहति ।
लक्षाशीतिं जपेद्यस्तु सुरापानाद्विमुच्यते ॥
पुनाति हेमहर्तारं[3] गायत्रीलक्षसम्मितिः ।
गायत्र्याः षष्टिभिर्लक्षैर्मुच्यते गुरुतल्पगः' ॥

इति । तथा चैं सति परस्परविरोधः स्यात्—इति चेत् । एवं तर्ह्यनयैवानुपपत्त्या कोटिजपोऽपि न प्रत्याम्नायः । किन्तु द्वादशवार्षिकव्रतसमानविषयतया विकल्प्यते इति कल्पनीयम् । चान्द्रायणादीनां प्रत्याम्नायास्तत्रैव दर्शिताः—

'चान्द्रायणं मृगारेष्टिः पवित्रेष्टिस्तथैव च ।
मित्रविन्दा पशुश्चैव कृच्छ्रं[5] मासत्रयं तथा ॥
तिलहोमायुतं चैव पराकद्वयमेव च[6] ।
गायत्र्या लक्षजप्यं च समान्याह बृहस्पतिः ॥
नित्य-नैमित्तिकानां च काम्यानां चैव कर्मणाम् ।
इष्टीनां[7] पशुबन्धानामभावे चरवः स्मृताः ॥
पराक-तप्तकृच्छ्राणां स्थाने कृच्छ्रत्रयं चरेत्[8] ।
व्रत-होमादिकं वाऽपि कल्पयेत् पूर्वकल्पवत्' ॥

---

१ J. omits एव २. G reads जपेत् for जपन्. ३. B. and D read हेमहा चैव and G होमहर्तारं for हेमहर्तारं. ४. Except G all others omit च. ५ I reads कृच्छ् for कृच्छ्र ६ E. and G. read वा for च. ७. J. reads षष्टीनां for इष्टीनां. ८ B. D. and G. read जपेत् for चरेत् and D. substitutes -त्रये for त्रय.

इति। यस्तु तपस्यसमर्थः धान्यसमृद्धश्च स[1] कृच्छ्रादिव्रतानि ब्राह्मणभोजनेन सम्पादयेत्। तदपि तत्रैवोक्तम्—

'कृच्छ्रे पञ्चाशतिकृच्छ्रे त्रिगुणमहरहस्त्रिंशदेवं तृतीये[2]
चत्वारिंशच्च तप्ते त्रिगुणनगुणिता विंशतिःस्यात्पराके।
कृच्छ्रे सन्तापनाख्ये[3] भवति षडधिका विंशतिः सैव हीना
द्वाभ्यां चान्द्रायणे स्यात्तपसि कृशबलो भोजयेद्विप्रमुख्यान्'॥

इति। अहरहरिति सर्वत्र सम्बद्ध्यते। तृतीयः कृच्छ्रातिकृच्छ्रः। यत्तु प्राजापत्यप्रत्याम्नायत्वेन—

'विप्रा द्वादश वा भोज्याः।'

इति पूर्वमुदाहृतम्। तन्निर्धनविषयम्। धनिकस्य प्रतिदिनं पञ्च पञ्चेति द्वादशसु दिवसेषु षष्टिब्राह्मणभोजनविधानात्। अत एव स्मृत्यन्तरे[4]—

'प्राजापत्यं चरेद्विप्रो यद्यशक्तः कथञ्चन।
अहानि पञ्च विप्राग्र्यान् भोजयेत् सम्यगीप्सितान्'॥

इति। सान्तपनादीनां गोदानप्रत्याम्नायस्तत्रैव चतुर्विंशतिमते[5] दर्शितः—

---

१. J. omits स and G omits कृच्छ्रादि-; while H substitutes स्व- for स २ B. and D. substitute चरित्वा for तृतीये and H. त्रिंशदेव for त्रिंशदेवं. ३ B. D and G. read त्रिगुणिता and I त्रिगुणभगुणिता both for त्रिगुणनगुणिता. ४. E. B and D. read सान्तापनाख्ये, G. सान्तपने, H. and J. सान्तपनाख्ये all for सन्तापनाख्ये. ५. B and D. read द्विजा for विप्रा; while G. reads विप्रान् for the same and भोजयेत् for भोज्या ६. E. reads स्मृतम् for स्मृत्यन्तरे and G. स्मृत्यन्तरम् for the same. ७. We follow here A. and D.; while all others omit चतुर्विंशतिमते

'प्राजापत्ये तु गामेका[1] दद्यात् सान्तपने द्वयम् ।
पराके[2] तप्तकृच्छ्रे च तिस्रस्तिस्रस्तु गास्तथा ॥
अष्टौ चान्द्रायणे देयाः प्रत्याम्नायविधौ सदा ।
यथाविभवसारेण दानं दद्याद्विशुद्धये' ॥

इति । यत्तु स्मृत्यन्तरे चान्द्रायणस्य गोदानत्रयमभिहितम्—

'प्राजापत्ये तु गामेकामतिकृच्छ्रे द्वयं स्मृतम् ।
चान्द्रायणे पराके च तिस्रस्ता दक्षिणास्तथा' ॥

इति तन्निर्धनविषयम् । यथोक्तगोदानादावशक्तो गोभ्यस्तृणं दद्यात् । तथाह[3] कण्वः—

'एकमध्ययनं कुर्यात् प्राजापत्यमथापि वा ।
दद्याद्वा दशसाहस्रं[4] गवां मुष्टि विचक्षणः' ॥

इति । अध्ययन-जपादीनां पुरुषविशेषेण[5] व्यवस्था चतुर्विंशतिमते दर्शिता—

'धर्मनिष्ठास्तपोनिष्ठाः कदाचित् पापमागताः ।
जप-होमादिकं तेभ्यो विशेषेण विधीयते[6] ॥

---

१. G reads this line thus:—
प्राजापत्यद्वये तु गामेकां दद्यात्सान्तपने कृच्छ्रम् । ;
while B and D read प्राजापत्याय for प्राजापत्ये तु २ I reads पराकतप्तातिकृच्छ्रे for पराके तप्तकृच्छ्रे च ३ G. reads तदा for तथा H B and D यथा for the same, while E substitutes काण्व for कण्व ४ G and I read दशसाहस्रं for द्वादशसाहस्रं ५ Except A I and G. all others read विशेषे for विशेषेण; while G omits the following —
व्यवस्था चतुर्विंशतिमते दर्शिता—
'धर्मनिष्ठास्तपोनिष्ठा कदाचित् पापमागता ।
जप-होमादिक तेभ्यो विशेषेण - - - - - ॥.
६. B. D. and G read अभिधीयते for विधीयते.

नामधारकविप्रा ये मूर्खा धर्मविवर्जिताः।
कृच्छ्र-चान्द्रायणादीनि तेभ्यो दद्याद्विशेषतः॥
धनिना दक्षिणा देया प्रयत्नविहिता तु या।
एवं नरविशेषेण प्रायश्चित्तानि दापयेत्' ॥

इति। अनयैव दिशा स्मृत्यन्तरे प्रसिद्धास्तीर्थयात्रादिप्रत्याम्नाया यथायोगमुन्नेयाः। अत एव देवलः—

'अभिगम्य च तीर्थानि पुण्यान्यायतनानि च।
नरः पापात् प्रमुच्येत ब्राह्मणानां तपस्विनाम्॥
सर्वाः समुद्रगाः पुण्याः सर्वे पुण्या नगोत्तमाः।
सर्वमायतनं पुण्यं सर्वे पुण्या वनाश्रयाः' ॥
(दे. स्मृ. ४९–५०)

'अथ गङ्गा-सरस्वती-यमुना-नर्मदा-विपाशा-वितस्ता-कौशिकी-नन्दा-विरजा-चन्द्रभागा-सरयूः-उत्तरवर्त्ती सिन्धुः-कृष्णा-वेणी-शोणा-तापी-पारावती-पाषाणकी-गोमती-गण्डकी-बाहुदा पम्पा-देविका-कावेरी-ताम्रपर्णी-चर्मण्वती-वेत्रवती-गोदावरी-तुङ्गभद्रा-सुचक्षुररुणा

---

१ I. reads इति and shows that the quotation of Devala is completed here, but the following explanation is of the author, therefore, it is a mistake, and I omits अथ and reads तीर्थानि for अथ २ Our manuscripts do not give the correct reading Some read -वन्ती some -वन्ता &c ३ B and D substitute -शोणिता- for -शोणा-, while G omits it ४ J. reads -पाषाणगोमती- for -पाषाणकी गोमती-. ५ B and D. read -चम्पा- and J -पेया- for -पम्पा-; while G adds -नदी- after -पम्पा- ६ G reads -ताम्रवर्णी- for -ताम्रपर्णी-. ७ J. omits the following —

तुङ्गभद्रा सुचक्षुररुणाचेति महानद्य पुण्यतमा'।
गङ्गाद्वार कनखल शक्रावतार सौकर प्रयागो.

चेति महानद्यः पुण्यतमाः । गङ्गाद्वारं कनखलं शक्रावतारं सौकरं प्रयागो गङ्गासागरमिति[1] एतानि गङ्गायास्तीर्थानि । प्लाक्षं[2] प्रस्रवणं वृद्धकन्यकं सारस्वतमादित्यतीर्थं[3] बदरीपाञ्चालं वैजयन्तं पृथूदकं नैमिषं विनशनं च[4]मसोद्भेदं प्रभास इति सारस्वततीर्थानि । कावेरीसङ्गमं सरस्वतीसङ्गमं[5] गन्धमादनमिति समुद्राख्यतीर्थानि पुण्यतमानीति । पुष्करं मूर्धकं[6] गयाशिरः कुरुक्षेत्रमिति पुण्यक्षेत्राणि । वाराणसी महाभैरवं देवदारुवनं सौरं प्राचीनबर्हिः[7] केदारं मध्यममहालयं[8] कुमारमहालयं रुद्रावतारं वङ्कुलं[9] विष्णुशिवं महाकालं[10] पुरुषोत्तमं जम्बुमार्गं[11] चेत्येतान्यायतनानि । हिमवानुदयो महेन्द्रो विदुरः शतशृङ्गः श्रीपर्वतो[12] देवपर्वतो नीलपर्वतो[13] विन्ध्यपर्वतः[14] पारियात्रश्चेति पर्वताःपुण्यतमाः पापं नाशयन्ति।अन्यानि क्षेत्रायतन-पर्वता-ऽऽश्रम-तीर्थानि पुण्यतमानि भवन्ति'।

---

१ G omits एतानि. २ J reads लाक्ष्य for प्लाक्षं and I. प्रश्रवणं वृद्धकन्याक for प्रस्रवण वृद्धकन्यक. ३. B and D. read आदित्यतीर्थं बदरं पञ्चाल for आदित्यतीर्थं बदरपाञ्चालं and I. reads बदरी पाचाल for बदरपाञ्चाल ४ E B. H and D च सोद्भेद, J. वसोद्भेदं, G सौद्भेद and I. चापोद्भेद all for चमसोद्भेद ५. B D and G read सरस्वतीतीर्थानि for सारस्वततीर्थानि ६ B. and D. omit सरस्वतीसगम and J reads गन्धमादान for गन्धमादन and H. and G. समुद्राक्ष- for समुद्राख्य - ७ H. reads मूर्ध्वक and I मूर्द्धज for मूर्धक. ८ I. reads प्राचीनवाहः and B. D. E. G. प्राचीनवह. for प्राचीनबर्हि ९ B D. and G. read महारुद्र महालय for मध्यममहालय कुमारमहालय and for the same I reads मध्यममहारुद्र महाबल महालयं कुमारमहालयं E. and H. महारुद्र महालयं कुमारमहालय. १० B D. and G read तु गुलण्ड, H तुगल and J. गलाण्ड all for वङ्कुल ११ B. and D. omit महाकाल. १२. J. reads जम्बुग्रामं for जम्बुमार्ग. १३ B. D. G. omit श्री and read पर्वतः for श्रीपर्वत. १४ Except A. and J. all others omit नीलपर्वत , while I. reads वेदपर्वतः for देवपर्वत· and J. E. omit देवपर्वत and B. and D. omit विन्ध्यपर्वत .

इति। विश्वामित्रः—

'कृच्छ्र-चान्द्रायणादीनि शुद्ध्यभ्युदयकारणम्।
प्रकाशे च रहस्ये चाप्यनुक्ते संशयेऽस्फुटे॥
प्राजापत्यं सान्तपनं शिशुकृच्छ्रः पराककः'।

इति। जमदग्निः—

'तीर्थे तु पादः कृच्छ्रं स्यान्नद्यामर्धफलं लभेत्।
द्विगुणं तु महानद्यां सङ्गमे त्रिगुणं भवेत्'॥

इति। तथा च नारदः—

'अतिकृच्छ्रः पर्णकृच्छ्रः सौम्यः कृच्छ्रातिकृच्छ्रकः॥(२१)
महासान्तपनं शोद्धये तप्तकृच्छ्रस्तु पावनः।
जपोपवासकृच्छ्रस्तु ब्रह्मकूर्चस्तु शोधनः॥(२२)
एते व्यस्ताः समस्ता वा प्रत्येकं द्व्येर्कतोऽपि वा।
पातकादिषु सर्वेषु उपपातकेषु च यत्नतः॥(२३)

---

१. B. D and J. read कृच्छ्रचान्द्रायणादीनि शुद्धयन्त्युदयकारणम्. G follows this reading, but reads कृच्छ for कृच्छ्र-. H. also reads the same, but differs in reading शुद्धयति for शुद्ध्यभ्यु-. २. B and D. read नुक्तये for अनुक्ते and G reads प्रकारे for प्रकाशे ३. D. reads शिशुकृच्छ्र- J पराककम् for शिशुकृच्छ्र. and पराकक. respectively. ४ I. reads जमदग्नि and omits the following quotation including इति after त्रिशद्भाग षष्टिभागः &c ५ E G. and H. add तु after नद्याम् B. and D. read नद्यां तु त्रिगुण भवेत्, G. नद्यां तु षड्भि फल लभेत्, H. नद्यां तु त्रिफलं लभेत् and J. नद्यां तु नि फल भवेत् all for नद्यामर्द्धफल लभेत्. ६ I. omits इति तथा च नारद and shows that the following quotation belongs to the Nârada. ७. G. omits the following—

'अतिकृच्छ् पर्णकृच्छ् सौम्य कृच्छ्रातिकृच्छ्रक।
महासान्तपन शोद्धये तप्तकृच्छ्रस्तु पावन॥,

while H. substitutes शोद्धध for शोद्धये ८. B. and D read द्व्येकतो, G. and J. एकतो. H. स्वेकतो all for द्व्येकतो. ९. G. reads उपपातेषु for उपपातकेषु.

कार्याश्चान्द्रायणयुता केवला वा विशुद्धये ।
उपवासस्त्रिरात्रं वा मासः पक्षस्तदर्धकम् ॥ (२४)
षडहो द्वादशाहानि कार्या शुद्धिः फलैर्विना ।
उपपातकयुक्तानामनादिष्टेषु चैव हि ॥ (२५)
शक्ति-जाति-गुणान् दृष्ट्वा सकृद्वृद्धिकृतं लघु ।
अनुबन्धादिकं दृष्ट्वा कल्प्यं सर्वं यथागमम् ॥ (२६)
प्रकाशे उक्तं यत्किञ्चिद्विशो भागो रहस्यके ।
त्रिंशद्भागःषष्टिभागः कल्प्यो जात्याद्यपेक्षया' ॥(२७)
(ना. स्मृ. १३. २१–२७)

इति ॥

इति कृच्छ्रप्रत्याम्नाया निरूपिताः ।

इति श्रीमहाराजाधिराज–परमेश्वर–वैदिकमार्गप्रवर्तक-श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरस्य माधवामात्यस्य कृतौ पराशरस्मृतिव्याख्यायां द्वादशाध्याये प्रायश्चित्तप्रकरणम् ॥

---

१ G. reads चान्द्रायणयुता सर्वे for कार्याश्चान्द्रायणयुता. २ B. D G. H. and J. substitute सिद्धि for शुद्धि. ३. B and D. read मन्वादिष्टेषु for अनादिष्टेषु ४ B. and D read शुद्धिकृत for वृद्धिकृत. ५. G. reads यथागमे for यथागमम्. ६ E. and J प्रकाशयुक्त and G. प्रकाशानुक्त both for प्रकाश उक्त ७. Except A., others omit this.

## अथ कर्मविपाको निरूप्यते।

यद्यपि लोके कर्मशब्दः सुकृत-दुष्कृतयोः साधारणः तथाप्यत्र प्रायश्चित्तस्य प्रकृतत्वात्तन्निवर्त्यतया दुष्कृतस्यैव बुद्धिस्थत्वात्तत्रैव पर्यवस्यति । विशेषेण पचनं विपाकः फलदशा । कर्मणां विपाकः कर्मविपाकः । स च विपाकस्त्रिविधः जन्म चाऽयुर्भोगश्चेति । एतत्सर्वं पतञ्जलिर्योगशास्त्रे सूत्रयामास—

'सति मूले तद्विपाको जात्यायुर्भोगाः' ।

(यो. सू. २. १३)

इति । अस्य सूत्रस्यायमर्थः—अविद्याऽस्मिता-राग-द्वेषाभिनिवेशात्मकाः पञ्च क्लेशाः कर्मणां मूलम् ।

'क्लेशमूलः कर्माशयः' ।

(यो. सू. २. १२)

इति सूत्रितत्वात् । सति तस्मिन्पञ्चक्लेशात्मके मूले तानि कर्माणि विपच्यन्ते । दग्धक्लेशबीजस्य तु जीवन्मुक्तस्य न सञ्चितानि कर्माणि फलमारभन्ते । ज्ञानाग्निना भस्मसात्कृतत्वात् । यथा वितुषो व्रीहिर्न प्ररोहति तद्वत् । तस्य तुषस्थानीयं क्लेशपञ्चकमुपजीव्यैव कर्माणि जन्मादित्रयरूपेण विपच्यन्ते । तत्र जन्म कृम्यादि ।

---

१. I. reads धर्मशब्द through mistake. २ B. and D दुष्टस्यैव, G. दुष्टस्यैव for दुष्कृतस्यैव ३ B. and D. omit फलदशा । कर्मणा विपाकः कर्मविपाक । स च विपाक. I, while E. G H. and J. omit फलदशा । कर्मणां विपाकः कर्मविपाक. ४. J. omits पञ्च क्लेशा ५. B. D. and G. read वृद्ध- for दग्ध- ६. I. reads तस्मात् बीजस्थानीय for तस्य तुषस्थानीय. ७. B. and D. जन्मक्रमादि and G. जन्माक्रियादि for जन्म कृम्यादि.

'पतितं याजयित्वा तु क्रिमियोनौ प्रजायते'।
(ब्र. पु. २१७. ४०)

इत्यादिस्मरणात्। आयुः पञ्च-दशवर्षादिकम्[1]।

'तत्र जीवति वर्षाणि दश वै पञ्च वा द्विजः'।
(ब्र. पु २१७. ४०)

इत्यभिधानात्। भोगो यमयातनादिः।

'यमलोके तु ते घोरां[2] लभन्ते परियातनाम्'।
(ब्र. पु. १२५.१३७)

इत्यादिस्मरणात्।

तमेतं जात्यायुर्भोगलक्षणं विपाकं सामान्य-विशेष-शास्त्रोदाहरणेन बहुधा प्रपञ्चयिष्यामः।

ननु[3]—नायं विपाको विधातुं प्रतिषेद्धुं वा शक्यते अननुष्ठेयत्वादवर्जनीयत्वाच्च। अत एवैतस्मिन्विधि-प्रतिषेधपरे[4] शास्त्रे तन्निरूपणमयुक्तम्।

नायं दोषः। प्रायश्चित्तार्थवादत्वेन तदुपयोगात्। अर्थवादस्तु विहिते प्रवर्त्तकत्वेन प्रतिषिद्धान्निवर्त्तकत्वेन[5] च विधिप्रतिषेधैकवाक्यतां[6] भजते—इति न्यायविदां मर्यादा।

अत्र च[7] प्राजापत्याद्यनुष्ठानरूपस्य प्रायश्चित्तस्य क्लेशात्म-

---

१ I. reads दश पञ्च च वा द्विज. २ B and D. read घोर and G. घोरे for घोरां. ३. B and D. substitute मनु- for ननु ४ B and D. read अनुष्ठेयात् अवर्जनीयात् च for अननुष्ठेयत्वादवर्जनीयत्वाच्च ५. B. D E G. H. and I. read अत एव तस्मिन् for अत एवैतस्मिन्, while I substitutes -परेण शास्त्रण for -परे शास्त्रे ६ B. and D. विहितप्रतिषेधैक- for प्रतिषिद्धान्निवर्तकत्वेन च and G. read प्रतिषिद्धे निवर्तकेन च for the same; while I. प्रतिषेधैक्यतां for प्रतिषेधैकवाक्यतां ७ B. and D. omit च.

कत्वात् रागतः प्रवृत्तिर्न सम्भवतीति तत्र प्रवृत्तिसिद्धये प्ररोचना कर्तव्या।

ननु–विहितेष्वग्निष्टोमादिषु[1] स्वर्गादिविपाकोपवर्णनेन प्ररोचयितुं शक्यते। स्वर्गादीनामनुकूलफलत्वात्। क्षयरोगादीनां तु प्रतिकूलफलत्वेन तदुपवर्णनं न प्ररोचनायोपयुक्तम्।

विषम उपन्यासः। तत्र हि[2] स्वर्गादिसाधने प्ररोचनमुत्पादनीयम्। न त्वत्र क्षयरोगादिसाधने प्ररोचनमुत्पाद्यते। किं तर्हि क्षयरोगादिनिवर्त्तके प्रायश्चित्ते। तन्निवृत्तिश्चानुकूलं फलम्।

ननु–एवमपि क्षयरोगादिनिवृत्तिरूप एव प्रायश्चित्तात्मकस्य कर्मणो विपाकः प्ररोचकत्वेन वक्तव्यः। न तु ब्रह्महत्यादिविपाकः। तस्याप्रारोचकत्वात्[4]।

मैवम्। द्विविधा हि ब्रह्महत्यादयः। सञ्चिता सञ्चेष्यमाणाश्च। तत्र सञ्चेष्यमाणेषु प्रतिषेधविषयेषु ब्रह्महत्यादिषु क्षयरोगाद्युपन्यासः ब्राह्मणावगोरणादौ शतयातनादिवत् तन्निवर्त्तकार्थवादत्वेनान्वेति। सञ्चितेषु प्रतिकूलं फलं[5] श्रुत्वा तत उद्विजमानस्तन्निवृत्त्युपायमाकाङ्क्षति। अत उद्वेगप्रयोजकतया[6] प्रायश्चित्तेऽपि प्रवर्त्तकत्वं भवतीति प्रवर्तक-निवर्तकद्विविधार्थवादत्वेन अयं कर्मविपाकोपन्यास उपयुज्यते।

---

१. G. substitutes अत्र for तत्र. २. B and D omit -षु स्वर्गादिविपाको ३ G. substitutes अपि for हि. ४ B. and D. substitute मनु for न तु and तत्र प्रयोजकत्वात् for तस्याऽप्ररोचकत्वात् ५ B. D. and H omit फलं. ६ E. H and J read -प्रनाडिकया for -प्रयोजकतया. ७. B. and D. read उच्यते for उपयुज्यते.

तदेवं सञ्चित-सञ्चेष्यमाणयोरुपयोगः । आरब्धफलेषु प्रतिकूलफलस्य[1] प्रत्यक्षदर्शनादेवोद्वेगः सिद्ध्यति । प्रवर्त्तकं तु व्याध्यादिनिवृत्तिरूपस्य प्रायश्चित्तविपाकस्योपवर्णनम् । अतः क्षयरोगादिरूपस्तन्निवृत्तिरूपश्च विपाकोऽत्र[2] निरूप्यते ।

तत्र सामान्येन पापकर्मविपाकः शिवधर्मोत्तरेऽभिहितः—

'अथातः पततां पुंसामधर्मः परिकीर्तितः ।
नरकार्णवे[3] महाघोरे पातनात् पापमुच्यते' ॥

इति । विष्णुधर्मोत्तरेऽपि[4]—

'अतिवाहिकसंज्ञस्तु[5] देहो भवति भार्गव[6] ।
केवलं तन्मनुष्याणां मृत्युकाल उपस्थिते ॥ (२)
याम्यैर्नरैर्मनुष्याणां तच्छरीरं भृगूत्तम ।
नीयते याम्यमार्गेण[7] नान्येषां प्राणिनां द्विज ॥ (३)
मनुष्याः प्रतिपद्यन्ते[8] स्वर्गं नरकमेव वा ।
नैवान्ये प्राणिनः केचित् सर्वे ते फलभोजिनः[9]॥ (४)
शुभानामशुभानां च[10] कर्मणां भृगुनन्दन ।
सञ्चयः क्रियते लोके मनुष्यैरेव केवलम् ॥ (५)

---

१. H. omits -फलस्य २. J omits अत्र ३ B D and G omit this one line. H. also omits it, but gives in the marginal correction. ४. I reads नरकार्णवे for नरकार्णवे and B D and I read पतनात् for पातनात् ५ B. and D. omit विष्णुधर्मोत्तरेऽपि, while G. omits अपि only and H substitutes च for अपि ६ The text reads अतिवाहिकगर्भस्य for अतिवाहिकसंज्ञस्तु ७ B D E. H read भार्गव for भार्गव, but it seems incorrect as the quoted verses are addressed to Bhârgava. ८. J reads प्रतिपद्यन्त for प्रतिपद्यन्ते ९ Except A. and the text all others read फलभोगिनः for फलभोजिनः. १० The text reads वा for च.

तस्मान्मनुष्यस्तु मृतो[1] यमलोकं प्रपद्यते।
नान्यः प्राणी महाभाग फलयोनौ व्यवस्थितः॥ (६)
याम्यलोकं[2] प्रपन्नस्य पुरुषस्य तथा यमः।
योनीश्च नरकांश्चैव निरूपयति कर्मणा[3]॥ (७)
(वि. ध. २ १०२. २–७.)

इति। ब्रह्मपुराणेऽपि[4]—

'कर्मणा मनसा वाचा ये धर्मविमुखा नराः। (१३६)
यमलोके तु ते[5] घोरां लभन्ते परियातनाम्।
इहाल्पमपि कृत्वा तु नरः कर्माशुभात्मकम्[6]।
प्राप्नोति नरकं घोरं यमलोकेषु[7] यातनाम्'॥
(ब्र पु १२५. १३६–१४२)

इति। विष्णुपुराणे[8]ऽपि—

'पापकृद्याति नरकं प्रायश्चित्तपराङ्मुखः।
पापानामनुरूपाणि प्रायश्चित्तानि यद्यथा[9]॥
तथा तथैव संस्मृत्य प्रोक्तानि परमर्षिभिः'।
(वि. पु. ४. ५. २१–२२)

इति। विष्णुधर्मोत्तरे—

'प्रायश्चित्तैः[10] क्षयं याति पापं कृतमसंशयम्। (३)

---

१. Except A and the text all others read मनुष्यस्य or मनुष्यश्च for मनुष्यस्तु २ The text reads यच्छँल्लोके for याम्यलोक ३. The text reads कर्मणाम् for कर्मणा ४. B D. G. E. H and J. do not insert ऽपि ५. B and D. read तां for ते and J. घोरे for घोरां ६. B. and D read इहाऽकामोऽपि, G इह कामोऽपि and H इहान्यमपि all for इहाल्पमपि ७. B D. G. and J read नरलोकेषु for यमलोकेषु ८ Except A and I. all others omit ऽपि. ९ I. reads तद्यथा for यद्यथा. १०. G reads प्रायश्चित्ताच्छम याति for प्रायश्चित्तै क्षय याति, while I. reads कृतं पाप न सशय and B and D पाप कृत्यमसशयम् both for पापं कृतमसंशयम्.

प्रायश्चित्तविहीना ये राजभिश्चाप्येदण्डिताः ।
नरकं प्रतिपद्यन्ते तिर्यग्योनिं तथैव च ॥ (४)
मनुष्यमपि चासाद्य भवन्तीह तथाङ्किताः ।
प्रायश्चित्तमतः कार्यं कल्मषस्यापनुत्तये' ॥ (५)

(वि. ध. २. ७०. ३–५)

इति । भविष्योत्तरेऽपि–

'देव-तिर्यङ्-मनुष्याणामधर्मनिरतात्मनाम् ।
धर्मराजः स्मृतः शास्ता सुघोरैर्विविधैर्वधैः' ॥
नियमाचारसक्तानां प्रमादात् स्खलितात्मनाम् ।
प्रायश्चित्तैर्गुरुः शास्ता न तु तैरिष्यते यमः ॥
पारदारिक-चौराणामन्यायव्यवहारिणाम् ।
नृपतिः शासकः प्रोक्तः प्रच्छन्नानां च धर्मराट् ॥
तस्मात् कृतस्य पापस्य प्रायश्चित्तं समाचरेत्' ।

इति । ब्रह्मपुराणे–

'ततश्च यातनादेहं क्लेशेन प्रतिपद्यते ।
तत्कर्मजं यातनार्थममातापितृसम्भवम् ॥

---

१. The text reads अवसिता for अदण्डिता २ B. D. E. G. substitute वा for च ३. B and D read भवन्ति हतपङ्किला for भवन्तीह तथाङ्किताः, while G. substitutes इति for इह. ४. B D G. E. and H. read -नियतात्मनाम् for -निरतात्मनाम्. ५. I. reads विधैः. and B वधे for वधैः. ६. B. and D. read प्रमादास्खलितात्मनाम् for प्रमादात् स्खलितात्मनाम्. ७ G. reads ननु for नहु.

तत्प्रमाणवयो-ऽवस्थ[1]-संस्थानै[2] प्राक्तनं यथा।
विहाय सुमहागुप्तं शरीरं पाञ्चभौतिकम् ॥ (२१)
अन्यत्[3] शरीरमादत्ते यातनार्थं स्वकर्मजम्।
तन्मात्रैगुणसंयुक्तं नानात्मीयं स्वकर्मजम् ॥
दृढं शरीरमाप्नोति सुख-दुःखोपभुक्तये[4]। (३१)
तेन भुक्त्वा स्वकर्माणि पापकर्ता[5] नरो भृशम् ॥
सुखानि धार्मिको[6] ऽदुष्ट इहानीतो यमक्षयात्' ॥ (३२)
(ब्र. पु २१४. २८–३२)

इति। मनुस्तु मानसादिकर्मविशेषेण विपाकविशेषमाह—

'चातुर्वर्ण्यस्य कृत्स्नो[7]ऽयमुक्तो धर्मस्त्वया ऽनघ।
कर्मणां फलनिर्वृत्तिं शंस नस्तत्त्वत[8]ः परम् ॥ (१)
स तानुवाच धर्मात्मा महर्षीन् मानवो भृगुः।
अस्य सर्वस्य शृणुत कर्मयोगस्य निर्णयम् ॥ (२)
शुभाशुभफलं कर्म मनो-वाग्देहसम्भवम्।
कर्मजा गतयो नृणा[9]मुत्तमा-ऽधम-मध्यमाः ॥ (३)

---

१ The following is not in the text —
तत्र च यातनादेह क्लेशेन प्रतिपद्यते।
तत्कर्मजं यातनार्थममातापितृसम्भवम् ॥
तत्प्रमाण-वयो-ऽवस्था-संस्थानै प्राक्तन यथा।

२ B. and D. read -स्थापनै for -संस्थानै, while E H तथा for यथा and G. प्राकृतै for प्राक्तन २ B and D read अन्यं for अन्यत् ३. B and D. omit this line and G. reads तन्मात्रा- for तन्मात्र- while H तन्मात्रं for the same. ४ G. reads -पशुक्तये for -पभुक्तये ५ G. reads पापकर्मा for पापकर्ता. ६. I. reads धार्मिको भुङ्क्ते for धार्मिकोऽदुष्ट. ७. J. reads कृत्स्नस्य ८ J. B. and D. read स्वमत परम् for तत्त्वत परम्, while G. substitutes फलम् for परम् ९ B. D. E. G. and H read नूनम् for नृणाम्.

तस्येह त्रिविधस्याऽपि व्यधिष्ठानस्य देहिनः ।
दशलक्षणयुक्तस्य मनो विद्यात् प्रवर्तकम् ॥ (४)
परद्रव्येष्वभिध्यानं मनसाऽनिष्टचिन्तनम् ।
वितथाभिनिवेशश्च त्रिविधं कर्ममानसम् ॥ (५)
पारुष्यमनृतं चैव पैशुन्यं चापि सर्वशः ।
असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् ॥ (६)
अदत्तानामुपादानं हिंसा चैवाविधानतः ।
परदारोपसेवा च शारीरं त्रिविधं स्मृतम् ॥ (७)
मानसं मनसैवायमुपभुङ्क्ते शुभाशुभम् ।
वाचैव वाकृतं कर्म कायेनैव तु कायिकम् ॥ (८)
शरीरजैः कर्मदोषैर्याति स्थावरतां नरः ।
वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम् ॥ (९)
(म. स्मृ. १२. १–९)

इति । हारीतोऽपि—

'सर्वाभक्ष्यभक्षणमभोज्यभोजनमपेयपानमगम्या-
गमनमयाज्ययाजनमसत्प्रतिग्रहणं परदाराभिग-
मनं द्रव्यापहरणं प्राणिहिंसा चेति शारीराणि ।
(१३) पारुष्यमनृतं विवादः श्रुतिविक्रयश्चेति वा-

---

१. J. reads अधिष्ठानस्य and I. reads ह्यधिष्ठानस्य both for व्यधिष्ठानस्य २. Except A. and the text all others read चैव for चापि. ३ B. D E. H. I. and J read अनिबद्ध- and G अतिबद्ध- for असम्बद्ध- ४. J reads विविध for त्रिविधं ५. We follow here only A and I, while B D. E. G. H. and J वाचैव वाङ्मय. and the text वाचा वाचा कृत for वाचैव वाकृत. ३. The text substitutes च for तु ७. B and D. read this line thus:—
मानसैर्मृगपक्षित्व वाचिकैरन्त्यजातिताम् ॥.
८. I. omits अपेयपानम् ९ G. reads -क्रय for -विक्रय.

चिक्कानि । ( १४ ) परोपतापनं पराभिद्रोहः क्रोधो लोभो मोहोऽहङ्कारश्चेति मानसानि । ( १५ ) तदेतान्यष्टादश नैरयाणि कर्माणि यस्मिन् यस्मिन् वयसि करोति यः स तस्मिन् तस्मिन् वयसि शारीर-वाचिक-मानसानि प्राप्नोति । ( १६ ) एवं ह्याह—

यस्यां यस्यामवस्थायां यत् करोति शुभाशुभम् ।
तस्यां तस्यामवस्थायां तत्तत्फलमवाप्नुयात् ॥ ( १७ )
शरीरेणैव शारीरं वाङ्मयेन तु वाचिकम् ।
मानसं मनसैवायमुपभुङ्क्ते शुभाशुभम्' ॥ ( १८ )
( हा. स्मृ. ३२. १३–१८ )

इति । आत्मन ईश्वररूपत्वं प्रतिपाद्याह याज्ञवल्क्यः—

'यद्येवं स कथं ब्रह्मन् पापयोनिषु जायते ।
ईश्वरः स कथं भावैरनिष्टैः सम्प्रयुज्यते ? ॥ ( १२९ )
करणैरन्वितस्यापि पूर्वज्ञानं कथंच न ।
वेत्ति सर्वगतां कस्मात् सर्वगोऽपि न वेदनाम् ? ॥ ( १३० )
अन्त्यैः-पक्षि-स्थावरतां मनो-वाक्काय-कर्मजैः ।
दोषैः प्रयाति जीवोऽयं भवयोनिशतेषु च ॥ ( १३१ )

---

१ G omits लोभो. २ B and D. omit मानसानि ३ I omits वयसि and J substitutes काले for वयसि and G omits करोति य. स तस्मिन् तस्मिन् वयसि. ४ B and D. read मानसान्याप्नोति, G E. H and J. मानसान् प्राप्नोति for मानसानि प्राप्नोति ५ G. omits हि ६ G. reads उपयुङ्क्ते for उपभुङ्क्ते. ७ The text reads करणैनान्वितस्यापि for करणैरन्वितस्यापि. ८. J. and the text reads पूर्वं ज्ञान for पूर्वज्ञानं. ९ B. and D. reads न देवताम्, J निवेदनाम् for न वेदनाम्. १०. G. reads अन्य- for अन्त्य-.

अनन्ताश्च यथा भावाः शरीरेषु शरीरिणाम् ।
रूपाण्यपि तथैवेह सर्वयोनिषु देहिनाम् ॥ (१३२)
विपाकः कर्मणां प्रेत्य केषांचिदिह जायते ।
इह चामुत्र चैकेषां भावस्तत्र प्रयोजनम् ॥ (१३३)
परद्रव्याण्यभिध्यायंस्तथाऽनिष्टानि चिन्तयन् ।
वितथाभिनिवेशी च जायतेऽन्त्येषु योनिषु ॥ (१३४)
पुरुषोऽनृतवादी च पिशुनः परुषस्तथा ।
असम्बद्धप्रलापी च मृग-पक्षिषु जायते ॥ (१३५)
अदत्तादाननिरतः परदारोपसेवकः ।
हिंसकश्चाविधानेन स्थावरेष्वभिजायते' ॥ (१३६)
(या. स्मृ. ३. १२९–१३६)

इति । सत्त्वादिगुणविशेषेण विपाकविशेषं स एवाह—

'आत्मज्ञः शौचवान् दान्तस्तपस्वी विजितेन्द्रियः ।
धर्मकृद्वेदविद्याति सात्त्विको देवयोनिताम् ॥ (१३७)
असत्कार्यरतो धीर आरम्भी विषयी च यः ।
स राजसो मनुष्येषु मृतो जन्माधिगच्छति ॥ (१३८)

---

१ B and D read अभिजायते for इहजायते २ The text reads वा for both च in this line. ३ I reads ऽन्त्यादि- for ऽन्त्यासु- ४. A. C. E. H and I. read पुरुषा for पुरुषो ५ J reads अनिबद्ध प्रलापी च for असम्बद्धप्रलापी च ६ E. I. and J read मृतः पक्षिषु for मृग-पक्षिषु. ७. Before शौचवान् J. adds कृत- ८. J reads कर्मकृत्- for धर्मकृत् The text reads धर्मकृद्वेदविद्यावित् for धर्मकृद्वेदविद्याति, while G. omits the following —

धर्मकृद्वेदविद्याति सात्त्विको देवयोनिताम् ॥
असत्कार्यरतो धीर आरम्भी विषयी च यः ।

९. I. reads विषयात्मकः for विषयी च यः.

निद्रालुः क्रूरकृल्लुब्धो नास्तिको याचकस्तथा।
प्रमादवान्[1] भिन्नवृत्तो भवेत्तिर्यक्षु तामसः॥ (१३९)
रजसा तमसा चैव[2] समाविष्टो भ्रमन्नहि।
भावैरनिष्टैः संयुक्तः संसारं प्रतिपद्यते'॥ (१४०)
(या. स्मृ ३. १३७–१४०)

इति। मनुरपि–

'सत्त्वं रजस्तमश्चेति त्रीन् विद्यादात्मनो गुणान्।
यैर्व्याप्येमान्[3] स्थितो भावान् महान् सर्वानशेषतः॥(२४)
यो यदैषां गुणो देहे साकल्येनातिरिच्यते।
स तदा तद्गुणप्रायं तं करोति शरीरिणम्॥ (२५)
सत्त्वं ज्ञानं तमोऽज्ञानं राग-द्वेषौ रजः स्मृतम्।
एतद्व्याप्तिमदेतेषां[4] सर्वभूताश्रितं वपुः॥ (२६)
तत्र यत् प्रीतिसंयुक्तं किञ्चिदात्मनि लक्षयेत्।
प्रशान्तमिव शुद्धाभं सत्त्व तदुपधारयेत्॥ २७॥

---

१. J reads प्रमादवाक् for प्रमादवान्. २ Except A. and the text all others read एव for एव ३ The text substitutes एव for इति. ४ J. reads this line thus —

यो व्याप्येह स्थितो भावो गृह्णन् सर्वाविशेषत।,

E substitutes यो व्याप्येमा for यैर्व्याप्येमान्, G. स्थितान् for स्थितो ५ B and D. read सत्त्व तमश्च ज्ञान च, while J सत्य ज्ञान तमोऽज्ञान. ६ G. reads एते for एतद् and E omits this line and the following 29 lines, and the word अधमा from -मदेतेषां सर्वभूताश्रितं वपुः। H. reads एतद्व्याप्तिमदं for एतद्व्याप्तिमदे-. ७ From this line to the end of 39 S'loka this portion does not appear in I.

यत्तु दुःखसमायुक्तमप्रीतिकरमात्मनः ।
तद्रजोऽप्रतिधं[1] विद्यात् सततं हारि देहिनाम् ॥ २८ ॥
यत्तु स्यान्मोहसंयुक्तमव्यक्तं[2] विषयात्मकम् ।
अप्रतर्क्यमविज्ञेयं तमस्तदुपधारयेत् ॥ २९ ॥
त्रयाणामपि चैतेषां गुणानां यः फलोदयः ।
अग्र्यो मध्यो जघन्यश्च तं प्रवक्ष्याम्यशेषतः ॥३० ॥
वेदाभ्यासस्तपो ज्ञानं शौचमिन्द्रियनिग्रहः ।
धर्मक्रियाऽऽत्मचिन्ता[3] च सात्त्विकं गुणलक्षणम् ॥३१॥
आरम्भरुचिता[4] धैर्यमसत्कार्यपरिग्रहः ।
विषयोपसेवा चाजस्रं राजसं गुणलक्षणम् ॥ ३२ ॥
लोभः[5] स्वप्नोऽधृतिः क्रौर्यं[6] नास्तिक्यं भिन्नवृत्तिता ।
याचिष्णुता प्रमादश्च[7] तामसं गुणलक्षणम् ॥ ३३ ॥
त्रयाणामपि चैतेषां गुणानां त्रिषु तिष्ठताम् ।
इदं सामासिकं[8] ज्ञेयं क्रमशो गुणलक्षणम् ॥ ३४ ॥

---

१. J. B D and G. read ऽप्रतिघ for ऽप्रतिधं and H. ऽप्रतिस for the same. The different commentators of Manû read variously, Medhâtithî and Kulluka Bhatta read ऽप्रतिम, Râghavânanda, Nandana and Râmchandra ऽप्रतिघ and Govindı Raja follows the same. २. B and D. read अव्यक्तविषयात्मकम् and H अव्यक्तिविषयात्मकम् for अव्यक्त विषयात्मकम्. ३. B and D read अद्वेष. सर्वभूतेषु for धर्मक्रियात्मचिन्ता च, while G. H. and J. omit this and the following one line:—

धर्मक्रियाऽऽत्मचिन्ता च सात्त्विक गुणलक्षम् ॥
आरम्भरुचिता धैर्यमसत्कार्यपरिग्रह ।

४ B. omits this line. ५. G. and J. omit this and the following one line:—

लोभः स्वप्नोऽधृति क्रौर्यं नास्तिक्यं भिन्नवृत्तिता ।
याचिष्णुता प्रमादश्च तामसं गुणलक्षणम् ॥.

६. B. D. H. and J शौर्यं for क्रौर्यं. ७. B. and D. read प्रसादश्च for प्रमादश्च. ८. B. and D. read मानसिक for सामासिक.

यत् कर्म कृत्वा कुर्वंश्च करिष्यंश्चैव लज्जते[1] ।
तज्ज्ञेयं विदुषा सर्वं तामसं गुणलक्षणम् ॥ ३५ ॥
येनास्मिन्कर्मणा लोके ख्यातिमिच्छति पुष्कलाम् ।
न च शोचत्यसम्पत्तौ तद्विज्ञेयं तु राजसम् ॥ ३६ ॥
यत् सर्वेणेच्छति[2] ज्ञातुं यन्न लज्जति चाचरन् ।
येन तुष्यति चात्मास्य तत् सत्त्वगुणलक्षणम् ॥३७॥
तमसो लक्षणं कामो रजसस्त्वर्थ उच्यते ।
सत्त्वस्य लक्षणं धर्मः श्रैष्ठ्यमेषां यथाक्रमम्[3] ॥ ३८ ॥
येन यांस्तु[4] गुणेनैषां संसारान्प्रतिपद्यते ।
तान् समासेन वक्ष्यामि सर्वस्यास्य यथाक्रमम् ॥३९॥
देवत्वं सात्त्विका यान्ति मनुष्यत्व हि[5] राजसाः ।
तिर्यक्त्वं तामसा नित्यमित्येषा[6] त्रिविधा गतिः॥(४९)
त्रिविधा त्रिविधैषा तु विज्ञेया गौणिकी[7] गतिः ।
अधमा मध्यमा-ऽग्र्या च कर्मविद्याविशेषतः।( ४१ )
स्थावराः कृमिकीटाश्च मत्स्याः सर्पाः सरीसृपाः[8] ।
पशवश्च मृगालाश्च[9] जघन्या तामसी गतिः ॥ ( ४२ )

---

१ The text reads लज्जति, while B and D read लज्जसे for the same २ B and D read सर्व नेच्छति for सर्वेणेच्छति ३ The text reads यथोत्तरम् for यथाक्रमम् ४ The text reads येन यस्तु, but the commentator Medhâtithi reads यान् , Kulluka Bhatta and Râmchandra also follow the same and H एतेषां तु both for येन यांस्तु ५. B D and the text substitute च and G H and J तु for हि ६. G reads इत्येषा च शिव मति for इत्येषा त्रिविधा गति and J reads इत्येषा for इत्येषा. ७ G. reads मति for गति ८ The text reads सकच्छपा for सरीसृपा ९. The text substitutes मृगाश्चैव for मृगालाश्च

हस्तिनश्च तुरङ्गाश्च शूद्रा म्लेच्छाश्च गर्हिताः[1] ।
सिंहा व्याघ्रा वराहाश्च मध्यमा तामसी गतिः ॥(४३)
चारणाश्च सुपर्णाश्च पुरुषाश्चैव दाम्भिकाः ।
रक्षांसि च पिशाचाश्च तामसेषूत्तमा[2] गतिः ॥ ( ४४ )
झल्लो[3] मल्ला नटाश्चैव पुरुषाः शस्त्रवृत्तयः[4] ।
द्यूतपानप्रसक्ताश्च जघन्या[5] राजसी गतिः ॥ ( ४५ )
राजानः क्षत्रियाश्चैव राज्ञां चैव पुरोहिताः ।
वाद[6]-युद्धप्रधानाश्च मध्यमा राजसी गतिः ॥( ४६ )
*गन्धर्वा[7] गुह्यका यक्षा विबुधानुचराश्च[8] ये ।
*तथैवाप्सरसः सर्वा राजसेषूत्तमा[9] गतिः ॥ ( ४७ )
तापसा यतयो विप्रा ये च वैमानिका गणाः ।
नक्षत्राणि च दैत्याश्च प्रथमा सात्त्विकी गतिः॥ (४८)
यज्वान ऋषयो वेदा देवा ज्योतींषि वत्सराः ।
पितरश्चैव साध्याश्च द्वितीया सात्त्विकी गतिः ॥ (४९)

---

१. I. reads विगर्हिता for गर्हिता. २. The text reads तामसीषु for तामसेषु ३ E G and H. read भल्ला, J. भिल्ला both for झल्ला, while B and D. omit this and the following one line –

झल्ला मल्ला नटाश्चैव पुरुषा शस्त्रवृत्तय ।
द्यूतपानप्रसक्ताश्च जघन्या राजसी गति ॥

४. G. reads तु कुकृतय, E and H तु कुवृत्तय for शस्त्रवृत्तय. ५. E. G. and J. read प्रथमा for जघन्या, while H omits this and the following one line —

द्यूत-पानप्रसक्ताश्च जघन्या राजसी गति ॥
राजान क्षत्रियाश्चैव राज्ञा चैव पुरोहिता ।

६. B. D. E G. H. and J read दान- for वाद-. ७ G omits this and the following one line —

गश्चर्या गुह्यका यक्षा विबुधानुचराश्च ये ।
तथैवाप्सरस. सर्वा राजसेषूत्तमा गति. ॥.

८ E I. and J. read विविधानुचरा. for विबुधानुचरा. ९. The text reads राजसीषु for राजसेषु.

ब्रह्मा[1] विश्वसृजो धर्मो महानव्यक्तमेव च।
उत्तमां सात्त्विकीमेतां गतिमाहुर्मनीषिणः ॥ (५०)
एष सर्वः समुद्दिष्टस्त्रिप्रकारस्य कर्मणः।
त्रिविधस्त्रिविधः कृत्स्नः संसारः सार्वभौतिकः ॥ (५१)
(म. स्मृ. १२. २४–५१)

इति ॥

अथ प्रेतत्वादिहेतुभ्यो नानाविधेभ्यः पापविशेषेभ्यो योनिविशेषा अभिहिता विष्णुधर्मोत्तरे–

'असहिष्णुतयान्यस्य गुणानां कारण[3] विना।
महत् पापं समुत्पन्नं तदस्य प्रेतकारणम् ॥
ब्रह्मस्वहारिणश्चैते[4] पापाः प्रेतत्वमागताः।
परदाररताः केचित् स्वामिद्रोहरताः परे[5] ॥
मित्रद्रोहरताः केचिद्देशोऽस्मिन्भृशदारुणे।
स्वकर्मभिश्च्युताः[6] सर्वे जायन्ते प्रेतयोनिषु'॥
(वि. ध. २. ७०. २३–२५)

इति। पद्मपुराणे[7]–

'अयाज्ययाजकश्चैव याज्यानां च विवर्जकः।

---

१. B. D E and J. read ब्रह्मविश्वसृजो, while H I. substitute महत् for महान् २. G reads पापेभ्य for पापविशेषेभ्य, while except A. and I. all others omit अभिहिता. ३ B. and D read करण- for कारण-. ४. B. D and H. read एव for एते ५ G reads परा for परे ६ B. D. E. G H. and J. read स्वकर्मविच्युता for स्वकर्मभिश्च्युता ७. G. does not insert इति H reads यमपुराणे for पद्मपुराणे I searched for the Padma purâna which is available in this time The following quoted verses are found in the same.

विरतो विष्णुविद्यासु स प्रेतो जायते नरः ॥ (५०)
सामान्यदक्षिणां लब्ध्वा गृह्णात्येको विमोहितः ।
नास्तिक्यभावनिरतः स प्रेतो जायते नरः' ॥ (५३)
(प पु. ४५. २७. ५०–५३)

इति । स्कान्दे चमत्कारखण्डे–

'यो भवेन्मानवः क्षुद्रस्तथा पैशुन्यकारकः ॥
ब्राह्मणान्वयसम्भूतो वृथामांसाशनश्च यः ।
प्राणिनां हिंसको नित्यं स प्रेतो जायते नरः ॥
अकृत्वा देवकार्यं यस्तथा च पितृतर्पणम् ।
योऽश्नाति भृत्यवर्गेभ्योऽदत्वा प्रेतः स जायते ॥
परदाररतश्चैव परवित्तापहारकः ।
परापवादसन्तुष्टः स प्रेतो जायते नरः ॥
कन्यां यच्छति वृद्धाय नीचायं धनलिप्सया ।
कुरूपाय कुशीलाय स प्रेतो जायते नरः ॥
देव-स्त्री-गुरुवित्तानि गृहीत्वा नो प्रयच्छति ।

---

१ The text reads —

रतो वै शूद्रसेवासु स प्रेतो जायते नर ॥
सामान्या दक्षिणा लब्ध्वा गृण्हीते एक एव तु ।
नास्तिक्यभावे निरत स वै प्रेतोऽभिजायते' ॥

I reads विरक्तो for विरतो. २ J. reads सामान्यदक्षणा लुब्धो, B D लक्षणां for दक्षिणां, E लब्धां for लब्ध्वा ३ G reads एनोविमोहित for एको विमोहित. ४ G omits इति and reads स्कन्दो नरखण्डे for स्कान्दे चमत्कारखण्डे. ५ B D and G read -अशक for -अशन ६ J substitutes वा for च. ७. G. reads योऽमात्य-भृत्य- for योऽश्नाति भृत्य- ८ B. and D. read पापापवादसन्तुष्ट for परापवादसन्तुष्ट ९. E. substitutes क्लीबाय for नीचाय. १०. B D G and J read यो न यच्छति for न प्रयच्छति ; while E and H. योऽनुगच्छति for the same

विशेषाद्ब्राह्मणेन्द्राणां स प्रेतो जायते नरः ॥
दीयमानस्य वित्तस्य ब्राह्मणेभ्यस्तु पापकृत् ।
विघ्नमाचरते यस्तु स प्रेतो जायते नरः॥
शूद्रान्नेनोदरस्थेन ब्राह्मणो म्रियते यदि ।
त्रिकालज्ञो वेदवेदी धर्मज्ञोऽथ षडङ्गवित् ।
चतुर्वेद्यपि योऽविप्रः स प्रेतो जायते नरः ॥
शास्त्रकर्ता ग्रन्थकर्ता यद्यपि स्यात् षडङ्गवित् ।
कुल-देशोचितं कर्म यस्त्यक्त्वाऽन्यत् समाचरेत्[1] ॥
कामाद्वा यदि वा मोहात् स प्रेतो जायते नरः ।
उच्छिष्टस्य विशेषेण अन्तरिक्षमृतस्य[2] च ॥
विषा-ग्नि-जलमृत्यूनां तथा चैवात्मघातिनाम् ।
प्रेतत्वं जायते नूनं सत्यमेतन्न संशयः' ॥

इति । अग्निपुराणे—

'मातरं पितरं वृद्धं ज्ञातिं साधुजनं तथा ।
लोभात्त्यजति यस्त्वेतान् स प्रेतो जायते नरः ॥
कुज्योतिः[3] कुत्सितो वैद्यः कुज्ञानी च कुदेशिकः[4] ।
शूद्रानुग्रहकर्ता[5] च स प्रेतो जायते नरः ॥
निन्दको द्विज-देवानां गीत-वाद्यरतः सदा ।
वृद्धं बालं गुरुं विप्रान् योऽवमत्य भुनक्ति वै[6] ॥
कन्यां ददाति शुल्केन स प्रेतो जायते नरः ।

---

१ G. reads समाचरन् for समाचरेत् २ B and D अन्तरिक्षकृतस्य च ३. G. reads तथान्यैवात्म- for तथा चैवात्मघा- ४. G omits this and the following four lines ५ B. and D read -देशक for -देशिक.. ६ B and D. read शूद्रानुग्रहकर्मा for शूद्रानुग्रहकर्ता ७. J. substitutes वा for वै

न्यासापहर्ता मित्रध्रुक् परपाकरतः सदा ॥
निर्दोषं सुहृदं भार्यां ऋतुकाले न याति यः ।
न[1] सहेत यशस्तेषां स प्रेतो जायते नरः ॥
हस्त्यश्व-रथ-यानानि मृतशय्यासनानि च ।
कृष्णाजिनं[3] तु गृह्णाति अनापदि तु यो द्विजः ॥
तथोभयमुखीं दोलां[4] सशैलां मेदिनीं द्विजः ।
कुरुक्षेत्रे च यद्दानं चाण्डालात् पतितात्तथा ॥
मासिके च नवश्राद्धे भुञ्जन् प्रेतान्नमेव च ।
भूमि-कन्यापहर्ता च स प्रेतो जायते नरः' ॥
(अ. पु. २०१. ४१–४८)

इति[5] । उमामहेश्वरसंवादे–

'अपहृत्य च सर्वस्वं देवस्वं च तथा परम् ।
दत्तापहारदानाच्च पैशाच्यं याति वै नरः ॥
योनिकार्यं च यो देवि आहितेन[8] तु कारयेत् ।
सोऽपि याति पिशाचत्वं स्वामिद्रोहेण मानवः ॥

---

१. G. reads त्यजेत् काले न याति नः (य), B and D त्यज्य काले न याति य both for ऋतुकाले न याति य; while A. त्यजन् काले न पाति य for the same २. B. D E. and H read न वहेत यदा for न सहेत यश, while J substitutes वहेत for सहेत. ३. E H and J. मृगाजिन, for कृष्णाजिन. ४. G. and J read डोलां and I घोरा both for दोलां ५. I. reads प्रेतार्थम् for प्रेतान्नम् ६. B. omits इति। उमामहेश्वरसंवादे —

'अपहृत्य च सर्वस्वं देवस्व च तथा परम् ।
दत्तापहारदानाच्च पैशाच्य याति वै नर ॥;

while G. omits इति only. ७ G. reads this line thus —

दत्तापहारी दानाद्यै पैशाच याति वा नर ॥.

८. B. D. E. G. and H. read अहितेन for आहितेन.

स्वामिद्रव्यं गृहीत्वा तु न यजेन्न[1] ददाति च ।
आत्मनः पोषको मूढः पिशाचत्वं स[2] गच्छति ॥
मठाधिपत्यं[3] यो देवि कुरुते मदमोहितः ।
विनाशयेन्मठद्रव्यं निर्माल्यं यश्च भक्षति ॥
परस्य योषितं हृत्वा ब्रह्मस्वमपहृत्य[4] च ।
अरण्ये निर्जले देशे भवति ब्रह्मराक्षसः ॥
अधर्मं धर्ममित्याहुर्ये तु मोहवशं गताः ।
हर्त्तारः परदाराणां चौर्येण बलतोऽपि वा[6] ॥
अरण्ये निर्जले देशे भवन्ति ब्रह्मराक्षसाः' ॥
( नास्ति मुद्रितम. भा. शां. पुस्तके. )

इति । मनुः—

'संयोगं पतितैर्गत्वा परस्यैव च योषितम् ।
अपहृत्य च विप्रस्वं भवति ब्रह्मराक्षसः ॥ ( ६० )
गुरुं त्वंकृत्य हुंकृत्य विप्रं निर्जित्य वादतः ।
अरण्ये निर्जले देशे भवति ब्रह्मराक्षसः ॥

---

१ B. and D read यो यजेन्, E न यजेत् both for न यजेन्न. २ Except A and I all others read च for स ३ We follow here A and H, while B. D and I. read मठापत्य च, E माठायत्य च, G. महापत्य च and J माठापेत्य च all for मठाधिपत्य All of these forms are incorrect and meaningless. ४ I reads ब्राह्मणस्व प्रहृत्य च for ब्रह्मस्वमपहृत्य च ५. H. reads इत्याह यस्तु मोहवश गता for इत्याहु र्ये तु मोहवश गता ६ G. reads च for वा ७. E. omits the following .—

इति । मनु —

'सयोग पतितैर्गत्वा परस्यैव च योषितम् ।
अपहृत्य च विप्रस्व भवति ब्रह्मराक्षस ॥

८. Only this and the following one line occurs in the text of Manu, the other four lines in this quotation are not found in the text.

ये ब्राह्मणान् प्रद्विषन्ति गर्हित्वा[1] ते हि राक्षसाः।
आचार्यमृत्विजश्चैव गुरुं चैव तपस्विनम्।
मुनींश्चाप्येवमन्यन्ते[2] ते भवन्तीह[3] राक्षसाः' ॥
(म. स्मृ. १२. ६०)

इति। वामनपुराणे—

'चण्डालादन्त्यजाद्वापि प्रतिगृह्णाति दक्षिणाम्।
याजको याज्यमानस्तु[4] सोऽश्मान्तः[5] स्थलकीटकः'॥
(वा. पु. ६१. २७)

इति। स्कान्दे रेवाखण्डे—

'बुभुक्षितेषु भृत्येषु[6] यं एकोऽश्नाति मानवः।
श्वयोनिं स समासाद्य चन्डालो जायते नरः॥
वेदोक्तं यः परित्यज्य धर्ममन्यं समाचरेत्।
दशवर्षसहस्राणि श्वयोनौ जायते ध्रुवम्॥
वेदार्थनिन्दका ये च ये च ब्राह्मणनिन्दकाः।
इह जन्मनि शूद्रास्ते मृताः श्वानो भवन्ति[7] हि' ॥
(स्क. पु. रे. खं. ३०. ३७–३९)

इति। ब्रह्मपुराणे—

'यदि पुत्रसम शिष्यं गुरुर्जह्यादकारणम्।
आत्मनः कामकारेण सोऽपि हिंस्रः[8] प्रजायते ॥ (४८)

---

१. I. does not insert this line, also is not occurred in the text of Manu. २ B. G. and J. read गर्वित्वा and D गर्वित्वात् for गर्हित्वा ३ B and D read चैवावमन्यन्ते for चाप्यवमन्यन्ते ४ I reads यजमानश्च स स्यात्तु, B D E H and J याजमानस्तु स भवेत्तु for याज्यमानस्तु सोऽश्मान्त, while H substitutes स स्याद्दुच्छलकीटक for सोऽश्मान्त स्थलकीटक.. ५. B E G H. and J do not insert स्कान्दे रेवाखण्डे. ६ G. reads एको ऽश्नाति च मानव for य एकोऽश्नाति मानव ७ I. reads ह for हि. ८. B. and D. read तथैव च for प्रजायते.

पितरं मातरं चैव यस्तु पुत्रोऽवमन्यते।
सोऽपि विप्रो मृतो जन्तुः पूर्वं जायेत गर्दभः॥ (४९)
गर्दभत्वं तु सम्प्राप्य दश वर्षाणि जीवति।
संवत्सरं तु कुम्भीरस्ततो जायेत मानवः॥ (५०)
ज्येष्ठं पितृसमं चापि भ्रातरं योऽवमन्यते॥ (७५)
सोऽपि मृत्युमवाप्नोति क्रौञ्चयोनौ च जायते। (७६)
आज्ञाप्यहर्ता तु नरः कृमियोनौ प्रजायते॥
विश्वासहर्त्ता तु नरो मीनो जायेत दुर्मतिः। (५९)
उपस्थिते विवाहे तु यज्ञे दाने महोत्सवे॥
मोहात् करोति यो विघ्नं स मृतो जायते कृमिः।
कृतघ्नः स मृतो विप्रो यमस्य विषयं गतः॥ (८०)
यमस्य विनयैः क्रूरैर्वधं प्राप्नोति दारुणम्। (८१)
यातनाः प्राप्य तत्रस्थस्ततो बह्वीः समा द्विजाः॥ (८३)
ततो दशः कृतघ्नश्च संसारं प्रतिपद्यते।
जलप्रवर्षणं यस्तु भिन्द्यान्मत्स्यो भवेत्तु सः।

---

१. G. substitutes च for तु, while except A and the text omit —
. . . . . दश वर्षाणि जीवति।
संवत्सर तु कुम्भीर . . . . . ॥.

२ G. reads वापि for चापि ३. G reads प्रजायते for च जायते ४ G. reads च for तु ५ B and D. read महत् for मोहात्. ६. I. reads कृतघ्नस्तु मृतो for कृतघ्न स मृतो ७ I reads विषये क्रूरैर्बन्धं and J. विषये क्रूरैर्बाधां both for विनयै. क्रूरैर्वध, while G substitutes दारुणाम् for दारुणम्. ८. E G and H read यो द्विज. बह्वीश्च, B and D. बह्वीश्च स द्विज and I बह्वीश्च भो द्विजा· all for बह्वीः समा द्विजा. ९. Except A. all others read ततो गत for ततो दश. १० B and I. read जलप्रवहणं for जलप्रवर्षण and D जलस्य वहण for the same.

अयोनिगो वृको हि स्यादुलूकः क्रयवञ्चनात् ।
प्रतिश्रुत्य द्विजेभ्यश्चाप्यदत्वा मधुको भवेत् ॥
लभेद्धवलको राजन् योनिं चण्डालसंज्ञिताम् ।
मृतस्यैकादशाहे तु भुञ्जन् श्वा चाभिजायते' ॥
(ब्र. पु. २१८, ४८–८३)

इति । गरुडपुराणे—

'कौटसाक्ष्यप्रदाः पापा अमेध्यकृमयश्चिरम् ।
भूत्वा भवन्ति सर्पास्ते पिशाचास्तदनन्तरम् ॥
गुरु-मित्रद्रुहः पापा ये च स्वामिद्रुहो जनाः ।
द्विज-शिष्यद्रुहश्चैव कृतघ्ना नास्तिकास्तथा ॥
त्यागिनो बान्धवानां च त्यागिनः शरणार्थिनाम् ।
अमेध्यकृमयः पापा मृगव्याधा भवन्ति च ॥
उरुरोगगणोपेता जायन्ते शम्बुकाः जले ।
चन्द्रार्कग्रहणे भुक्त्वा जायते कुञ्जरो नरः' ॥
(ग. पु. २८१. ५–९)

---

१. B. D and G. read वृषो for वृको. २ G does not add अपि after द्विजेभ्यश्च, while J. reads द्विजेभ्यश्चादत्वा मधुवृको भवेत् for द्विजेभ्यश्चाप्यदत्वा मधुको भवेत्. ३. Except I all read श्वानोऽभिजायते for श्वा चाभिजायते. ४. B. D. G. and H. omit इति and B. and D. substitute गारुडे for गरुडपुराणे. ५. B. D. E G H and J. read कूटसाक्ष्यप्रदा for कौटसाक्ष्यप्रदा. ६ E. and H. read द्विजा. for द्विज-. ७ G. reads परमार्थिनाम् for शरणार्थिनाम्. ८ E. I and G substitute सर्वे for पापा; while H. substitutes मृता for मृग- ९ B. D E H and J. read पुरो रोगगणोपेताः J. पुरो रोगगुणोपेता and I गुरुरोगगणोपेता all for गुरुरोगगणोपेता. १०. Except A. and I, all read काम्बुका, but the form is incorrect.

इति। शिवधर्मोत्तरे—

'विप्रः पञ्चमहायज्ञानकृत्वा योऽन्नमश्नुते।
विड्वराहो भवेन्नित्यं क्रव्याशी व्याध एव च॥
द्विजस्त्वेकशफानां च विक्रयाज्जायते मृगः।
मत्सरी विट्कृमिश्चैव अवज्ञाकार्यथं कृमिः'॥

इति। वायुसंहितायाम्—

'खरो वै बहुयाजित्वात् काकोऽमन्त्रितभोजनात्।
अपरीक्षितभोजी स्याद्वानरो विजने वने॥
अविद्यां यः प्रयच्छेत बलीवर्दो भवेत्तु सः।
अन्नं पर्युषितं विप्रे दत्त्वा वै कुब्जतां व्रजेत्'॥

इति। उमा-महेश्वरसंवादे—

'अग्निहोत्रं भवेद्यस्य न कुर्यात्तस्य रक्षणम्।
पर्वातिक्रमकारी तु मृगत्वं याति ब्राह्मणः॥

---

१. We are unable to find the text which the following quoted s'lokas really belong to B E H. and D omit इति and do not insert शिवधर्मोत्तरे, while J omits इति, but inserts विष्णुधर्मोत्तरे for शिवधर्मोत्तरे. २. J. reads क्रव्याशी for क्रव्याशी ३ G inserts इति after the end of the last line and reads वत्सरीविक्रयश्चैव for मत्सरी विट्कृमिश्चैव, while I. substitutes मत्स्योऽपि for मत्सरी-, ४ B. D. G and I substitute अथ for अथ ५. I reads बहुयाचित्वात् for बहुयाजित्वात्, while J. reads ऽमन्त्रितभोजनात् and A ऽनिमन्त्रितभोजनात् for ऽमन्त्रितभोजनात्. ६ E. D. G. and I read कुण्डतां for कुब्जता; while E H omit इति. ७ J reads लक्षणाम् for रक्षणम्. ८. B. reads याति च द्विज and D याचितद्विजः for याति ब्राह्मण, while G. adds इति after ब्राह्मणः.

वेदोपजीविकाः[1] पापाः स्त्रीलोलाः सततं च ये ।
भवन्ति चेह काकाः स्युश्चिरं विड्भुज् एव च ॥
पायसं कृसरं चैव हवींषि मधुराणि च ।
अदत्वा चाग्नि-विप्रेभ्यः प्राशनाद्भुजगो भवेत्' ॥

इति । नारदपुराणे—

'भर्तुः सौख्येन या नारी सौख्ययुक्ता न जायते ।
सा इयेनी[2] जायते राजन् त्रीणि वर्षाणि पञ्च च ॥
वाचा चाक्रोशिका या तु सन्निरुध्य पतिं ह्रियौ[3] ।
अकार्यं कारयेत् पापा सा नारी वल्गुली भवेत् ॥
भर्तुरर्थे हि या वित्तं विद्यमानं न यच्छति ।
जीवितं वा वरारोहे विष्ठायां जायते कृमिः ॥
कृमियोनिविनिर्मुक्ता काष्ठकीटा भवेत्तु सा ।
न साधयन्ति कार्याणि प्रभूणां ये विचेतसः ॥
भूत्वा वेतनभोक्तारो जायन्ते भूलताँ[4] हि ते' ।

(ना. पु. ३१. १–१४)

इति । वृद्धगौतमः—

'मौल्याद्वेदोपदेष्टा च व्याघ्रो भवति मानवः ।
जम्बुको जायते जन्तुरननुज्ञातपाठकः[5] ॥
शूद्रात् पठंति[6] चाण्डालो ब्रह्मद्रव्योपजीवकः' ॥

---

१ G reads वेशोपजीविता for वेदोपजीविका २. J. reads श्वानी for इयेनी ३ B D and G read हि या for ह्रिया. ४ B and D read मालिना for भूलता ५. B reads पठित-, D पठिते, G पठेत and I. पतति all for पठति. ६ G. reads ब्रह्महत्योपजीवक. for ब्रह्मद्रव्योपजीविक.

इति । याज्ञवल्क्योऽपि—

'परद्रव्याण्यभिध्यायंस्तथाऽनिष्टानि चिन्तयन् ।
वितथाभिनिवेशी च जायतेऽन्त्यासु योनिषु ॥
पुरुषोऽनृतवादी च पिशुनः पुरुषस्तथा ।
अनिबद्धप्रलापी च मृग-पक्षिषु जायते ॥
अदत्तादाननिरतः परदारोपसेवकः ।
हिंसकश्चाविधानेन स्थावरेषु प्रजायते' ॥

( नास्तीदं मुद्रितया. स्मृ. पुस्तके.)

इति ॥

## अथ नानाविधनिषिद्धकर्मशेषफलानि ।

तत्र उमामहेश्वरसंवादे—

'श्वपाक-पुल्कसादीनां कुत्सितानामचेतसाम् ।
कुलेषु तेऽभिजायन्ते गुरु-वृद्धावमानिनः ॥
गुरुणा ह्यननुज्ञातो यो वेदाभ्यासमाचरेत् ।
स तु जातिविहीनेषु जायते भुवि मानवः ।
अधर्मं धर्ममित्याहुर्ये तु मोहवशंगताः ॥
ते च कालकृतोद्योगाः सम्भवन्तीह मानुषे ।
निर्होमा निर्वषट्कारास्ते भवन्ति नराधमाः' ॥

---

१. The quoted verses are not found in Yâdyavalkya Smriti ! they occur in Manû, but with different version (*vide* M 12, 5-6-7). २ B and D. read अनिबन्ध- for अनिबद्ध- and J असबद्ध- for the same. ३. G. reads मृग for मृग-. ४ G and I omit -शेष- and J. reads नानाविधकर्मविशेष- for नानाविधनिषिद्धकर्मशेष-. ५. I. reads गुरूणां for गुरुणा. ६. B. D. E. H. read वेदाभ्यसन चरेत् and G वेदाध्ययनं चरेत् both for वेदाभ्यासमाचरेत् ७ E. I. and J read प्रयाति विहीनेषु for तु जातिविहीनेषु. ८. B, and D. substitute तु for च, while I. reads कालहतो- for कालकृतो-.

इति । स्कान्दे नागरखण्डे[1]—

'प्राप्नुवन्ति कुदेशे च जन्म[2] ये हेतुवादकाः ।
स्वामिद्रोहरता ये च कुकुले[3] जन्म चाप्नुयुः ॥
अदत्त्वा ये तथाऽश्नन्ति पितृ-देव-द्विजातिषु ।
दुर्भिक्षे जनतापे च कुदेशे जन्म चाप्नुयुः ॥
ये च कुर्वन्ति दम्पत्योर्विवादं सानुरागयोः ।
विरूपा भ्रममाणाश्च सर्वलोकविवर्जिताः ॥
दरिद्रा जायया भ्रष्टा भवन्ति विगतायुषः ।
कन्यादाने च विघ्नं यो विक्रयं यः करोति वा ॥
स कन्याः केवलाः[4] सूते न पुत्रं केवलं क्वचित्[5] ।
जायन्ते ताश्च बन्धक्यो[6] विधवा दुर्भगास्तथा[7]' ॥

इति[8] । प्रभासखण्डेऽपि—

'यैर्न दत्तं नरैः किञ्चित्तेषां चिह्नं दरिद्रता ।
जायन्ते रोगिणो रौद्रा हिंस्राः कुब्जाश्च वामनाः[9] ॥
अपुत्रा कलहाक्रान्ताः परदारोपसेवकाः ।
महारजनकर्माणः* कुचेलाः कुशरीरिणः ॥

---

* अत्र-'राजक'-तथा '-राजिक-' इत्यपरं पाठद्वयं दृश्यते । न तदिहोपयुक्तमिति प्रतीमः । -राजक-राजिक- इत्येकार्थमेव । 'महाराजिक-

---

१. J. reads नागरखण्डम् २ B and D substitute जनाः for जन्म. ३. I reads कुकुटे for कुकुले ४ G. and I. read केवल for केवला· ५ B. D and G. read वर्धक्यो for बन्धक्यो and J. वार्धक्ये for the same. ६ We follow here A G. and I; while B. D E. H and J. substitute क्वचित् for तथा. ७ B. D. E. and H omit इति, while J इति । प्रभासखण्डे ऽपि. ८. B. D. and H read मानवा for वामना. ९. E. G. H. and I. read महाराजक- and B. D. and J महाराजिक- for महारजन-.

कुदम्भाश्चपला लुब्धा मूर्खा निष्ठुरभाषिणः।
दानहीना भवन्त्येते देव-ब्रह्मस्वभक्षकाः'॥

इति। स्कान्दे रेवाखण्डे—

'पिता माता गुरुर्भ्राता अन्यो वा विकलेन्द्रियः।
भवन्ति नादृता यैस्तु ते भवन्ति नराधमाः॥
इह मानुषलोके ऽस्मिन् दीनान्धास्ते भवन्ति च।
ये त्यजन्ति स्वकां भार्यां मूढाः पण्डितमानिनः॥
ते यान्ति नरकं घोरं तामिस्रं नात्र संशयः।
तत्र वर्षशतस्यान्ते इह मानुषतां गताः॥

---

साध्याश्च'(१. १. १०) इत्यमरसिंहो गणदेवतानामान्याह। तथा च—

'महाराजिकनामानो द्वे शते विंशतिस्तथा'।

इत्याहुः पुराणकाराः। अतः महारजनकर्मणि इत्येव पाठः साधीयान् भाति। महारजनं कुसुम्भं तत्कर्मा वस्त्ररंजनकर्मेत्यर्थः। 'रजक-रजन-रजस्सूपसङ्ख्यानं कर्तव्यम्' इति काशिकोक्त्या न लोपः।

---

१ G. omits this line,

कुदम्भाश्चपला लुब्धा मूर्खा निष्ठुरभाषिण ।;

while I. reads कुदण्डाश्चपला for कुदम्भाश्चपला. २. I. reads धनहीना for दानहीना; while B. D. and G. omit the following portion·—

'दानहीना भवन्त्येते देव-ब्रह्मस्वभक्षका.'॥

इति। स्कान्दे रेवाखण्डे—

'पिता मातागुरुर्भ्राता अन्यो वा विकलेन्द्रिय ।.

३. B. and D read दानहीना ये for नादृता यैस्तु. ४. All, except A, substitute वै for च. ५. B and D. insert इति after नात्र संशय. ६. G. B. and D. read गत., for गता; while G. substitutes अनुष्ठानतो for मानुषतां.

दुश्चर्मा दुर्भगश्चैव दरिद्रः सम्प्रजायते ।
जायते गृध्रसीयुक्तः परभार्योपसेवकः ॥
गद्गदोऽनृतवादी स्यात् मूकश्चैव गवामृते ।
अन्नं पर्युषितं विप्रे ददन्वै कुब्जतां व्रजेत् ॥
मात्सर्यादपि जात्यन्धो द्वेषाच्च बधिरो भवेत् ।
अदत्वा भक्ष्यमश्नाति अनपत्यो भवेच्च सः' ॥

इति । गरुडपुराणे—

'अवमत्य च ये यान्ति भगवत्कीर्तनं नराः ।
बाधिर्यमुपयान्त्याशु ते वै जन्मनि जन्मनि ॥
पश्यन्तो भगवद्द्वारं तामसास्तत्परिच्छदम् ।
अकृत्वा तत्प्रणामादि ये यान्ति पुरुषाधमाः ॥
जात्यन्धास्तेऽभिजायन्तेऽप्यङ्गहीनापरिग्रहाः ।
पङ्गवः पादहीनाश्च कुष्ठिनो भुवि ये नराः ॥
विष्णुच्छाया ध्रुवं तैस्तु लङ्घिता स्यान्न संशयः।
तथा च भगवद्धाम्नश्छायामाक्रमते तु यः ॥

---

१. B. and D. read दुर्भगा for दुर्भगः, but it seems incorrect; while I. substitutes दुष्कर्मा for दुश्चर्मा. २. We follow here only A, while B. D. E. and H. read गृध्रसयुक्त, J गृध्रसम्पृक्त, I. ग्रन्थिसयुक्त and G. गृध्रवीयुक्त all for गृध्रसीयुक्त. ३. B. and D read this line.—

गद्गदोन्नतवादी स्यान्मूषकश्चैव जायते ।

४. B. and D. read इह for अपि and G. J. अति and इति- ५. All, except A. and I., substitute तु for च. ६. B. and D. read बाधिर्यन्तु प्रयान्त्याशु ७. E. substitutes शुनि for भुवि.

हीनवर्णस्तदा लोके भवत्यत्यन्तदुर्मतिः ॥
विरूप एव भवति तथाऽविक्रेयविक्रयी ।
विनाऽपराधेन तथा कृत्वा पैत्न्यधिवेदनम् ॥
स राजभयमाप्नोति व्यवहारे तथैव च ।
मूलकर्म तथा कृत्वा वशीकरणकारणात् ॥
द्वेष्यो भवति लोकेऽस्मिन् जायते नात्र संशयः ।
परिवेत्ता तथा लोके सर्वव्याधिसमन्वितः ॥
अयाज्ययाजकश्चैव जायते वर्णसङ्करः ।
वेदविक्रयिको मूर्खः कितवश्चैव जायते ॥
नास्तिकस्तु दरिद्रः स्यात् सर्वकर्मविवर्जितः ।
अतिमानप्रवृत्तस्तु जायते कुत्सिते कुले ॥
श्वपाक-पुल्कसादीनां कुत्सितानामचेतसाम् ।
कुलेषु तेऽभिजायन्ते गुरु-वृद्धापवादकाः ॥
श्वभ्रे तु मरणं लोके विषैः स्थावर-जङ्गमैः ।
दंष्ट्रिभ्यश्च नखिभ्यश्च चण्डालाद्ब्राह्मणात्तथा ॥

---

१ I and J substitute तथा for तदा २ B and D read पत्न्याधि-देवताम् for पत्न्यधिवेदनम् ३ B and D. राजापथ्यम्, E G. H and I. राजामयम् for राजभयम् ४. All, except A and I. read सर्वधर्म- for सर्वकर्म-. ५. B. D. and G read -प्रवृत्तिस्तु for -प्रवृत्तस्तु. ६ I inserts here –

श्वभ्रे तु मरणं लोके विषै स्थावर-जङ्गमै ।; ?

whose proper place in the P. E beginning with notation इति ब्रह्मपुराणे. ७ I. makes all confusion here These 9 lines of Vishnûdharmottara, 11 of Mahâbhârata, 11 of Sivadharmottara, 15 of Vriddha Gautama, that is, altogether 49 lines Again, I. omits 13 lines Umâ Maheś-varasamvâda and then reads 8 lines and one more, so the total number of lines 59 I. gives after the 7 lines of Nandipurâna. ८ A. and E. read ब्राह्मणाधमात् for ब्राह्मणात्तथा and J. ब्रह्मणस्तथा for the same.

गृहाधःपतनाच्चैव द्रुमाधःपतनात्तथा ।
गोभ्यश्च मरणं लोके विज्ञेयं पापकर्मणाम् ॥
ताडितस्ताड्यते लोके हारितो हार्यते तथा ।
हत्वा वधमवाप्नोति नात्र कार्या विचारणा ॥
यद्यत् परस्याचरति तत्तदस्योपजायते ।
प्राप्नोति यादृशीं बाधां कर्मणा स्वकृतेन यः ॥
तस्यापि तादृशी बाधा ज्ञेया जन्मनि जन्मनि ।
तस्मात् सर्वप्रयत्नेन परबाधां विवर्जयेत्' ॥
(वि. ध. २.१०७. ६–३०)

इति । महाभारते ऽपि—

'ये नास्तिका निष्क्रियाश्च गुरु-शास्त्रातिलङ्घिनः।
अधर्मज्ञा गताचारास्ते भवन्ति गतायुषः ॥
कुशीला भिन्नमर्यादा नित्यं सङ्कीर्णमैथुनाः ।
अल्पायुषो भवन्तीह नराः निरयगामिनः ॥
लोष्टमर्दी तृणच्छेदी नखखादी च यो नरः ।
नित्योच्छिष्टः सूचकश्च नेहायुर्विन्दते महत् ॥
आयुरस्य निकृन्तामि प्रज्ञामस्याददे तथा ।

---

१ B and D. read गृध्राध- for गृहाध- २ I. reads -पातनात् for -पतनात्. ३ B. D. E. G. H. and J read पदम् for वधम् ४ G. reads च for य. ५ J reads परिबाधां for परबाधां ६. B D. and H omit इति ७. G. reads गुरु शास्त्रातिलंघिता for गुरु-शास्त्रातिलंघिन. ८. J B and D. read धर्मज्ञा विगताचारा, while J. adds न before भवन्ति. ९ B and D. read नित्यसंकीर्ण- for नित्यं संकीर्ण- १०. J. reads न वा for नरा. ११ B. and D. read नखच्छेदी for नखखादी. १२ G omits this line.–

आयुरस्य निकृन्तामि प्रज्ञामस्याऽऽददे तथा ।,

while B. and D. read प्रकृन्तानि, E. H and J निकृन्तानि for निकृन्तामि.

ये उच्छिष्टः प्रवदति स्वाध्यायं चाधिगच्छति ।
यश्चानध्यायकालेऽपि मोहादभ्यसते द्विजः ॥
प्रत्यादित्यं प्रत्यनलं प्रतिगां च प्रतिर्द्विजम् ।
ये मेहयन्ति पथि च ते भवन्ति गतायुषः' ॥

( नास्तीदं मुद्रितम. भा. पुस्तके )

इति । शिवधर्मोत्तरे—

'देवद्रव्योपजीवी च स भवेदवबाहुकः ।
देवद्रव्यं स्वयं येन भुक्तं यस्य सदो भवेत् ॥
रसज्ञाविधुरः कुब्जः कण्डूः सर्वाङ्गदुःखितः ।
देवस्पर्शी नरः कृत्वा परप्रत्ययकारणात् ॥
मिथ्याचारं चरेत् पश्चाद्बुद्बुदास्यो नरो भवेत् ।
देवदासोदनं भुक्त्वा बृहद्बुल्मी च वै क्रमात् ॥
सर्वाङ्गकुष्ठी तिमिरी नरो भवति पापतः ।
दीपं देवगृहाद्धृत्वा पङ्गुश्चान्धो भवेन्नरः ।
मूर्च्छी भ्रमी सुरद्वेष्टा पक्षपाती ज्वरी भवेत् ॥
देवावमन्ता भवति सर्वदा मैथुने रतः ।
सदाऽपहृतसर्वस्वः कुत्सितः काममोहितः' ॥

---

१. G omits य २ I reads अपबाहुक for अवबाहुक ३ G. reads यदा for सदा ४. B D and G read रजसा बधिर कण्ठ कद्रु ., G. reads कण्ठः कण्डू रसज्ञाविधुर., E and H रसज्ञाबधिर कुण्ठ. कण्डु. for रसज्ञाविधुर कुब्ज कण्डू ५ G substitutes अम्बुदास्यो, I. E and H अर्बुदास्यो and J अर्बुदाक्षो for बुद्बुदास्यो. ६ I देवदासं धन for देवदासोदन. ७. B and D. read तिमिरो नरो भवति पातक , G. तिमिरैनैरो भवति पापत·. ८. B. and D, read देवगृहे धृत्वा and J देवगृहाद्धत्वा both for देवगृहाद्धृत्वा. ९. B. D. G and J. read मूर्च्छा- for मूर्च्छी १० G. reads मैथुनी नर. for मेथुने रत .

इति। वृद्धगौतमः—

'देवद्रव्योपजीवी[1] दुर्द्रोगी। प्रतिज्ञाय ब्राह्मणस्य[2]ऽदानाद-
ल्पायुः। पत्नीबहुत्वे सत्येकारामः[3] क्लीबः। स्वामिना
धर्मे[4] नियुक्तस्तदनुष्ठानाशक्तो जलोदरी। दुर्बलबाधे
बलवतामुपेक्षायामङ्गहीनः। व्यवहारपक्षपाती[5] जिह्वा-
रोगी। स्वयं प्रवर्त्तितधर्मानुष्ठानच्छेदने प्रतिपन्नेष्टवि-
योगः। स्वयमग्रभुक् शूलरोगी। परिक्षीणमित्र-बन्धु-
स्वामि-स्वजनावमन्ता परिभूतवृत्तिः। अतिथि पश्य-
न्नश्नतः कपालपद्दिका[6]। सूर्य[7]प्रकाशे प्रतिश्रयादानादि-
ष्टवियोगः। छद्मना गुरु-स्वामि-मित्रमुपचरतः प्राप्तार्थ-
परिभ्रंशः[8]। विस्रम्भापहारी सर्वदुःखाश्रयः[9]। गोदुःखकारी
गोनासः[10]। गोनिर्दयश्चिपिटनासः। पथनाशको[11] निस्ते-
जस्कः सभायाम्। गलगण्डी[12] महदधिक्षेपी। पुण्याक्षेपी

---

१ G adds च after देवद्रव्योपजीवी २ G reads ब्राह्मणाऽदानात् for ब्राह्मणस्याऽदानात्, while J reads प्रतिजायते ब्राह्मण स्यादनल्पायु for प्रतिज्ञाय ब्राह्मणस्याऽदानादल्पायु it shows that the word belongs to the first Sûtra ३ G. omits सति. ४ B. and D substitute गृहे for धर्मे and हरौ for जलोदरी, but the latter seems to be a mistake ५ I. reads -पाते and J. व्यवहारे पक्षपाती for -पाती and व्यवहारपक्षपाती ६ E. reads -पद्दिका, for -प्रहीका ७ G. reads सूर्यास्तकाले for सूर्यप्रकाशे. ८. H. reads -विभ्रश for -परिभ्रंश. ९. B. D and G omit the following:-विस्रम्भापहारी सर्वदु खाश्रय । गोदु खकारी गोनास । गोनिर्दयश्चिपिटनास । पथनाशको निस्तेजस्क सभायाम्। गलगण्डी महदधिक्षेपी । पुण्याक्षेपी वक्रनास, while E. and J. read सर्वदु खाश्रयी for सर्वदु खाश्रय. १० I reads गोनामहा for गोनास. ११ Except A. and I all others do not insert पथनाशका, but read only निस्तेजस्क. १२. Except A., all others omit महदधिक्षेपी; while I. reads गलमन्थी for गलगण्डी

वक्रनासः। शिष्टचीर्णधर्मदूषकः केकराक्षः। साधुजन-देव-तपस्वि-द्विजे-गुरु-ज्ञान-योगद्वेष्टा वक्रास्यः। तटाकारामभेत्ता नेत्राङ्गहीनः। कृतघ्नः सर्वारम्भविकलः। परस्वाभिलाषी क्षयरोगी स्यात्। चोररक्षकः—

व्यवहारेष्वमध्यस्थश्चौरवृत्तिपरश्च यः।
वाणिज्यलाभो नो तस्य देशान्तरगतस्य च॥
व्याधिः स्यात् प्राणसन्देहो मृतिस्तत्रैव पापिनः'॥

इति। उमा-महेश्वरसंवादे—

'अकृत्वा खलयज्ञं तु यस्तु धान्यं प्रवेशयेत्।
मरुदेशे भवेद्वृक्षः फल-पुष्पविवर्जितः॥
दिव्यं वर्षसहस्रं तु दुरात्मा कर्षको भवेत्।
तस्यान्ते मानुषो भूत्वा कदाचित् कालपर्ययात्॥
दरिद्रो व्याधितो मूर्खो ह्यकुलीनस्तु जायते।
यस्तु क्षुद्रेण भावेन स्नेहविच्छेदकारकः॥
सोनपत्यत्वमाप्नोति तस्य पापस्य कारणात्।
न शृण्वन्ति गुरोर्वाक्यं वेदवाक्यं च ये नराः॥
सर्वेषां चैव नास्तिक्यं तेन ते यान्ति मूकताम्।
प्रार्थयित्वा तु यो गां वै सवत्सां क्षीरसंयुताम्॥

---

१ I. reads वक्रणस, but by grammatical rule it is वक्रनास २ B D. E G. H. and J read शिष्टाचीर्ण-, but the reading does not give proper sense here. ३. B and D do not insert -द्विज- ४ J. reads नक्रास्य for वक्रास्य. ५ G. reads उडाक- for तटाक- and H reads तटाक-रोमभेत्तारो नेत्राङ्गहीना for तटाकारामभेत्ता नेत्राङ्गहीन· ६. E. G. and H. read परस्वभिलाषी for परस्वाभिलाषी. ७. I. reads चौरक्षक and G. चारराक्षस both for चोररक्षक. ८. I. omits उमा-महेश्वरसंवादे and also this whole quotation. ९ B and G. read मरुद्देशे for मरुदेशे १०. J. reads च for तु. ११. E reads देववाक्य for वेदवाक्य.

आत्मना पिबति क्षीरं तेनासौ याति चान्धताम् ॥
प्रलवं ष्ठीवनं वह्नौ कृत्वा सर्वाङ्गदाहयुक् ॥
उदरे शूलसंयुक्तो जायते मनुजाधमः' ॥

इति । शिवधर्मोत्तरे—

'मुखेकृष्णव्रणी श्वित्री गरदो मत्तको भवेत् ।
जिह्वा-वक्लव्रणी ह्यन्यदुःखकारी भवेन्नरः ॥
अपकारं तु यः कुर्यादुपकर्तुर्भवेन्नरः ।
श्वास-कासी ज्वरी सर्वगात्ररोगी मृतप्रजः ॥
मृतपुत्रोऽप्यबन्धुः स्याद्यो द्वेष्टि परसन्ततिम् ।
परवित्तविनाशाय करोति स विसर्पवान् ॥
अकारणाद्धर्मपत्नीत्यागी स्याच्च जलोदरी ।
वेश्यां कुलवधूं कृत्वा वर्तते यो नराधमः ॥
भक्तं भोक्तुमशक्तश्च मण्डपानेन जीवति ।
परेषां चेतसः क्लेशकारी भवति मानवः ॥
क्षयी ज्वरी प्रमेही च गुल्मी दाही भगन्दरी ।
रजस्वला-ऽन्त्य-चण्डाल-पापिष्ठ-पतितैः सह ॥
व्यवहारी पुष्पवत्यां भुक्त्वा कुष्ठी ज्वरी भवेत् ।
अनपत्यो दरिद्रश्च विभ्रस्तस्य विषप्रदः ॥

---

१. I. does not insert शिवधर्मोत्तरे and the following nine lines. २ J. reads मूर्ध्निकृष्णव्रणी for मुखकृष्णव्रणी. ३ H reads ह्यन्यत्- for ह्यन्य- and B. and D, substitute तु for हि. ४. J reads सर्वगात्री रोगी मृतप्रजा for सर्वगात्ररोगी मृतप्रज. ५. G. reads भुङ्क्ते for भक्त. ६. B. and D. read च मेही for प्रमेही and G. and J substitute दारी for दाही. ७. B. D. E. and J. read पुष्पवत्या for पुष्पवत्यां. H. also reads पुष्पवत्या and adds तु before भुक्त्वा. ८. B. and D. read विश्रस्तश्च for विभ्रस्तस्य.

निषिद्धवस्तुभोगेन मोहयेद्यः परान् पुमान् ।
परोपदिष्टज्ञानेन भवेदुन्मत्तको ऽपि वा ॥
ऋणं दत्वाऽधिकां वृद्धिं यो गृह्णातीह मानवः ।
स भूत्वा धनिनां वंशे व्रजेद्देशान्तरं ततः ॥
वाणिज्यलाभस्तत्रापि नास्ति तस्य नरस्य वै ।
अमुख्यमुख्यकारी यः स ज्वरी श्वासकासवान् ॥
सर्वाङ्गरोगी पापात्मा द्वेष्टा मृतसमाङ्गभाक्' ।

इति । उमामहेश्वरसंवादे—

'मृष्टान्नेन य आत्मानं पोषयन्ति नराधमाः ।
बालानां वीक्ष्यमाणानामददन्नप्ति निस्पृहैः ॥
न हुतं न तपस्तप्तं न दत्तं किञ्च ब्राह्मणे ।
आत्मैव पोषितो येन तत्पापं कथयाम्यहम् ॥
यत्र देशे त्वनावृष्टिर्यत्र वायुसमुद्भवः ।
तस्मिन्देशे क्षुधार्त्ताश्च जायन्ते पापकर्मिणः' ॥

इति । पद्मपुराणे—

'यस्तु विप्रत्वमुत्सृज्य क्षत्रधर्मं निषेवते ।
ब्राह्मण्यात् स परिभ्रष्टः क्षत्रयोनौ प्रजायते ॥

---

१ G reads पर. for परान् २. J. and I. read -ज्ञानो वा for -ज्ञानेन ३ B. and D. read सो for स and substitute गत for तत at the end of this line ४ All, except A and I. substitute एव for अपि. ५ Except A. and I. all others substitute पापेन for पापात्मा, while J. reads -समांगति for -समाङ्गभाक्. and I. reads सर्वाङ्गरोग for सर्वाङ्गरोगी. ६. All, except I., read निस्पृहम् for निस्पृह. ७. Except G and H read दत्तं for न दत्त. ८ All, except A. and I., read यैस्तु; while G. reads यस्तु. ९. B. and D. read क्षत्रकर्म for क्षत्रधर्मं.

वैश्यकर्मा च यो विप्रो लोभ-मोहव्यपाश्रयः[1]।
स द्विजो वैश्यतामेति शूद्रकर्म करोति यः ॥
स्वधर्मप्रच्युतो विप्रः स हि शूद्रत्वमाप्नुयात्[2]।
क्षत्रियो वा महाबाहो वैश्यो वा धर्मचारिणौ[3] ॥
स्वानि कर्माण्यपाकृत्य शूद्रकर्म निषेवते।
स्वस्थानाच्च परिभ्रष्टो जायते वर्णसङ्करः ॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा याति तादृशः।
शूद्रान्नेनोदरस्थेन म्रियते यदि पुत्रक[4] ॥
ब्राह्मणः शूद्रतामेति नास्ति तत्र विचारणा' ॥
(प. पु. ५, २६. ७–१३)

इति। मार्कण्डेयपुराणे–

'ब्राह्मणः क्षत्रियो वैश्यः स्ववर्णे पाणिसङ्ग्रहम्[5]।
अकृत्वा त्वन्यजापाणेः[6] पतन्ति नृप सङ्ग्रहात्[7] ॥
यश्च यस्यास्तु हीनायाः कुरुते पाणिसङ्ग्रहम्।
अकृत्वा वर्णसंयोगं सोऽपि तद्वर्णभाग्भवेत्' ॥
(नास्तीदं मुद्रितमा. पु. पुस्तके)

---

१. E and J. read व्यपाश्रय for -व्यपाश्रय. २. G. reads सह शूद्रत्वमागतं for स हि शूद्रत्वमाप्नुयात्. ३ B and D read धर्मचारिण, E. G and J. धर्मचारिणि and H. धर्मधारिणि all for धर्मचारिणौ ४ G. omits the following portion —

. . . . . शूद्रो वा याति तादृश।
शूद्रान्नेनोदरस्थेन म्रियते यदि पुत्रक ॥
ब्राह्मणः शूद्रतामेति नास्ति तत्र विचारणा'।
इति। मार्कण्डेयपुराणे—
ब्राह्मण क्षत्रियो वैश्य-.

५. B. D. and J read पुत्रक for पुत्रक. ६. B. and D read ऽस्यन्त्यजापाप, E. अन्त्यजापाणे and I. स्वन्यथापाणे all for स्वन्यजापाणे. ७. B. and D read -सग्रह for -संग्रहम्.

इति ॥

अथ विशेषेण कर्मविपाकः ।

तत्र[1] हिंसाविशेषाद्योनिविशेषः । तत्र मनुः—

'यां यां योनिं च जीवोऽयं येन येनेह कर्मणा ।
क्रमशो[2] याति लोकेऽस्मिंस्तत्तत्सर्वं निबोधत ॥
बहून् वर्षगणान् घोरान् नरकान् प्राप्य तत्क्षयात्[3] ।
संसारान्[4] प्रतिपद्यन्ते महापातकिनस्त्विमान् ॥
श्व-शूकर-खरोष्ट्राणां गो-ऽजा-ऽवि-मृग-पक्षिणाम् ।
चण्डाल-पुल्कसानां च ब्रह्महा योनिमृच्छति' ॥
( म. स्मृ. १२. ५३–५५ )

इति । नन्दिपुराणे —

'नरकेषु क्रमेणैव ब्रह्महा पा[5]त्यते नरः ।
कल्पं कल्पं ततश्चान्ते स्थावरश्चै[6] प्रजायते ॥
तृण-गुल्म-लता-वल्ली-वीरुद्द्रुमविभेदतः ।
तृणभेदास्त्वगणि[7]ता गुल्मभेदास्तथा मताः ।
लताभेदाश्च निःसङ्ख्या वल्लीभेदास्तथैव च ॥
वीरुद्भेदास्त्वसंख्याता असंख्या द्रुमजातयः ।
तेषां च[8] देशभेदेन पुनः कष्टत्वमिष्यते ॥

---

१. J. substitutes अत्र for तत्र and E. corrects योनिविशेषा. २ E. G. and I. read क्रमशोऽयाति लोकेऽस्मिन्न तत्सर्वं निबोध मे, while H क्रमशोऽस्तीति for the same ३ B D. E G. H I and J. read तत्क्षणात् for तत्क्षयात्. ४. E reads ससारात् for संसारान्. ५. I. reads पाच्यते for पात्यते. ६ B. and D. read स्थावरत्वं for स्थावरश्च ७ G. reads अगुणिता for अगणिता. ८. B. and D. read द्रुमभेदेन पुनस्तृणत्वम्, G. देशभेदे च पुनः कृष्टत्वम् both for देशभेदेन पुन कष्टत्वम्; while J. substitutes कृच्छ्रत्वम् for कष्टत्वम्.

ततः[1] केनापि कालेन नानास्थावरयोनितः[2] ।
कर्म भुक्त्वा क्रमेणैव भवन्ति च सरीसृपाः ॥
वृक्ष-वल्कलभेदेन[3] देशभेदेन वाप्यथ ।
सरीसृपादिभेदेन तत्र भुक्त्वा तु पापकर्म[4] ॥
मृगेषु जायते मर्त्यो भेदैरगणितैस्ततः ।
तत्रापि भुक्त्वा स्वं कर्म जायते पशुयोनिषु ॥
तत्रापि भौतिकं भोगं भुक्त्वान्ते गोत्वमाप्य तु[5] ।
मुच्यते पशुजन्माच्च[6] ततो जायेत मानुषे ॥
तत्रापि नियमो नास्ति श्वपाकाद्येषु जायते ।
विप्रान्तेषु मनुष्येषु जायते पातकी नरः[7]' ॥

इति । शिवधर्मोत्तरेऽपि—

'एवं पापविशुद्ध्यर्थं[8] सावशेषेण कर्मणा ।
ततः क्षितिं समासाद्य जायन्ते देहिनः पुनः ॥
तत्रानुभूय दुःखानि जायन्ते कीटयोनिषु ।
निष्क्रान्ताः कीटयोनिभ्यः क्रमाज्जायन्ति पक्षिणः ॥
संक्लिष्टाः पक्षिभावेन[9] जायन्ते मृगयोनिषु ।
मृगं[10]दुःखमतिक्रम्य जायन्ते पशुयोनिषु ॥

---

१ I omits this and the following nine lines; while G. reads तत्र for तत. २. E. reads -योंनिन· for -योनित ३ B. D. G. H and J read वृक्ष-वल्कलभेदेन for वृक्षवल्कालभेदेन ४. J. reads पातकम् for पापकम्. ५. B and D read गोत्वमप्युत, G गोत्वमाप्नुयु both for गोत्वमाप्य तु. ६. B. D. E. G. and H. read -जन्मास्त for -जन्माच. ७ G substitutes जन for नर·. ८. J. reads -विशुद्धश्च for -विशुद्ध्यर्थं ९ B. and D. read कीटभावेन for पक्षिभावेन. १०. G reads उमदु खम् for मृगदु खम्, while B. and D omit this whole line—

मृगदु.खमतिक्रम्य जायन्ते पशुयोनिषु ॥.

पशुयोनिं समासाद्य पुनर्जायन्ति मानुषाः ।
एवं योनिषु सर्वासु परिभ्राम्यं क्रमेण तु ॥
कालान्तरवशाद्यान्ति मानुष्यमतिदुर्लभम् ।
उत्तमं चापि मानुष्यं प्राप्यन्ते पुण्यगौरवात् ॥
विचित्रा गतयः प्रोक्ताः कर्मणां गुरु-लाघवात् ।
ततो मानुषतां प्राप्य व्याधिभिस्तत्र पीड्यते ॥
कुष्ठरोगेण घोरेण ब्रह्महत्यां प्रयोजयन्[3] ।

इति । मार्कण्डेयपुराणे—

'अशस्त्रं पुरुषं हत्वा नरः सञ्जायते खरः ।
कृमिः स्त्रीवधकर्ता[4] च बालहा[5] चोपजायते ॥ (१८)
वृषस्य वृषणौ छित्वा षण्ढत्वं प्राप्नुयान्नरः ।
परिहृत्य ततो भूयो जन्मनामेकविंशतिम् ॥
कृमि-कीट-पतङ्गेषु स्थितस्तोयचरेषु[7] च ।
गोत्वं प्राप्य च चण्डाल-पुल्कसादि जुगुप्सितम्[9] ॥ (३३)

---

१. I. reads परिक्रम्य for परिभ्राम्य २. B D and J. read प्रापुस्ते for प्राप्यन्ते and H प्राप्नुस्ते for the same, but it seems incorrect. ३. I. reads प्रयोजयेत् for प्रयोजयन्. ४. B. D. and J. read कृमि स्त्री-वरहन्ता च, G. कृमिस्तु नरहन्ता च, E. and H. कृमि स्त्रीवरहन्ता च and I कृमि-स्त्री-परहन्ता च all for कृमि स्त्रीवधकर्ता च. ५ The text reads बालहन्ता च जायते for बालहा चोपजायते. ६. The text does not insert this Sloka —

वृषस्य वृषणौ छित्वा षण्ढत्व प्राप्नुयान्नर ।
परिहृत्य ततो भूयो जन्मनामेकविंशतिम् ॥

७. I reads तोयनरेषु for तोयचरेषु, while the text reads this line as follows :—

कृमिः कीट पतङ्गोऽथ पक्षी तोयचरो मृग· ।.

८ E. G. H I and the text substitute गोत्वं for गोत्र. ९. E. G. H. I. and J. read जुगुप्सित for जुगुप्सितम्.

पङ्ग्वन्धो बधिरः कुष्ठी यक्ष्मणा च प्रपीडितः।
मुखरोगाक्षिरोगैर्वा रोगैरन्यैश्च बाध्यते ॥ ( ३४ )
अपस्मारी च भवति गूढत्वं चैवं गच्छति। ( ३५ )
एष एव क्रमो दृष्टो गो-सुवर्णादिहारिणाम् ॥
विद्यापहारिणां चैव निर्देशभ्रंशिनां गुरौ' ॥ ( ३६ )
( मा. पु. १९. १८–३६ )

इति। ब्रह्मपुराणे—

'यस्तु रौद्रसमाचारः सर्वभूतभयङ्करः।
हस्ताभ्यां यदि पद्भ्यां वा रज्ज्वा दण्डेन वा पुनः ॥
लोष्टैः स्तम्भैरुपायैर्वा जन्तूंस्ताडयते ऽनिशम्।
हिंसार्थी निकृतप्रज्ञ उद्वेजनकरः सदा ॥

---

१. B D. E. G. H. and I read पङ्ग्वन्धबधिरः for पङ्ग्वन्धो बधिर.. २. B. and D read मुखरोगाक्षिरोगादि for मुखरोगाक्षिरोगैर्वा; while J. and the text substitute च for वा ३. The text reads गुदरोगैश्च for रोगैरन्यैश्च ४. The text reads च स गच्छति for चैव गच्छति. ५. G. and the text read -सुवर्णापहारिणाम् for -सुवर्णादिहारिणाम्, while B. and D. omit the following:—

'..... गो-सुवर्णादिहारिणाम्।
विद्यापहारिणां चैव निर्देशभ्रंशिनां गुरौ' ॥

इति। ब्रह्मपुराणे—

'यस्तु रौद्रसमाचार ..... ,।.

६. The text reads this line thus —

विद्यापहारिणश्चोग्रा निष्क्रयभ्रंशिनो गुरौ ॥.

७. E. G. H. and J. read निश्चयभ्रंशिनां गुरो for निर्देशभ्रंशिनां गुरौ. ८ B. D. and G. read कार्यान्त ताडयेन्निशम्, J. जन्तूंस्त्रासयतेऽनिशम् both for जन्तूंस्ताडयतेऽनिशम्; while G. puts च for वा. ९. B. and D. read हिंसार्थीविष्कृतप्रज्ञ उद्वेगजनकः and G. हिंसार्थीविष्कृतप्रज्ञ उद्वेजनकर both for हिंसार्थी निकृतप्रज्ञ उद्वेजनकरः.

एवं शीलसमाचारो निरयं प्रतिपद्यते।
स चेन्मनुष्यतां गच्छेद्यदि कालविपर्ययात् ॥
वध-बन्धपरिक्लिष्टः कुले जायेत सो ऽधमे।
लोकद्वेष्टाऽधमः पुंसां स्वयं कर्मकृतैः फलैः' ॥

इति।

अथ हिंस्रकर्मशेषफलानि।

तत्र हिंस्रकर्मविशेषफलानि शङ्ख-लिखिताभ्यां दर्शितानि—

'अत ऊर्ध्वं बहूनि वर्षसहस्राणि यमविषये कुम्भीपाक-रौरवादिषु स्थानेषु दुःखान्यनुभूयेह जातानामिमानि लक्षणानि भवन्ति। तद्यथा ब्रह्महा कुष्ठी गोघ्नश्चान्धो ऽनेकरोगिणश्च'।

इति। यमः—

'अशुद्धानां तु पापानां पतितानां च कर्मभिः।
उत्तीर्णानां च तिर्यक्त्वादिहे भवति लक्षणम् ॥
इह दुश्चरितैः केचित् केचित् पूर्वकृतैस्तथा।
प्राप्नुवन्ति दुरात्मानो नरा रूपविपर्ययम् ॥
द्विजघ्नं कुष्ठिनं विद्यात् कुनखं स्वर्णहारकम्।
व्यङ्गाश्चाधार्मिणश्चैव जायन्ते प्राणिहिंसकाः' ॥

---

१. Except A. G. I. and J all read मानुष्यतां for मनुष्यतां, while B. and D substitute प्राप्तो for गच्छेत्. २. B. D. and G. read ऽधमः for ऽधमे ३. G and I. read हिंसा- for हिंस्र-; while B. and D. read हिंस्रकर्मशेषफलानि. ४. B. D. and H. read कुम्भीपाकादिरौरवादिषु. ५. B. D. E. H. and J. omit तत्. while G. substitutes यत् for तत् and E. H. and J तथा for यथा. ६. G. substitutes च for तु. ७. H substitutes तु for च.

इति। हारीतः—

'कुनखी भ्रूणहा। ब्रह्मघ्नः कुष्ठी। परदुःखदायिनो नित्यान्धाः। परार्तिरता दीर्घरोगिणः।
दृष्ट्यपहर्तारोऽन्धाः। श्रोत्रापहर्तारो बधिराः।
वाचोपहर्तारो मूकाः। एवं ह्याह—
यदङ्गं पीड्यते येन तेन हीनोऽभिजायते।
नाऽकृत्वा लभते किंचित् शुभं वा यदि वाऽशुभम्'॥
(हा.स्मृ.२४.७३–८०)

इति। काश्यपः—

'क्षयी स्यात् क्षेत्रहरणे अर्शीवान्नृवधेऽपि च।
जलोदरयुतः सः स्यात् स्वनारीणां च हिंसकः॥
कर्णभेत्ता कर्णशूली ओष्ठरोग्योष्ठनाशकः।
दन्तपातनकर्ता च दन्तरोगी भवेत् सदा॥
उरःस्तम्भादुरःस्तम्भी अक्षिरोग्यक्षिनाशकः।
पदौ तु यस्ताडयति विसर्पी सः भवेन्नरः॥

---

१. G. omits भ्रूणहा. २. G. reads परस्त्रीरता and I. परदाराभिरताः both for परार्तिरता. ३. B. does not insert काश्यप. ४. B. D. G. H. and J. read क्षयः स्यात् क्षत्रभरणे; while H. substitutes पक्षः for क्षयी and E. reads क्षयः स्यात् क्षत्रभरणे for क्षयी स्यात् क्षेत्रहरणे ५. B and D. read सर्वानृतवचोऽपि च for अर्शीवान्नृवधेऽपि च, while G and I. substitute अर्शीवान् and H. नृपवधे for अर्शीवान् and नृवधे respectively. ६ B. and D. read स्वाङ्ग for स स्वात्. ७. E. I and J. read कर्णमूली for कर्णशूली, while J. substitutes कुष्ठ- for ओष्ठ-. ८. D. reads -नाशन-. ९. I reads उरस्तस्तादुरस्तम्भी through mistake. १०. G. reads पादौ for पदौ. ११. B D. H. substitute च for स.

पीडाभप्रियकर्ता च धनुर्व्याधिर्धनुर्ग्रहात् ।
पादकीली स भवति पादहन्ता च यो भवेत् ॥
स गद्गदी दारयति यो वृक्षाननतिविस्तृतान् ।
शूलेन शूली भवति मनुष्याणां च हिंसकः ॥
असृग्गदी स भवति यस्तु हिंस्याद्दृढान् पशून् ।
नक्तान्ध्यं जायते तस्य यो गवां नयनद्वये ॥
करोति शूलप्रक्षेपं पूर्वभावप्रचोदितः' ॥

(का. स्मृ. ३. ४०–४६)

इति । व्यासोऽपि—

'पितृहा याति पैशाच्यं जात्यन्धो मातृघातकः ।
प्राण्यङ्गं मृगशावं च हत्वा वन्ध्यो मृतप्रजाः ॥
असाध्यरोगी बालघ्नः क्षयी स्यात् सर्वजीवहा ।
गात्रकृच्छ्री व्रणी श्वित्री विसर्पी परघातकः ॥
नेत्ररोगो भवेत्तस्य यो ऽन्येषां दृष्टिघातकः ।
परेषां रसनाछेदी जिह्वास्यव्रणवान् भवेत् ॥

---

१ J. reads धेनुव्याधिर्धनुर्गृहात् for धनुर्व्याधिर्धनुर्ग्रहात् २. B and D. read पदकीली for पादकीली and H. पादकी स च for पादकीली स ३. I. reads असृग्दरी for स गद्गदी ४. G reads धारयति for दारयति, while J. पातयति for the same. ५. B and D read अतिविस्तरान् for अतिविस्तृतान्. ६. E. reads असृग्वादी and I. असृग्दरी both for असृग्गदी ७. I. substitutes वृथा for दृढान्. ८. B D and I. read मृतप्रज for मृतप्रजा ९. B. D. and G read अस्पर्शरोगी, H. असाध्यरोगी both for असाध्यरोगी and J. अर्शरोगी बालघ्नश्च for असाध्यरोगी बालघ्न १०. B. and D. read गात्रवृथी for गात्रकृच्छ्री. ११ D. reads नेत्ररोगी for नेत्ररोगो. B. and H. read also the same, but correct नेत्ररोगो. १२. E. G. A. H. I. and J. read रसनाछेदात् for रसनाछेदी. १३. J. reads -व्रणवाक् for -व्रणवान्.

कृतघ्नः स्फुटिताक्षो वा तृतीयज्वरसंयुतः।
चातुर्थकोष्ण-शीतोष्णज्वरी स्यात् सततं ज्वरी॥
ग्रामे वने वा जन्तूनां श्वभिर्यो भीतिमर्पयेत्।
भयोद्वेगकरोऽन्येषां पाषाणेनाथ घातकः॥
तलघाती च सम्भूतः कुलेषु धनिनां नरः।
गत्वा देशान्तरं तेषां तत्र रोगो महान् भवेत्'॥
(व्या. स्मृ. ६. १७–२२)

इति। वृद्धगौतमः—

'वृक्षच्छेत्ता वृथा यस्तु स नाडीव्रणवान् भवेत्'।

इति। वायुपुराणे—

'भवेत्स्फुटितपादस्तु यो निहन्याद्वनस्पतीन्।
प्राणिहिंसापरो* जन्तुघाती वा मृतसन्ततिः॥
मुखे कृष्णव्रणी श्वित्री वन्ध्यो वा स्याद्विसर्पवान्।
वल्मीकं तु खनित्वा यो हन्ति वायुभुजो नरः॥
गजचर्मी ज्वरी च स्यादाज्ञया पूर्वकर्मणः।
भ्रूणहा स्विन्नहस्तः स्याद्गृहिणीवानपत्यहा'॥

---

* प्राणिहिंसापरः जन्तुघाती वा मृतापत्यः मुखे कृष्णव्रणवान् वा कुष्ठवान् वन्ध्यो वा स्यादित्यर्थः।

---

१ Except B. D. G. and I. read -द्वार- for -ज्वर-. २. B. D. G. H. and J. read चतुर्थ- for चातुर्थ-. ३. I. reads सततज्वरी for सतत ज्वरी and G. also does the same. ४. H. reads सम्भूते कुष्ठेषु for सम्भूत. कुलेषु. ५. I. reads रागो for रोगो. ६. Except A. and I., all others omit इति. ७. B D. and G. do not insert इति. ८ B. and D. read वृत्तिसंतति, E. G. H. and J. हतसंततिः both for मृतसतति. ९. I. reads गजचर्मा for गजचर्मी. १०. B. D. G. and H. read छिन्नहस्त for स्विन्नहस्त.. ११ I. reads गृहिणी शासपत्न्यापि for गृहिणीवानपत्यहा, but it is meaningless.

इति । विष्णुधर्मोत्तरे—

'यं कंचिद्घातयित्वा तु प्राणिनं[1] भृगुनन्दन ।
मांसं भुक्त्वा तु[2] धर्मज्ञ भवतीह गदातुरः' ॥
(वि. ध. २. १०८. ४)

इति ॥

इति हिंसाशेषकर्म[3]फलानि ।

## अथापेयपानाभक्ष्यभक्षणकर्मविशेषाद्योनिविशेषैः[4]।

तत्र शिवधर्मोत्तरे—

'कृमि-कीट-पतङ्गानां विड्भुजां[5] चैव पक्षिणाम् ।
सुरापः प्राप्यते योनिं पूर्वकर्मानुसारतः' ॥

इति । उमा-महेश्वरसंवादे—

'मद्यव्यसनिनो ये च ये मद्यं सेवयन्ति च ।
शालां तु कारयेद्यस्तु मद्यपानं[6] ददाति यः ॥
मद्यविक्रयिणो ये च मद्यं[7] ये क्रीणयन्ति च ।
पिबन्ति ये नरा देवि सर्वे ते समभागिनः
ते शौण्डिका*[8] वा चण्डाला लुब्धका मत्स्यघातकाः।
दासत्वेनैव सुश्रोणि जायन्ते पुरुषाधमाः ॥

---

*नरकान्ते मद्यव्यसन्यादीनां जन्मान्याह । ते शौण्डिका इत्यादि । शौण्डिकादिष्वपि दासत्वेनैव न स्वामित्वेन । शौण्डिकादिदासा भवन्तीत्यर्थः।

१. E. G. H. and I read प्राणिना for प्राणिन २. B D substitute इह for तु ३. G. and J. omit -कर्म-; while except E and H. हिंसाविशेष- for हिंसाशेष- ४. J. reads -कर्मविशेष for -कर्मविशेषाद्योनिविशेष.. ५. B. and D. read द्विजानां for विड्भुजां ६. B. and D. read मद्यपात्र for मद्यपानं, while J. मद्यपानाद्दाति for मद्यपानं ददाति. ७. G. reads मद्ये for मद्य.

तिर्यञ्चोऽपि समुत्पन्ना यथा मृत्युमुपागताः ।
मद्यपानरता ये च शृणु तेषां गतिं शुभे[2] ॥
षष्टिवर्षसहस्राणि कृमिर्भूत्वा महीतले ।
कृमियोनिक्षये भूते पापं तु कथयाम्यहम् ॥
श्वानयोनिशतं गच्छेज्जम्बुके पञ्चविंशतिम् ।
मद्यपानरता ये तु कां गतिं यान्ति सुव्रते ? ॥
शूद्रस्य चेदृशं पापं मद्यपानरतस्य च ।
विप्रस्य कथयिष्यामि मद्यपस्य दुरात्मनः ॥
काको भूत्वा चिरं देवि विष्ठाभक्षस्तु जीवति ।
वर्षाणां द्वादशे लक्षे स जीवेत् पापकर्मकृत् ॥
स्वे मांसे परमांसेन यो देही वृद्धिमिच्छति ।
तस्य योनिशतं गत्वा शरीरं व्याधितं भवेत् ॥
यासु योनिषु जायन्ते नरा मांसस्य भक्षकाः ।
व्याधि-रोगशतैर्युक्ता जायन्ते तासु कर्मणा[10] ॥

---

१. I. reads मृत्युमुपागताम् for मृत्युमुपागता. २. J. substitutes प्रभो for शुभे. ३. E omits the following —

षष्टिवर्षसहस्राणि कृमिर्भूत्वा महीतले ।
कृमियोनिक्षये भूते पाप तु कथयाम्यहम् ॥
श्वानयोनिशत गच्छेज्जम्बुके पञ्चविंशतिम् ।

४. B D. H. and J. read जम्बुकं पञ्चविंशतिम्, and G जम्बुक पञ्चविंशति. ५. J substitutes वा for च. ६ B. and D read पान for पापं. ७. Except I read पक्षी. ८. H reads स्वमांसे परमासेन, and I. स्व-मांसं परमांसेन, while I. substitutes ऋच्छति for इच्छति ९. All, except A. and L., substitute बाधितं for व्याधित. १०. I. reads नरमासस्य for नरा मांसस्य.

इति । मनुः—

'कृमि-कीटं-पतङ्गानां विड्भुजां चैवं पक्षिणाम् ।
हिंस्राणां चैव सत्त्वानां सुरापो ब्राह्मणो व्रजेत् '॥
( म. स्मृ. १२.५६ )

इति । विष्णुरपि—

' अभोज्यानां भोजने अभक्ष्यभक्षणे चं कृमिः' ।
( वि. स्मृ. ४४. ११ )

इति । वृद्धगौतमः—

'विप्रवृत्तिविलोपेन दर्दुरः सप्तजन्मसु ।
निषिद्धान्नं तु यो भुङ्क्ते कमठः सो ऽभिजायते ॥
कीटाशी शीतलान्नाशी मत्स्याशी याचितान्नभुक् ।
आमन्त्रणं विना भुक्त्वा परान्नं काकतां व्रजेत्' ॥

इति ॥

## अथापेयपानादिकर्मशेषफलानि ।

इति । तत्र हारीतः—

' सुरापो बद्धाजिह्वः । अभक्ष्यभक्षः श्यावदन्तः' ।
( हा. स्मृ. २४. ६८–६९ )

---

१. H reads -कीर- for -कीट-. २. E. H. and J. read विड्भुजानां च for विड्भुजां चैव ३ B D and E omit च, while E reads अभोज्यानामभक्ष्यभक्षणे, I अभोज्यान्नभक्षणे, J. अभोज्यानां भक्षणे, and the text अभोज्यान्नाऽभक्ष्याशी all for अभोज्यानां भोजने अभक्ष्यभक्षणे च. ४ B and D. substitute गौतमः for वृद्धगौतम ; while G. omits इति and वृद्धगौतम :. ५. B. and D. read this line thus :—

अविप्रवृत्तिलोपेन दर्दुर सप्तजन्मसु ।.

G. also the same, but reads अविप्रे वृत्तिलोपेन and -जन्मनि. ६. E. and J. read मर्कटः, G. कर्मठः and I. कार्कटः all for कमठः. ७. I. reads सूतकान्नाशी for शीतलान्नाशी. ८. Except A. E. and J. all others read -कर्मविशेष- for -कर्मशेष-; while G. reads उपपानादि- for अपेयपानादि-.

इति। स्कान्दे रेवाखण्डे —

'पापशेषात्तु भवति सुरापः इयावदन्तकः'।

( स्कं. पु. रे. ख. ७१. २६ )

इति। शिवधर्मोत्तरे—

'अभक्ष्यभक्षी गण्डमाली'।

इति। शङ्ख-लिखितौ—

'अभक्ष्यभक्षी गण्डमाली'।

इति। काश्यपः—

'सुरापो लोलजिह्वः'।

इति॥ ( का. स्मृ. १३. ११ )

## अथ स्तेयकर्मविशेषाद्योनिविशेषाः।

तत्र मनुः—

'लूता-अहि-सरठानां च तिरश्चां चाम्बुचारिणाम्।
हिंस्राणां च पिशाचानां स्तेनो विप्रः सहस्रशः॥(५७)
संयोगं पतितैर्गत्वा परस्यैव च योषितम्।
अपहृत्य च विप्रस्वं भवति ब्रह्मराक्षसः॥ (६०)

---

१. B. and D. do not insert the quoted sûtra, but substitute तथैव. २. B. D. G. H. and J. reads बद्धजिह्व for लोलजिह्व. ३. B. D. H. and J. substitute -विशेष- for -विशेषा. ४. All, except A. and I., omit तत्र and E. omit also मनु. ५. B. and D. read अम्बुधारिणाम् for अम्बुचारिणाम्. ६. I. reads स पिशाचानां for च पिशाचानां. ७. B. D. G. I. and J. read भवन्ति ब्रह्मराक्षसा for भवति ब्रह्मराक्षसः.

मणि-मुक्ता-प्रवालानि हत्वा लोभेन मानवैः[1] ।
विविधानि च रत्नानि जायते लोहकर्तृषु ॥
धान्यं हत्वा भवत्याखुः, क्रांस्यं हंसो, जलं प्लवः ।
मधु दंशः, पयः काको, रसं श्वा, नकुलो घृतम् ॥
मांसं गृध्रो, वसां[2] मद्गुस्तैलं तैलपकः[3] खगः ।
चीरीवाकस्तु[4] लवणं, बलाकांशकुनिर्दधि ॥
कौशेयं तित्तिरिर्हत्वा क्षौमं हत्वा तु दर्दुरः ।
कार्पास-तान्तवं क्रौञ्चो, गोधा गां, वाग्गुदो[5] गुडम् ॥
चुच्छुन्दरी[6] शुभान् गन्धान्, पत्रं शाकं तु बर्हिणः ।
श्वावित् कृतान्नं विविधमकृतान्नं तु शल्यकः ॥
बकी[7] भवति हत्वाऽग्निं, गृहकारी[8] ह्यपस्करम् ।
रक्तानि हत्वा वासांसि जायते[9] जीवजीवकः ॥
वृको मृगेभं, व्याघ्रोऽश्वं, फेल[10]-पुष्पं तु मर्कटः ।
स्त्रीमृक्षस्तोककी वारि, यानान्युष्ट्रः पशूनजः ॥
यद्वा तद्वा परद्रव्यमपहृत्य बलान्नरः ।

---

१. G. I and J. read मानवा. and जायन्ते the plural forms instead of मानवः and जायते the singular ones. २ The text substitutes वपां for वसां. ३. B D. E H. and I read तैलवक and J and G. तैलवेकः both for तैलपकः ४. We follow here A G. and the text, while B. and D read चीरीकाक, E. and H. क्षीरहार, I क्षीरवास and J. क्षीरिपाक all for चीरीवाक ५ I. reads बालक for बलाका- ६ I reads कार्पास तान्तव for कार्पास-तान्तव ७ B. and D. चागुलो गुलम्, E. वागुला गुडम्, H. वाग्गुलो गुडम्, I वाडुवो गुडम् and J वागुडो गुलम् all for वाग्गुडो गुडम् ८ The text substitutes छुच्छुन्दरिः for चुच्छुन्दरी. ९ B D. substitute काको for बको and गृध्रकारी for गृहकारी. १० E. reads जायन्ते जीवजीवका. ११. B. and D. read फल-पुष्पे and the text substitutes फल-मूलं for फल-पुष्प.

अवश्यं याति तिर्यक्त्वं जग्ध्वा चैवाहुतं हविः ॥
स्त्रियोऽप्येतेन कल्पेन हृत्वा दोषमवाप्नुयुः ।
एतेषामेव जन्तूनां भार्यात्वमुपयान्ति ताः' ॥
( म. स्मृ. १२. ५७–६१ )

इति । याज्ञवल्क्यः—

'हीनजातौ प्रजायेत पररत्नापहारकः ।
पत्रशाकं शिखी हृत्वा, गन्धाञ्चुच्छुन्दरी शुभान्॥
मूषको धान्यहारी स्याद्यानमुष्ट्रः फलं कपिः ।
जलं प्लवः, पयः काको, गृहकारी ह्युपस्करम् ॥
मधु दंशः, पलं गृध्रो, गां गोधा, ऽग्निं बकस्तथा ।
श्वित्री वस्त्रं, श्वा रसं च, चीरी लवणहारकः ॥
प्रदर्शनार्थमेतत्तु मयोक्तं स्तेयकर्मणि ।
द्रव्यप्रकारा हि यथा तथैव प्राणिजातयः' ॥
( या. स्मृ. ३. २१३–१६ )

इति । मार्कण्डेयपुराणे–

'न्यासापहर्ता नरकाद्विमुक्तो जायते कृमिः । ( ६ )
धान्यं यवांस्तिलान्माषान्कुलित्थान्सर्षपाञ्चणान् ॥(७)

---

१. B. G. and D. read चैव इत for चैवाहुत. २. B. D E. G. H. and J read पत्नीत्वम् for भार्यात्वं; while B. D. and J. substitute तान् for ताः. ३. E. H and J. read छुच्छन्दरि. for चुच्छुन्दरी. ४. G reads फल for पलं. ५. I. and the text substitute तु ६ I. reads through mistake प्राणिजायते for प्राणिजातय ७. I. reads पुंसोऽपहर्ता for न्यासापहर्ता. ८. I. reads कुलुत्थान्, E. H. and the text कुलत्थान् both for कुलित्थान्.

सस्यान्यन्यानि वा हृत्वा मोहाज्ज्ञन्तुरचेतनः ( ८ )
सञ्जायते महावक्त्रो मूषको वज्रसन्निभः ॥ ( ९ )
भोजनं चोरयित्वा तु मक्षिकाः जायते नरः । ( १९ )
हृत्वा दुग्धं तु मार्जारो जायते नरकाच्च्युतः ।
तिल-पिण्याकसम्मिश्रमन्नं हृत्वा तु मूषकः ॥ ( २० )
घृतं हृत्वा तु नकुलः काको मधुरजामिषम् ।
श्येनो मार्गामिषं हृत्वा चीरी लवणहारकः ॥ ( २१ )
चोरयित्वा पयश्चापि बलाका सम्प्रजायते । ( २२ )
यस्तु चोरयते तैलं तैलपायी स जायते ।
मधु हृत्वा नरो दंशो घृतं हृत्वा पिपीलिका ॥ ( २३ )
चोरयित्वा तु निष्पावान् जायते गृहगोलकः ।
आसनं चोरयित्वा तु तित्तिरित्वमवाप्नुयात् ॥ (२४)
अयो हृत्वा तु पापात्मा वायसः सम्प्रजायते ।

---

१. J substitutes महाचक्रो for महावक्त्रो; while the text बधुसन्निभ for वज्रसन्निभ. २. B. and D read मक्षिको for मक्षिका ३. The text reads ऽन्नन्तु स for दुग्धं तु. ४ The text reads च for तु. ५. H J. and the text read मधुरजामिषम्, G मधुरुजाप्रियम् both for मुहरजामिषम्. ६. In the text we find these following two lines are for this line, viz —

मत्स्यमांसापहृत् काक श्येनो मार्गामिषापहृत् ।
चीचीकाकस्त्वपहृते लवणे दधनि कृमि ॥.

७ H. substitutes अन्धु for मधु while B. and D हसो for दंशो and G reads thus.—

अपहृत्वा पणे दंशो घृतं हृत्वा पिपीलिकाः ॥

And in the text we find ऽपूपं for घृतं. ८. B D. E. G. H. I. and J. read गलगण्डक for गृहगोलक. ९ The text reads आसव for आसनं and gives therefore a good sense. १०. E. and G. read अपो for अयो.

हृते कांस्ये च हारीतः कपोतो रौप्यजे हृते ॥(२९)
जीवञ्जीवकतां याति रक्तवस्त्रापहारकः ॥ (२९)
चुच्छुन्दरी शुभान् गन्धान् सस्यं हृत्वा शशो भवेत् ।
षण्ढः पलालहरणे काष्ठहृत् घुणकीटकः ॥ (३०)
पुष्पापहृद् दरिद्रश्च पङ्गुर्यानापहारकः ।
शाकहर्ता च हारीतस्तोयहर्ता च चातकः ॥ (३१)
भूहर्ता नरकान् गत्वा रौरवादीन् सुदारुणान् ।
तृण-गुल्म-लता-वल्ली-त्वक्सार-तरुतां क्रमात्'॥ (३२)
(मा. पु. १९. ६–३२)

इति । गौतमः—

'अनृतवाक् स्खलितजिह्वो मुहुर्मुहुः सलँग्नवाक् ।

---

१. I reads रौप्यकें for रौप्यजे and the text रूप्यभाजने for रौप्यजे हृते. २. E and H substitute यता for याति, E I J and the text read रक्तवस्त्रापहृत्नर for रक्तवस्त्रापहारक. ३ B. and D omit this and the following three lines –

चुच्छुन्दरी शुभान् गन्धान् सस्य हृत्वा शशो भवेत् ।
षण्ढ पलालहरणे काष्ठहृत् घुणकीटक ॥
पुष्पापहृद्दरिद्रश्च पङ्गुर्यानापहारक ।
शाकहर्ता च हारीतस्तोयहर्ता च चातक ॥,

G omits this and the following two lines, while the text reads छच्छन्दरि and E. H and J read the same for चुच्छुन्दरी ४ I reads रस and the text वासो both for सस्यं ५ E H. and J read पलालहारेण for पलालहरणे, while the text substitutes फलापहरणात् for the same ६. I. reads व्रणकीटक for घुणकीटक. ७. The text reads ऽपहृत्नर for ऽपहारकः. ८ B D. E. G H. I. and J. read गत for क्रमात् ९ We consulted here five different manuscripts and one printed copy of the text of Gautama, manuscripts do not concord with one another Some omit this portion altogether. In the printed copy some Sûtras are found, but their version is quite different, while H. reads स्खलित for स्खलित- and I. उव्वलो for स्खलितजिह्वो.

जलोदरो दारत्यागी । कूटसाक्षी श्लीपदी उच्छून-
जङ्घाचरणः । विवाहविघ्नकर्ता छिन्नौष्ठः। अवगूरण-
च्छिन्नहस्तः । मातृघ्नोऽन्धः। स्नुषागामी वातवृषणः ।
चतुष्पथे विण्मूत्रविसर्जने मूत्रकृच्छ्रः। कन्यादूषकः
षण्ढः । पर्युषितभोजी कृमिः । ईर्ष्यालुर्मशकः ।
पित्रोर्विवदमानोऽपस्मारी । न्यासापहार्यनपत्यः ।
रत्नापहार्यत्यन्तदरिद्रः । विद्याविक्रयी पुरुषमृगः ।
वेदविक्रयी द्वीपी । बहुयाजको जलप्लवः । अया-
ज्ययाजको वराहः । अनिमन्त्रितभोजी वायसः ।
मृष्टैकभोजी वानरः । इतस्ततोऽश्नन् मार्जारः ।
कक्षवनदाही खद्योतः। दारकाचार्यो मुखविगन्धः ।
अदत्तादायी बलीवर्दः। मत्सरी भ्रमरः। अभ्युत्सादी
मण्डलकुष्ठी । शूद्राचार्यः श्वपाकः। गोहर्ता सर्पः ।
स्नेहापहारी क्षयी । अन्नापहार्यजीर्णी । ज्ञानापहारी

---

१. मातृघ्नोऽन्ध । स्नुषागामी वातवृषण । these two Sûtras do not appear in others than A and I., while B. omits ईर्ष्यालुर्मशक. २. B, D E. G H and J do not insert पर्युषितभोजी कृमि here, and change place and insert after मुखविगन्ध ।. ३. B. D. E. G. H. and J. omit पित्रोर्विवदमानोऽपस्मारी. ४. B. D. E G. and H. substitute कन्यापहारी for न्यासापहारी and J. omits अनपत्यहा। रत्नापहारी and reads न्यासापहार्य-त्यन्तदरिद्र. ५ J. reads पुरुषो मृग for पुरुषमृग. ६. J. substitutes -याचको for -याजको. ७. B. D. G. omit this Sûtra ८. I. reads यत • for इतः-. ९. H. reads अदत्तादायो for अदत्तादायी. १०. E. J. and I. read भ्रमर. for भ्रमर.. ११. J. reads मण्डली कुष्ठी for मण्डलकुष्ठी.

मूकः। जलापहारी मत्स्यः। क्षीरहारी बलाकः[2]। परद्रव्यापहारी परप्रेष्यः[3]'।

(गौ. स्मृ. २०. ४–३८)

इति। शङ्ख-लिखितौ–

'वेश्मापहारी अद्रिसर्पः[4]। परजलापहारी शिशुमारः। सस्यापहारी[5] कपोतः। कव्यापहारी[6] वायसः। ताम्रापहारी वल्गुलः[7]। अपूपापहारी प्रेतः। शौल्वापहारी जडः। छत्रापहारी कारण्डवः[8]। गन्धापहारी पतङ्गः। ध्वजापहारी कृकलासः। शाकापहारी पशुः। शय्यापहार्यशयनेः[9]। पुष्पापहारी दुर्गन्धी। फलापहार्यफली[10]। दीपापहारी कौशिकः। भूम्यपहारी नकुलाहि-बिडाला-sखूनामन्यतम इति।

---

१ Except A. and I., all others substitute जलाहारी for जलापहारी. २ Except E and I., others read बलाकी for बलाकः. ३. B. reads sहारी for sपहारी ४. B reads वैश्यापहारी, D. and G. वेश्यापहारी for वेश्मापहारी and all manuscipts, except A. and I., omit -सर्प and read only अद्रि; while G reads अहि for अद्रिसर्प ५., G. substitutes सर्व- for पर-, while I. omits पर- ६. D reads सत्यापहारी for सस्यापहारी, while B. omits this and the following three Sûtras:–

सस्यापहारी कपोत। कव्यापहारी
वायस। ताम्रापहारी वल्गुल।

७. G. and J. substitute कव्यापहारी and D H. कव्यहारी both for कव्यापहारी. ८. G. reads ताम्रहारी and I. बलाक for ताम्रापहारी and वल्गुल respectively. ९. D. omits these following Sûtras and reads इति at once. १०. B. omits कारण्डव and गन्धापहारी, while I. reads कारण्डः for कारण्डव and, G. कदम्ब. and J. कौदुभवः for the same. H. also reads कौदभव, but gives marginal reading कारण्डव. ११. G. reads अशयितः for अशयन. १२ B. and G. read अफलादि for अफली.

यद्वा तद्वाऽपि पारक्यं स्वल्पं वा यदि वा बहु।
हृत्वा वै योनिमाप्नोति तत्तद्भोगानुरूपतः' ॥
इति ॥

## अथ स्तेयकर्मशेषफलानि।

तत्र विष्णुधर्मोत्तरे—

'मणि-मुक्ता-प्रवालानि रत्नानि विविधानि च।
अपहृत्य नराः[1] रामं[2] जायन्ते हेमकर्तृषु ॥ (२)
यद्वा तद्वा परद्रव्यमपहृत्य बलान्नरः।
प्राप्नोति भृगुशार्दूल मानुष्ये भारवाहिताम् ॥ (३)
धान्यचोरोऽङ्गहीनः स्यादत्यङ्गो[3] मिश्रहृद् भवेत्।
व्याधितश्चान्नहर्ता स्यान्मूको[4] वागपहारकः ॥ (५)
वस्त्रापहारी श्वित्री स्यात्[5] पङ्गुश्चाऽश्वापहारकः। (६)
अन्धो दीपापहारी स्यात् काणो निर्वापको भवेत्[6] ॥ (७)
दरिद्रः परवित्तघ्नश्चोन्मत्तश्च[7] तथाग्निदः ॥ (८)
पङ्गुरेव तथा ज्ञेयः सर्वयानापहारकः।

---

१ B. D G. H. and J read यद्वा तद्वा परद्रव्यं for यद्वा तद्वाऽपि पारक्यं. २ All others, except A., do not insert अथ ३ H. reads विष्णोत्तरे for विष्णुधर्मोत्तरे. ४ G. reads in singular form as नरो . जायते ५ We follow here only A. and the text, while all others read राजन्, but the quoted verses are a dialogue between पुष्कर and Parasûrâma and Pushkara addressed to Paiasûrâma. The vocative राजन् is not appropriate to Parasûrâma ६ B. and D. read हृत्वा गोमिश्रकृद्भवेत्, G हृत्वा गा मिश्रकृद्भवेत्, E and H. अन्त्यगो मिश्रकृद्भवेत्, I अत्यन्तं मिश्रको भवेत् and the text अव्यङ्गो मिश्रहृद्भवेत् all for अत्यङ्गो मिश्रहृद्भवेत्. ७ G. reads च for स्यात् ८ G omits this line—

वस्त्रापहारी श्वित्री स्यात् पङ्गुश्चाश्वापहारक ।

९. The text substitutes तथा for भवेत् १० We follow here only A. and the text, while all others read उन्मत्तश्चाश्वहस्तिनं।

अन्धश्च जायते लोके गां हत्वा च नराधमः ॥ (८)
वस्त्र-भोज्यापहर्त्तारौ तथा नग्न-बुभुक्षितौ।
रत्नापहारी भवति तथा कुष्ठी नराधमः' ॥ (९)
(वि. ध. २. १०७. २–९)

इति। वायुपुराणे—

'वातव्याधियुतः स्तेयी तथा कुष्ठी नरो भवेत्।
ब्राह्मणस्वर्णहारी च प्रमेही जायते नरः ॥
प्रस्विन्नपाणि-पादः स्यादाहरेद्यो रसादिकम्*।
अन्नचोरो भवेद्यस्तु सोऽकस्माज्जायते कृशः ॥
स्वरोपघाती वाक्यं च हृत्वा मर्त्यः प्रजायते' ॥
(वायु. पु. २. ३१. २५–२७)

इति। उमा-महेश्वरसंवादे—

'धान्यचौरस्तु हीनाङ्गस्तृणहर्ता तु वा पुनः।
परद्रव्यापहारी च भृत्यानां वृत्तिजीवकः ॥
अन्नं क्षेत्रं गृहं वापि परद्रव्यं हरन्ति ये।
सुवर्ण-मणि-मुक्तानि वस्त्राण्याभरणानि च ॥

* आहरेत् चोरयेत्। वाक्यं हृत्वा स्वरोपघाती भवतीत्यर्थः।

१ The text does not insert this and the following two lines, but for these three lines, the text gives one line —

अन्धो भवति गोघ्नस्तु चाण्टिकस्तैलिकस्तथा।

B D. also omit these three lines २ H reads वस्त्र-पूजापहर्तारौ for वस्त्र-भोज्यापहर्तारौ ३ G. omits इति ४ G substitutes बाल- for वात-. ५. J. reads ब्राह्मणः स्वर्णहारी for ब्राह्मणस्वर्णहारी ६ B. D G. and H. substitute धान्यचोर for अन्नचोर. ७ B and D read परोपघाती for स्वरोपघाती; while E reads स्वरो नृपतिवाक्यं च हत्वा and J. स्वरोपघातिवाक्य च हृत्व both for स्वरोपघाती वाक्यं च हृत्वा. ८ B. and D. read धान्यचोरोऽङ्गहीन स्यात् for धान्यचौरस्तु हीनाङ्ग ९. I. reads खलं for अन्न.

आसनानि विचित्राणि धन-धान्यमुपस्करम् ।
ये हरन्ति नरा नित्यं परद्रव्याणि मोहिताः ॥
इहलोकमृतानां च तेषामेष विधिः स्मृतः ।
नग्ना[३] दीनाः क्षुधार्त्ताश्च कुचैला दुःखिताः सदा ॥
बन्धुभिः परिभूताश्च भोग्य[४]-भोगविवर्जिताः ।
तांस्तु[५] ते प्रार्थयन्तीह दास[६]वृत्तिमुपागताः ॥
ये हरन्ति च तूर्य[७]णि वाद्यानि विविधानि च ।
तेन[८] पापेन ते देवि तिर्यक्त्वं यान्ति मानवाः ॥
हृत्वाऽऽनद्ध[९]वाद्यानि झल्लरी-पटहानि च ।
तेन पापेन ते मूढा बाधिर्यं[१०] यान्ति मानवाः ॥
कांस्य[११]कं मुरजं वंशं वीणां तुम्बुरुकं तथा[१२] ।
ये हरन्ति च पापे[१३]न पिशाचास्ते भवन्ति च ॥
पटै[१४]हं लेपनं चैव तथा सम्पुटिकाश्च ये ।

---

१ B D G. I and J. read इहलोकगतानां, E इह लोकमतानां both for इहलोकमृतानां. २ B. and D substitute एव for एष.. ३. B and D read नाम्ना हीना., G नग्नहीना both for नग्ना हीना . ४. H and J read भाग्यभोग- for भोग्य-भोग-. ५ I reads सुखानि and E and J. वसूनि both for तांस्तु ते. ६ B D. and E. substitute सदा for दास-. ७. J. reads शूर्पाणि for तूर्याणि ८. B. and D omit the following —

तेन पापेन ते देवि तिर्यक्त्व यान्ति मानवा. ॥
हृत्वा ऽऽनद्धादिवाद्यानि झल्लरीपटहानि च ।

९. E. reads मण्डवादि-, G. मूङ्गादि-, I मट्टादि- and J. मड्डादि- all for ऽऽनद्धादि-. १०. B. D. E and I read कासिक, G and H वाशिकं both for कांस्यक. ११. E. G H and J read तुवविल and I तूलविलं for तुम्बुरुकं १२. G. and I read पापानि for पापेन १३ J. reads this line as follows —

पटं सङ्क्रेमनं चैव तथा सबुधिताश्च ये ।,

while G. substitutes पट्टह for पटहं and B. and D. सम्पुटिकांश्च for सम्पुटिकाश्च.

हरन्ति पुष्करं ये तु तेन ते यान्ति मूकताम्[1] ॥
प्रासादेषु च ये देवि हरन्ते दीपकान् नराः।
गृहेषु चैव विप्राणां तेन ते यान्ति चान्धताम्[2]' ॥

इति। शङ्ख-लिखितौ—

'सुवर्णस्तेयी कुनखी। वस्त्रापहारी श्वित्री। हिरण्यापहारी दद्रुणः[3]। तैजसापहारी मण्डली*। स्नेहापहारी क्षयामयी[4]। अजीर्णवानन्नापहारी। वागपहारी मूकः। गृध्रो देवद्रव्योपजीवकः। पाण्डुरोगी दीपहारी। ब्राह्मणवृत्तिघ्नश्च दरिद्रः। कर्मफलविशेषेण कुब्ज-षण्ढ-पङ्गु-दरिद्राश्च[7] जायन्ते'।

इति। यमः—

द्रव्यौषधापहर्ता च दीर्घरोगित्वमाप्नुयात्[8]।
धान्यचोरो व्रणी च स्यात् कांसी[9] भक्तापहारकः ॥
गलगण्डी गणद्रव्यं[10] हर्ता भवति मानवः।

---

* मण्डलं कुष्ठप्रभेदः सोऽस्यास्तीति मण्डली। अन्यत् सुगमम्।

---

१ B. D. E. G. H and J. read पुस्तक for पुष्करं २. G. reads मूढता for मूकताम् ३. I. reads हरन्ति दीपिकां for हरन्ते दीपकान्. ४. B. and D. omit क्षयामयी। अजीर्णवानन्नापहारी and read स्नेहापहारी वान्ताशः for the above omitted portion. ५. G. and H. read अजीर्णवान्तोन्नहारी for अजीर्णवानन्नापहारी. ६. B. D. G. H. and J. read कुष्ठ- for कुब्ज-; while E. कुण्ड- for the same ७ B reads -दरिद्रश्च जायेत, G. reads -दरिद्री स जायते, H. and J. दरिद्रा सञ्जायन्ते. ८. G. reads दीर्घरोगान् for दीर्घरोगित्वम्. ९ H. reads कृमि. for कांसी. १०. I. reads गलद्द्रव्य- for गणद्रव्य-, but it seems meaningless here.

विधृतिर्बलहर्ता च श्येनो मांसापहारकः'[1] ॥
(य. स्मृ. ९. ३–९)

इति । स्कान्दे रेवाखण्डे—

'मानकूटं*[2] तुलाकूटं कूटसाक्ष्यं वदन्ति ये ।
नरके तेऽन्धतामिस्रे[3] प्रपच्यन्ते नराधिपं[4] ॥
शतसाहस्रिकं कालमुषित्वा तत्र ते नराः ।
इह शत्रुगृहे बद्धा भ्रमन्ते[5] कालमीप्सितम् ॥
कुनखी स्वर्णहरणान्मूकः पुस्तकहारकः ।
फलान्याहरतो ऽपत्यं म्रियते नात्र संशयः'[6] ॥
(स्कं. पु. रे. खं. ७१. ३६–४०)

इति ॥

अथागम्यागमनकर्मविशेषाद्योनिविशेषः ।

तत्र स्कान्दे रेवाखण्डे—

'गुरुदाराभिमर्शी च कृकलासो भवेद्ध्रुवम् ।
राज्ञीगामी भवेद्दुष्टो[7] वृश्चिको वृषलीपतिः' ॥
(स्कं. पु. रे. ख. ७१. २९)

---

*मानं धान्यादिमापनसाधनं द्रोणाढकादि । तस्मिन् कूटं कपटं न्यूनत्वमित्यर्थः ।

---

१. I. reads this line as follows :—
विकृतिर्ब्रह्महर्ता च स्यान्मांसस्यापहारक ।,
while E. reads वा स्यान्मांसापहारक, B. स्यान्मासस्यापहारक, H स्यान्मांसापहारक and J स्यान्मासोपहारक. all for श्येनो मांसापहारक २ I. reads मणिकूटं for मानकूट through mistake. ३. I substitutes तु for ते. ४. I reads नराधमा for नराधिप, but the quoted lines are addressed to the King ५. E reads लभन्ते, H बद्धा लभन्ते and J. बद्धा लभन्ते all for बद्धा भ्रमन्ते. ६. J. reads भवेद्दुष्टो for भवद्दुष्टो.

इति। गौतमः—

'चाण्डाली-पुल्कसीगमने ऽजगरः। प्रव्रजिता-
गमने मरुपिशाचः। शूद्रागमने दीर्घकीटः।
सवर्णाभिगामी दरिद्रः। गोगामी मण्डूकः'।
(आन्ध्रपुस्तके गौ. स्मृ. २०. ३९–४०)

इति। मार्कण्डेयपुराणे—

'परदाराभिगमने रक्तद्रोणस्तु जायते। (९)
श्व-सृगालेभ-गृध्रेषु क्रमाज्जातिषु जायते।
भ्रातृभार्या च दुर्बुद्धिर्यो धर्षयति पापकृत्।
पुंस्कोकिलत्वमाप्नोति स पापो नरकाच्युतः॥ (१०)
सखिभार्यां गुरोर्भार्यां राजभार्यां च पापकृत्।
प्रधर्षयित्वा कामात्मा सूकरो जायते नरः॥ (११)
शूद्रश्च ब्राह्मणीं गत्वा कृमियोनौ प्रजायते।
तस्यामपत्यमुत्पाद्य काष्ठान्तः कीटको भवेत्॥ (१५)
सूकरः कृमिको मद्गुश्चण्डालश्च प्रजायते'॥ (१६)
(मा. पु. १५. १– १६)

---

१. These quoted Sûtras are not found in the text. २. J. reads स्ववर्णाभिगामी for सवर्णाभिगामी. ३. B. and D read परदाराभिगामी च रक्षो घोरः, E and H परदाराभिगामी तु रक्षो घोण, G, and J परदाराभिगामी तु रक्षो घोर for परदाराभिगमने रक्तद्रोण, while the text reads this line thus —

परदाराभिमर्शात्तु वृको घोरोऽभिजायते।

४ The text reads this line as follows ·—

श्वा शृगालो बको गृध्रो व्याघ्रु (घ्याल) कङ्कस्तथा क्रमात्।,

while B and D. श्व-सृगाल-गृध्रेषु, E. and G श्व-सृगालेषु गृध्रेषु and H. श्व-सृगालक-गृध्रेषु all for श्व-सृगालेभ-गृध्रेषु ५. The text reads चापि for पापो. ६. B. D. E. G. H and J. read प्रधर्षयति for प्रधर्षयित्वा; while G. and I पापात्मा for कामात्मा.

इति । ब्रह्मपुराणे—

'सखिभार्यां गुरोर्भार्यां राजभार्यां तथैव च ।
प्रधर्षयति कामाद्यो मृतो जायेत सूकरः ॥ (६८)
सूकरः पञ्च वर्षाणि दश वर्षाणि वै वृकः ।
पिपीलिका तु मासांस्त्रीन् कीटःस्यान्मासमेव तु ॥(६९)
एतानासाद्य संसारान् कृमियोनौ प्रजायते ।
तत्र जिवति मासांश्च कृमियोनौ चतुर्दश ॥ (७०)
ततो ऽधर्मक्षयं कृत्वा ततो जायेत मानवः । (७१)
परदाराभिमर्शं तु कृत्वा जायेत वै वृकः ।
श्वा सृगालस्ततो गृध्रो व्यालः काको बकस्तथा ।(६६)
भ्रातृभार्यां तु पापात्मा यो रोचयति *मोहितः ।
कोकिलत्वमवाप्नोति सो ऽपि संवत्सरं द्विजः ॥ (६७)
मनसाऽपि गुरोर्भार्यां यः शिष्यो याति पापकृत् ।
उग्रान् स याति संसारानधर्मेणेह चेतसा ॥
श्वयोनौ तु स सम्भूतस्त्रीणि वर्षाणि जीवति ।
तत्रापि निरयं प्राप्तः कृमियोनौ प्रजायते ॥

---

*मैथुनार्थमिति शेषः । नायं वैधनियोगस्य निन्दार्थवादः । रोचयतीत्युक्तेः सकामत्वं लक्ष्यते । नियोगे तु सन्तानजननेच्छाया एव मुख्यत्वात् । 'स मानवः' स पापफलभोक्ता पुरुषः श्वा भूत्वा ततः कृकलासो भवतीत्यर्थः ।

---

१. I. reads शिष्यभार्यां for राजभार्यां. २. I. reads कामात्मा for कामाद्यो. ३. G. reads च for तु. ४. G and H. read एतान्मासांश्च for एतानासाद्य. ५. G. reads परदाराभिमर्शी तु मृत्वा for परदाराभिमर्शं तु कृत्वा. ६. B. D. E. G. H. and J. substitute व्याघ्र for व्याल . ७ B and D. substitute आत्मभार्यां and G. भर्तृभार्यां both for भ्रातृभार्यां and I धर्षयति for रोचयति.

कृमिभावमनुप्राप्य वर्षमेकं तु जीवति ।
ततस्तु निरयं प्राप्तो ब्रह्मयोनौ प्रजायते ॥
वृषलो ब्राह्मणीं गत्वा कृमियोनौ प्रजायते । (७७)
ततः सम्प्राप्य निधनं जायते सूकरः पुनः ॥
सूकरो जातमात्रस्तु रोगेण म्रियते द्विजाः ।
श्वा ततो जायते मूढः कर्मणा तेन भो द्विजाः ॥ (७८)
श्वा भूत्वा कङ्कलासस्तु जायते मानवस्ततः ॥ (७९)
तत्रापत्यं समुत्पाद्य ततो जायेत मूषकः' ॥ (८०)
(ब्र. पु. २१७. ६६–८० )

इति । नारदपुराणे—

'चिन्तयेद्वीक्षयेद्वापि जननीं वा सुतां च वा ।
वधूं वा भ्रातृदारान् वा गुरुभार्यां नृपस्त्रियम् ॥

---

१. B. D and G. omit this and the following two lines —
कृमिभावमनुप्राप्य वर्षमेकं तु जीवति ।
ततस्तु निरयं प्राप्तो ब्रह्मयोनौ प्रजायते ॥
वृषलो ब्राह्मणीं गत्वा कृमियोनौ प्रजायते ।
२. E. and H. omit this line. ३. G substitutes पुमान् for पुनः. ४. B. D. and G. read द्विज for द्विजा, but the quoted lines are addressed to the Rishis ५ B and D. omit this line:—
श्वा ततो जायते मूढ कर्मणा तेन भो द्विजा ।
६. G. substitutes द्विज for द्विजा ७. E. does not insert नारदपुराणे and the following quoted six lines and इति G. and H. insert नारदपुराणे, but omit the following six lines and इति । व्यभिचारिणीस्मृति वराहपुराणे. ८. B. and D. read ईक्षयेत् and J शिक्षयेत् both for वीक्षयेत्. ९. J. reads वृद्धां for वधूं and B. D. and J. substitute -भार्यां instead of -दारान्.

स याति नरकं घोरं सञ्चिन्त्य श्वपचीमपि ।
दृष्ट्वा हि[1] प्रमदा ह्येता यः क्षोभं व्रजते नरः ॥
तस्य पुण्यं कृतं सर्वं वृथा भवति नान्यथा ।
पुण्यस्य सङ्क्षयात्[2] पापी पाषाणश्च भवेद्ध्रुवम्' ॥

इति । व्यभिचारिणीम्प्रति वैराहपुराणे[3]—

'ततः शुनी[4] भवेत् पश्चात् सूकरी च ततः परम् ।
कर्मक्षये ततः पश्चान्मानुषी कुत्सिता[5] भवेत् ॥
नच सौख्यमवाप्नोति तेन[6] दुःखेन दुःखिता' ।
(व. पु. २०२. ७१–७२

इति[7] ।

'तृण-गुल्म-लतानां च क्रव्याद-दंष्ट्रिणामपि[8] ।
क्रूरकर्मरतानां च क्रमशो[9] गुरुतल्पगः ॥
हित्वा भवन्ति क्रव्यादाः क्रमशोऽभक्ष्यभक्षिणः[10] ।
परस्परादिनो मत्स्याः प्रेत्याऽन्त्येस्त्रीनिषेवकाः[11]' ॥
(व. पु. २०२. ३०–३१)

---

१. B. and D. read तु प्रनर्दाल्लोके for हि प्रमदा ह्येता. २. B. and D. read स पुण्यसङ्क्षयात् पापः for पुण्यस्य सङ्क्षयात् पापी, while I. substitutes पापं for पापी ३ B. and D. substitute नारदपुराणे for वराहपुराणे ४. G. reads शुना for शुनी. ५. B D and G. read कुष्ठिता for कुत्सिता ६. G. substitutes भर्त्रे- for तेन. ७. B D E G. I and J. insert इति and show that the quotation of Varâha purâna is completed here, and the next four lines are separate A. and H. do not insert इति and show the next lines belongs to the quotation of Varâha purâna ८. B. D. and G. substitute त्रीणि for तृण- and क्रव्यादि- for क्रव्याद- and I. and J. क्रव्यादां for the same ९ I. substitutes क्रमयो १०. B. and D. read तत्स्त्रीनिषेवका., H ऽन्यस्त्रीनिषेवकाः both for ऽन्त्यस्त्रीनिषेवका.

इति । अगम्यागमनकर्मविशेषात् फलविशेषः पद्मपुराणे—

'उदरव्याधियुक्तस्तु तथा गुर्वङ्गनागमे ।
आचार्यभार्यागमने भगन्दरयुतो भवेत् ॥
तथा पापेन महता गुल्मी स्यादन्त्यजागमे' ॥

इति । विष्णुधर्मोत्तरे—

'षण्ढश्च जायते लोके दारातिक्रमकारकः ।
परपुंसि प्रसक्ता च तस्य भार्या तथा भवेत् ॥
कुष्ठी भवति धर्मज्ञे अपहृत्य तथा स्त्रियम् ।
लिङ्गव्याधिमवाप्नोति वियोनौ मैथुने रतः ॥
गां गत्वा तु द्विजश्रेष्ठ लिङ्गनाशमवाप्नुयात् ।
दृष्ट्वा परस्त्रियं नग्नां नरो दुष्टेन चेतसा ॥
जात्यन्धत्वमवाप्नोति परलोके न संशयः ।
अवकीर्णी च भवति लिङ्गव्याधिसमन्वितः ॥
प्रकीर्णमैथुनो जन्तुः क्लीबो भवति वै द्विज' ।

( वि. ध. २. ७०. ४१—४६ )

इति । शङ्ख-लिखितौ—

'पर्वमैथुनी प्रमेही । पुरुषव्याधिपीडितः ।
परदारगाम्यगुप्तदारः । गोष्ववकीर्णी दुश्चर्मा ।

---

१. G. reads भगक्षययुतो for भगन्दरयुतो २. B. and D omit this and the following three lines ३. H. and J. read धर्मज्ञ for धर्मज्ञे. ४. B. D. G. and H. read श्वयोनौ for वियोनौ. ५ E and I. read गां च गत्वा for गां गत्वा तु; while B. and D. substitute द्विजश्रेष्ठो for द्विजश्रेष्ठ. ६. B. D. and G. substitute अनुदुष्टेन and J. अतिदुष्टेन both for नरो दुष्टेन; while A. मनोदुष्टेन चक्षुषा for नरो दुष्टेन चेतसा. ७. I. reads प्रकीर्णमैथुने for प्रकीर्णमैथुनी. ८ I. reads पर्वमैथुने and J. परमैथुने both for पर्वमैथुनी. ९. G. reads परदाराभ्यगामी for परदारगामी,; while G. reads अगुप्तदारी and I. अगुप्तदारक for अगुप्तदार..

खेराभिगामी मूत्रमेही । सगोत्राभिगामी मद्यपस्त्रीगामी च श्लीपदी । मातृ-पितृ-भगिनीगाम्यबीजी । स्वदारादन्यत्र दीव्यतः केशाल्पत्वम् । गुरुतल्पगो दुश्चर्मा । चण्डाल्यवकीर्णी कन्यादूषी सगोत्राभिगाम्यबीजी । धर्मपत्न्यामास्ये प्रवर्तकः खल्वाटः । मातृ-भगिनीगाम्यवकीर्णी श्लीपदी वैध्री मधुमेही च' ।

इति । वृद्धबौधायनः—

'गां गत्वा मधुमेही स्यान्मूत्रकृच्छ्री चतुष्पदम् ।
मधुमेही खराश्वादिगामी भवति मानुषः ॥
सवर्णागमने रक्तः पितृहा पाण्डुरोगयुक् ।
अन्त्यजागमने मर्त्यो जायते नात्र संशयः' ॥

इति । वृद्धगौतमः—

'धर्मपत्नीं गुरोर्गत्वा वृश्चिको भुजगस्तथा ।
पक्षि-दंष्ट्रि-मृग-व्याल-क्रव्यादोऽपि ततोऽसकृत् ॥
तथा मानुष्यतां प्राप्तः क्षयी कुष्ठी च वा भवेत् ।
महोदरी प्रमेही च दुश्चर्मापि भगन्दरी ॥
ज्वरातिसारी दाही च पाददाही कृमिव्रणी ।
गत्वा तु मातृभगिनीं दारेषु मधुमेहवान् ॥

---

१. I. reads this Sûtra as:— खराश्वाभिगामी मधुमेही; while G. reads धूममेही for मूत्रमेही. २ B and D read श्लीलवादी and A. श्लिष्टवादी both for श्लीपदी; while E. substitutes श्रीपदी for the same. ३ I. substitutes वधी for वन्ध्री. ४. I. reads ऽदक्त for रक्तः ५. I. reads अधः for अथ and H अतः for the same. ६. B and D. read भवेत् for ऽसकृत्. ७. G. reads तथा for च वा. ८. B. D. and I. substitute च for अपि. ९. G. reads अतिसारी विदाही च for ज्वरातिसारी दाही च; while I. reads दाक्षी for दाही. १०. B. and D read ज्वरेषु, I. नलेषु both for दारेषु.

नेत्ररोगी भवेत् प्रेक्ष्य नितरां परयोषितः ।
बहुत्वे योषितामेकपत्नीगः[1] खञ्जतां व्रजेत् ॥
स्वदारेभ्यो ऽन्यतो दीव्यन्नल्पकेशो भवेन्नरः ।
पुंश्चल्यो योषितो बालरण्डाः स्युर्बधिरास्[2]तथा ॥
दास्यो वा दीर्घरोगिण्यो दृष्टिहीना भवन्ति ताः[3]'॥

इति । ब्रह्मपुराणे–

'परदारेषु ये चापि चक्षुर्द्रष्टुं[4] प्रयुञ्जते ।
तेन दुष्टस्वभावेन[5] क्लीबत्वमुपयान्ति वै ॥(६४)
पशूंश्च ये विव्रजन्ति[6] ये चैव गुरुतल्पगाः ।
प्रकीर्णमैथुना ये च क्लीबा जायन्ति[7] ते नराः'॥ (६५)
( ब्र. पु. २१७. ६४–६५ )

इति[8] । तदेवं कानिचिच्छास्त्राण्युदाहृत्य कियानपि कर्मविपाको निरूपितः । अनयैव दिशा विपाकान्तराण्युन्नेयानि । नहि निःशेषेण[9] केनचिदुदाहर्तुं शक्यन्ते[10]। तदुक्तं विष्णुधर्मोत्तरे–

'उक्तास्तवेमास्[11]तु मया तिरश्चां
या योनयो यानि च लक्षणानि ।
शक्यानि कृत्स्न्येन मया न वक्तुं
या योनयश्चैव नराधमानाम्' ।
( वि. ध. २. ७२. ६७. )

---

१. We only follow here A. and J, while all others read योषितामेका पुत्रीगः, but it seems meaningless. २ G substitutes विधवा for बधिरा. ३. B. D. and H. substitute ते for ता. ४ H. reads दुष्टं for द्रष्टु. ५. G. reads दुष्टप्रभावेण for दुष्टस्वभावेन. ६ B and D read यऽपि व्रजन्ति. for विव्रजन्ति. ७ B. and D substitute जायन्त एव ते. ८ G does not insert इति. ९. J. reads विपाकान्तराण्यपनेयानि ।-नहि विशेषेण, G. reads also विशेषेण for नि शेषेण. १० I reads शक्यम् for शक्यन्ते ११. G. reads तथाशक्ति, I. reads यथाशक्ति for तवेमास्तु.

इति। अशक्तिश्च कर्मानन्त्यात्। यद्यप्यतिपातकादीनि प्रकीर्णकान्तानि पापानि दशविधत्वेन विष्णुना सङ्कलितानि तथाप्यतिपातकादिजात्युपाधावेव तत्सङ्कलनम्। पापव्यक्तीनां तु स्वरूपतो देश-काले-कर्त्रवस्थादिभेदाच्च नेयत्ता। यदा कर्मणामेवेयत्ता नास्ति तदा तद्विपाकानामियत्ता दूरापास्ता। एकैकस्य कर्मणो बहुविधविपाकत्वत्वस्मरणात्। उदाहृताश्च बहुविपाकाभिधायिकाः श्व-सूकरेत्यादिस्मृतयः। तथापि तेषां निःशेषकथनं मनसाऽपि चिन्तयितुमशक्यम्। अतो दिङ्मात्रं प्रदर्शितम्।

एतच्च विपाकाभिधानं सञ्चेष्यमाणेभ्यः पुरुषं निवर्तयत् सञ्चितेषु चोद्वेगं जनयन्निषेधेषु प्रायश्चित्तविधिषु चार्थवादतयाऽन्वेतीति पूर्वमभिहितम्। तत्र निषेधा आचारकाण्डे प्रपञ्चिताः। प्रायश्चित्तविधयश्च प्रायश्चित्तकाण्डे। तानि च प्रायश्चित्तानि सञ्चितविषयाणि। प्रारब्धे तु विचारणीयम्। किं प्रायश्चित्तमस्ति उत नेति?। तत्र तावदस्तीति केचिदाहुः।

उदाहरन्ति च वचनम्—

'पूर्वजन्मकृतं पापं व्याधिरूपेण बाधते।
तच्छान्तिरौषधैर्दानैर्जप-होमा-ऽर्चनादिभिः'॥

---

१. B. and D. omit देश- and J. omits -काल- and both read कर्तृव्यवस्था- for °देश-काल-कर्त्रवस्था-. २. E G. H. I. and J omit -विध-; while I. reads विपाकस्मरणात् for विपाकत्वत्वस्मरणात्. ३ G. reads बहुविपाकाश्च सूकरेत्यादिस्मृतय. and J. reads बहुविपाकाः श्व-सूकरेत्यादिस्मृतयः for बहुविपाकाभिधायिका श्व-सूकरेत्यादिस्मृतय. ४ E. G. and H. substitute तत्र and J. तच्च for एतच्च. ५. B. D and G. read रोगोद्वेगं for उद्वेगं. ६. H. reads तत्तत्काण्डे for प्रायश्चित्तकाण्डे. ७. B. D. E. G. H. and J. read आरब्धे for प्रारब्धे. ८. H. and J. read बाध्यते, while J. substitutes व्याधिरोषेण for व्याधिरूपेण.

इति । ननु—नैतद्युक्तिसहम् । तथाहि । निषिद्धस्य कर्मणः प्रायश्चित्तनिवर्तनीयत्वम् । यदा फलमारब्धं तदैव कर्मत्वदशामतीत्य फलत्वदशायां प्रविष्टम् । नच फलस्य प्रायश्चित्तं क्वचित् प्रसिद्धमस्ति ।

नायं दोषः । फलत्वदशायामपि कर्मत्वस्यात्यान्तिकनिवृत्त्यभावात् । अन्यथा पापकर्मणः फलमिति व्यवहारानुपपत्तेः । अथवा प्रायश्चित्तसदसद्भावः शास्त्रैकसमधिगम्यः । शास्त्रं चेत् फलस्यापि प्रायश्चित्तं ब्रूते किं तव च्छिद्यते? । उदाहृतं च शास्त्रम्—

'तच्छान्तिरौषधैः' ।

इत्यादि । तस्मादारब्धफलस्याप्यस्त्येव प्रायश्चित्तम् ।

अपरे पुनर्मन्यन्ते । नास्त्येवारब्धफलस्य प्रायश्चित्तम् ।। कुनखित्वादिनिवृत्त्यदर्शनात् । यद्यारब्धफलं प्रायश्चित्तान्निवर्तते

---

१ B and D read तद्युक्तिसहम् for एतद्युक्तिसहम्. २ B. and D. read प्रायश्चित्त निवर्तनीयम्, G प्रायश्चित्तनिवर्तनम्, E and H प्रायश्चित्तनिवर्तनीयम् all for प्रायश्चित्तनिवर्तनीयत्वम् ३ G E read तदद्य for तदैव and H. reads तदाद्य- for the same B and D तदाद्येक- for तदैव. ४. B H and J. read फलदशायां for फलत्वदशायां ५ B D read ऽत्यन्त- for ऽत्यन्तिक-; while G reads -निवृत्तिकाभावात् and J. -निष्टत्वभावात् for -निवृत्त्यभावात् ६. B and D read -समधिगन्तव्य for -समधिगम्य ७ E omits the following —

ब्रूते किं तव च्छिद्यते' । उदाहृत च शास्त्रम् । 'तच्छान्तिरौषधै-' इत्यादि । तस्मादारब्धफलस्याप्यस्त्येव प्रायश्चित्तम् । अपरे पुनर्मन्यन्ते । नास्त्येवारब्धफलस्य प्रायश्चित्तम् ।.

८ G. H. and J. omit औषधै . ९. G. omits पुनः. १० B. and D. read च for एव ११ B and D read कुनखीत्यादीना for कुनखित्वादि-. ११. H. reads यद्यारब्ध फल and G. यथारब्धे for यद्यारब्धफलं, while B. D and G read प्रायश्चित्तं निवर्तेत for प्रायश्चित्तान्निवर्तते and नैसर्गिककर्माऽपि for नैसर्गिकमपि.

तदा नैसर्गिकमपि क्षुनखित्वादिकं प्रायश्चित्तान्निवर्त्तेत। न त्वेवमुपलभामहे। यथा मुक्तस्येषोर्लक्ष्यवेधोऽप्रतिसमाधेयः तथा प्रारब्धफलं न प्रतिसमाधातुं शक्यम्। एतदेवाभिप्रेत्य भगवान् बादरायणः सूत्रयामास—

'अनारब्धकार्य एव तु पूर्वे तदवधेः'।

(बा. सू. ४. १. १५)

इति। अस्यायमर्थः—ये सुकृत-दुष्कृते तत्त्वज्ञाननिवर्त्यत्वेन पूर्वयोरधिकरणयोः (१) प्रकृते, ते अनारब्धकार्ये एव। न त्वारब्धफलयोः सुकृत-दुष्कृतयोर्निवृत्तिः। कुतः। तदवधेः।

'तस्य तावदेव चिरम्'।

(छां. उ. ६. १४. २)

इति श्रुतावुत्पन्नज्ञानस्यापि मोक्षम्प्रति शरीरपातावधिश्रवणादिति। एवं—तर्हि तच्छान्तिरित्यादेः का गतिः?—इति चेत्। उच्यते। नह्यत्र प्रायश्चित्तमभिधीयते। तत्प्रकरणे पाठाभावात्। चिकित्साप्रकरणे हि इदं पठितम्। तथा च चिकित्सा यथा

---

*इषुदृष्टान्तेन साधितोऽयमर्थस्तत्रभवद्भिः श्रीमद्भगवत्पूज्यपादैः। 'यथा आरब्धवेगस्य लक्ष्यमुक्तस्येष्वादेर्वेगक्षयादेव स्थितिः। ननु लक्ष्यवेधसमकालमेव'—इत्यादिना।

---

१. B. D. and G. substitute प्रायश्चित्त for प्रायश्चित्तात्, while J. निवर्तते for निवर्तेत २ B and D. substitute तत्र for तस्व- and B. D. and G. read निवृत्तत्वेन for -निवर्त्यत्वेन ३ B. and D omit कार्ये एव, न स्वारब्ध- ४ B D and G do not insert कुत ५ B. and D श्रुत्या तावत्यन्तज्ञानस्यापि for श्रुतावुत्पन्नज्ञानस्यापि ६ B. D and H read तथा चेत् चिकित्सा and omit यथा while G reads तथा चिकित्सा and omit यथा E and J. also omit यथा and give in marginal correction.

रोगनिवृत्तेर्दृष्ट उपायः तथा दानादिरप्येदृष्ट उपायः । तथा सति चिकित्सावद्दानादेर्नात्रै प्रायश्चित्तत्वम् । किन्तु रोगनिवर्तकं किंचित् प्रबलं सकृतापूर्वमुत्पादयन्ति दानादयः । तच्च सुकृतप्रवृत्तान्यपि फलानि प्रतिबध्य स्वफलं प्रयच्छति । प्रतिबद्धश्च फलशेषः स्वप्नादौ जन्मान्तरे वोपभुज्यते । एतत् सर्वमुपपुराणे पैराशरेण प्रपञ्चितम्—

'शरीरारम्भकं कर्म योगिनोऽयोगिनोऽपि चँ ।
विना फलोपभोगेन नैव नश्यत्यसंशयम् ॥
वर्तमानशरीरेण सम्पन्नं कर्म देहिनः ।
इह वाऽमुत्र वाऽन्नस्य ददाति स्वफलं शुकँ ॥
इहैव फलदं कर्म प्रारब्धं प्रतिबंध्य चँ ।
फलं ददाति स्वप्ने वा जाग्रत्कालेऽथ वाऽनघ ॥
निवृत्तप्रतिबैन्धं तु प्रारब्धं कर्म सत्तम ।
निरुद्धांशफलं स्वप्ने ददाति स्थिरमुत्तमम् ॥
निरुद्धांशसमो भोगो यैथोद्भूतश्च जाग्रति ।
तैथा निरुद्धं तेनैव सह कर्म ददाति वै ॥
एवं निरुँद्धभोगं तु स्वप्ने जाग्रति वा फलम् ।

---

१ B. D E G H. and J. omit अपि, while I. substitutes दृष्टोपायः for अदृष्ट उपाय through mistake. २. I. omits अत्र. ३. B. D E. and H. substitute किन्च for किं तु. ४. J. reads फलविशेष for फलशेष. ५. B. D. G. and H. substitute च for वा and G and I. उपभुज्यते for उपभुज्यते. ६ B. and D. omit पराशरेण ; while G. and H. substitute पाराशरे for पराशरेण. ७. J. reads वा for च. ८. B. D. and I substitute both च for both वा, while B. and D ज्ञस्य for ऽज्ञस्य. ९. B. and D. read कृत for शुक. १० B. and D. substitute प्रतिपद्यते for प्रतिबध्य च. ११. I. reads निवृत्तप्रतिबद्ध and G निवृत्तप्रतिबद्धे both for निवृत्तप्रतिबन्धं. १२. J. reads विरुद्धांश- for निरुद्धांश-. १३. B. D. E. G. H. and J. read यदा for यथा, while J. जायते for जाग्रति १४. B. D. E. G. H. and J. read तदा for तथा. १५. I. reads निरुद्धभागं for निरुद्धभोगं.

आरब्धस्यानुगुण्येन भुङ्क्ते देही न संशयः ॥
अत्युत्कटैरिहत्यैस्तु पुण्य-पापैः शरीरभृत् ।
प्रारब्धं कर्म विच्छिद्य भुङ्क्ते तत्तफलं बुधः ॥
प्रारब्धशेषं विच्छिन्नं पुनर्देहान्तरेण तु ।
भुङ्क्ते देही ततो भुङ्क्ते तल्लङ्घयति कः पुमान्? ॥
अवश्यमनुभोक्तव्यं प्रारब्धस्य फलं जनैः ।
देहेनैकेन वाऽन्येन युगपद्वा क्रमेण वा ।
श्व-सूकर-खरोष्ट्रादिविरुद्धैर्विग्रहैरपि ।
भोक्तव्यस्य फलस्यैवं शुक्ल कर्माणि च क्रमात् ॥
कारणानि भवन्तीह चक्रवत्परिवर्तने ।
आरभन्ते क्रमेणैव तेषां नाशस्तु भोगतः ॥
सञ्चितेषु समस्तेषु प्रबलं कर्म देहिनः ।
फलमारभते देहमपि तत्साधनं बुधः ॥
दुर्घटं सकलं शक्तिर्माया माहेश्वरी जडा ।
घटयत्यत्र सन्देहो नास्ति सा तादृशी गतिः' ॥

इति । प्रबलेन कर्मणा प्रारब्धफलस्य प्रतिबन्धाङ्गीकारे नैसर्गिकाः कुनखित्वादयोऽपि क्वचित् प्रतिबध्येरन्—इति चेत् ।

---

१. E. reads ततो, I ननो, J. नरो all for ततो, while G. reads बुधे देही च न भुङ्क्ते for भुङ्क्ते देही ततो भुङ्क्ते. २. I. reads अवश्यं ननु भोक्तव्यं for अवश्यमनुभोक्तव्यं ३. I. reads देहेनान्येन चान्येन for देहेनैकेन वाऽन्येन ४. I. reads भोक्तास्यैव फलस्येह for भोक्तव्यस्य फलस्यैव. ५. G. reads चाभ्रुवन् for च क्रमात्. ६. H reads एव for इह ७. B. and D. भ्रुवन् for चक्रवत्. and G. परिवर्तते for परिवर्तने. ८. G. reads त्वात् for सा.

प्रतिबध्यन्तां नाम। यत्र प्रतिबन्धो न दृश्यते तत्र दौर्बल्यं कल्पनीयम्। प्रबलस्य[1] तु वर-शापाभ्यां जन्मान्यथाभावोऽपि[2] क्वचित् स्मर्यते। तथा च स्कन्दपुराणे व्याघ्र[3] ईश्वरेण गणेश्वरत्वं प्राप्त इत्यभिहितम्। महाभारते नहुषस्येन्द्रपदप्रेप्सोरगस्त्यशापेनाऽजगरत्वं[4]* प्राप्तमित्यभिहितम्। यदा जातस्य देहस्यापि प्रबलेन निमित्तेनान्यथाभावोऽस्ति तदा किमु वक्तव्यं कौनख्यादेरन्यथाभाव इति।

एवं च सति रोगशान्त्यादिप्रतिपादकानि सर्वाणि शास्त्राणि[5] प्रारब्धभोगाविरोधेनानुगृहीतानि[6] भविष्यन्ति। रोगशान्तिश्चौ-

---

* उक्तं चेदमाख्यानं महाभारते उद्योगपर्वणि अष्टमाध्यायमारभ्य षोडशाध्यायपर्यन्तं नवभिरध्यायैः शल्य-युधिष्ठिरसंवादेन। तत्र विश्वरूप-ब्राह्मणवधोत्पन्नब्रह्महत्याभयेनेन्द्रस्य पलायनं, देवैरभ्यर्थितस्य नहुषस्यैन्द्रपदस्वीकारः, तस्यैश्वर्यमदः, इन्द्राणीप्राप्त्यर्थं निर्बन्धः। अगस्त्यशापेन नहुषस्याजगरत्वमित्यादि वर्णितम्। वनपर्वणि च शतोपरिसप्तसप्ततितम-मध्यायमारभ्य शतोपरि एकाशीतितमाध्यायपर्यंतेन ग्रन्थसन्दर्भेण अजगरशरीरात् नहुषस्य मोक्षोऽभिहितः। तत्र भीमस्य शरीरवेष्टनं अनन्तरं प्रश्नोत्तराभ्यां नहुषस्य मुक्तिः इत्याद्यभिहितम्। 'इन्द्रपदप्रेप्सोः' इति यदाचार्येणोक्तं तत्-उपरि निर्दिष्टोपाख्याने इन्द्रपदप्राप्तेः स्पष्टत्वेन निरूपणाद्विरुद्धमिव प्रतिभाति। तत्र इन्द्रपदं प्रकर्षेणेच्छतीति विग्रहे इन्द्राणीप्राप्त्यैव प्रकृष्टत्वेनेन्द्रपदप्राप्तिसिद्धेरिन्द्राणीप्रेप्सोरिति व्याख्येयमिति प्रतिभाति।

---

१ I reads प्रबलाभ्या for प्रबलस्य and वर-शापाख्यां for वर-शापाभ्यां. २ J. reads -भावेऽपि for -भावोऽपि ३ J reads व्याध for व्याघ्र, while B and D read स्कान्दे for स्कन्दपुराणे and substitute गणेशत्व for गणेश्वरत्व ४ B. and D substitute गजत्व for ऽजगरत्व, but undoubtedly it is incorrect ५. B D and G omit शास्त्राणि ६ B and D. read प्रारब्धभोगविरुद्धेन and H. प्रारब्धभोगाविरोधेन both for प्रारब्धभोगाविरोधेन.

षधादिसाध्या । तत्रौषधान्यायुर्वेदप्रसिद्धानि । दानानि च[2] बौधायनकल्प-ब्रह्माण्डपुराणादिभ्योऽवगन्तव्यानि । जपस्तु शौनकादिप्रोक्तऋग्विधान-सामविधानादौ बहुधा प्रपञ्चितः । तथा च[3] ऋग्विधाने स्मर्यते—

'ऋतस्येति जपेत् सूक्तं [4]त्र्यृचं विष्णुमन्दिरे ।
अश्वत्थे माघमासे च मूत्ररोगो विनश्यति ॥ (१२३)
वायो शुक्रो जपेत् सूक्तमश्वत्थे त्र्यृचं तु चेत् ।
[5]नानाविधो वातरोगो विनश्यति न संशयः ॥ (१२४)
वारुणं वा जपेत् सूक्तमृचं धात्रिमूलके ।
[6]तापादिव्याधिनाशो तु [7]सुखी पश्चात् स्थितो भुवि॥(१२५)
कद्रुद्राय जपेत् सूक्तं शीतज्वरविनाशनम् ।
लिङ्गं [9]स्पृष्ट्वाऽऽयुतं धीमान[10]रोग्यं शीघ्रतस्तथा ॥ (१२६)
इमा रुद्राय तवसे जपेत् सूक्तं शिवालये ।
उष्णज्वरविनाशाय [11]अयुतं नात्र संशयः ॥ (१२७)

---

१. J. omits the following portion —
-साध्या । तत्रौषधान्यायुर्वेदप्रसिद्धानि । दानानि च बौधायन-
कल्प-ब्रह्माण्डपुराणादिभ्यवगन्तव्यानि । जपस्तु शौनकादि-.

२. B. and D omit दानानि च ३ B D. E G, H read तथाहि for तथा च, while J omits च. ४. D omits the following portion ·—

. . . . . त्र्यृचं विष्णुमन्दिरे ।
अश्वत्थे माघमासे च मूत्ररोगो विनश्यति ॥
वायो शुक्रो जपेत सूक्त . . . . . ।;

while G. substitutes अयुत for त्र्यृत. ५. E. G. H. and J. read बहु-विधो वातरोगो ; while I. बहुधा वातरोगोऽपि both for नानाविधो वातरोगो. ६. I substitutes वातादि- for तापादि-. ७. E. reads सुखे and H मुखे, but the words are complicated ८ G reads -निवारणम् for -विनाशनम् ९. B. D. and J. read दृष्ट्वा for स्पृष्ट्वा, while G. substitutes जपेत् for ऽयुतं. १०. I. reads नीरोग for आरोग्य ११. I. reads त्र्यृत for अयुतं.

इमां रुद्राय सूक्तं तु जपेच्छिवमन्दिरे ।
कोस-शूलादिरोगघ्नमयुतं नात्र संशयः ( १२८ )
ईङ्खयन्ती जपेत् सूक्तं लक्षं बिल्वे शिवेऽपि वा ।
कुष्ठनाशो भवेच्छीघ्रं माघमासे न संशयः ॥ ( १०१ )
हंसमन्त्रं जपेद्धीमान् त्र्ययुतं विष्णुमन्दिरे ।
अर्घ्यं दद्यात् कुष्ठरोगी सुवर्णसमतामियात् ॥ (१०२)
जपेच्चित्रं देवमन्त्रं शिरोरोगो विनश्यति ।
आयुर्वृद्ध्यादिकं पश्चादयुतं विष्णुमन्दिरे ॥
अमीवहा त्रयुक्तं जपेत् सूक्तं शिवालये ।
त्र्ययुतं चेत् कुष्ठरोगी स्वर्णवर्णं प्रयाति सः ॥ ( १०७ )
मित्रस्येति जपेत् सूक्तमपस्मारो विनश्यति ।
महापातकयुक्तोऽपि नीरोगो भूतले स्थितः ॥ ( १०८ )
उदसौ कुक्षिशूली तु जपेत् सूक्तं शिवालये ।
अयुतं माघमासे तु मुच्यते नात्र संशयः ॥ ( १०९ )

---

१ B. and D. read this s'loka after the sixteenth line of this quotation, namely —

अर्घ्यं दद्याद् कुष्ठरोगी सुवर्णसमतामियात् ।,

while शिवसन्निधौ for शिवमन्दिरे. २ B. D E. G and J. substitute काय- for कास-; while H काल- for the same. ३ I. reads बिल्वशिरोऽपि वा for बिल्वे शिवेऽपि वा. ४. G and J read अयुतं for युतं. ५ I. reads जपेच्छीघ्रं for जपेच्चित्रं. ६. B. and D. substitute पश्चेत् for पश्चात्. ७. G. substitutes अयुतं for त्र्ययुतं. ८. B D E. G. H and J. read मित्रस्यापि for मित्रस्येति. ९. I. reads नीरोगी for नीरोगो. १० G. reads कुक्षिशूले च for कुक्षिशूली तु.

सूर्यो[1] नो दिवः सूक्तं प्रत्यहं प्रजपेदृशं ॥
बर्दयाँ[2] च त्रिवर्षं तु क्षयादिव्याधिनाशनम्' ॥ (११०)

( ऋग्विधान १०१–१५२ )

इति। त एते जपा ऋग्विधाने शौनकेन प्रोक्ताः। होमं च तत्र स एवाह–

'ततश्च चित्रमन्त्रेण होमं कुर्यात् सहस्रकम्[3]।
अर्केण त्रिमधुं कृत्वा शिरोरोगो विनश्यति ॥
सप्तम्यां रवियुक्तायां जलमध्ये यदा[4] दश।
करवीरैस्तु गायत्र्या होमं कुर्यात् सहस्रकम् ॥
व्याधिनाशो भवेच्छीघ्रं मृत्युं जयति सः[5] पुमान्'।

( ऋ. वि. १६१–१७१ )

इति। बौधायनोऽपि–

'असाध्यव्याधिना ग्रस्त[6] उग्रेण प्राणहारिणा।
आँ[7] ते रुद्रेति सूक्तेन प्रत्यृचं वाग्यतः शुचिः ॥
पूर्वमाज्याहुतीर्हुत्वा उपस्थाय च शङ्करम्।
हविःशेषेण वर्तेत एकोत्तरमतन्द्रितः[8] ॥
पूर्णे[9] मासे जयेन्मृत्युं रोगेभ्यश्च विमुच्यते।
होमकर्मण्यशक्तानां जपस्तद्विगुणो भवेत्' ॥

---

१. I. reads सूर्येण for सूर्यो and प्रत्यब्दं for प्रत्यह २ B and D. read बाधिर्यं तु for बर्दयाँ तु. ३. B. D. G and H read समत्रकम् for सहस्रकम्. ४. I. reads यया for यदा ५. G. and J read यः for सः. ६. B. D E and H. read ग्रस्ता for ग्रस्त ७ E. G. and H. read आ ते रौद्रेण, I. अतिरुद्रेण and J. अतिरौद्रेण all for आ ते रुद्रेति ८ B. D. E G H. and J substitute आहुति for आहुती. ९. I. reads अतन्द्रित for अतन्द्रित. १०. I. reads पूर्णे मासि for पूर्णे मासे.

इति । तैत्तिरीयकशाखायां च द्वितीयकाण्डे रोगनिवृत्यर्था होमा बहुधोपवर्णिताः । तत्र तावत्प्रथमप्रश्ने काम्यपशुप्रकरणे प्रथमानुवाके—

'वायव्यं श्वेतमालभेत' ।

( तै. सं. २. १. १. १ )

इति श्वेतपश्वालम्भनानुवृत्तौ श्रूयते—

'वायवे नियुत्वत आलभेत ज्योगामयावी' ।

( तै. सं २. १. १. ३ )

इति । ज्योगामयावी दीर्घरोगी । वायोरश्वानियुतः तद्वते नियुत्वते । फलं च वाक्यशेषे श्रुतम्—

'स एवास्मिन् प्राणापानौ दधात्युत
यदीतासुर्भवति जीवत्येव' ।

( तै. सं. २. १. १. ४ )

इति । स एव नियुत्वान् वायुरेव । अस्मिन् दीर्घरोगवति इतासुर्गतप्राणः । द्वितीयानुवाके श्रूयते—

'यो वरुणगृहीतः स्यात् स एवं वारुणं
कृष्णमेकशितिपादमालभेत' ।

( तै. सं. २. १. २. १ )

---

१. G omits from वायव्य श्वेतमालभेत to द्वितीयानुवाके श्रूयते २ B. and D omit from श्वेतपश्वालम्भना .. to फल च वाक्यशेषे श्रुतम् We do not give any readings on these mantras though they are found in manuscripts both including यदीतासुर्भवति E. and H omit श्वेतपश्वालभन and श्रूयते and then read वायवे नियुत्वत आलभेत and add इत्युपक्रम्य omitting ज्योगामयावी' । इति। ज्योगामयावी दीर्घरोगी। वायोरश्वानियुतः तद्वते नियुत्वते। फलं च वाक्यशेषे श्रुतम्-स एवास्मिन्प्राणापानौ दधात्युत and substituting उभयदातासुर् for यदीतासुर् ३. J. reads वाक्यशेषेण for वाक्यशेषे.

इति। वरुणगृहीतो[1] जलोदराख्यव्याधिगृहीत इत्येके। अज्ञातरोगग्रस्त[2] इत्यन्ये। एकः शितिः श्वेतः पादो यस्य स एकशितिपात्।

'स एवैनं वरुणपाशाद्विमुञ्चति'।
(तै. सं. २. १. २: २)

इति फलम्। स एव वरुण एव। वरुणपाशादुत्करोगात्। तस्मिन्नेवानुवाके—

'आग्नेयं कृष्णग्रीवमालभेत सौम्यं बभ्रुं ज्योगामयावी'।
(तै. सं. २. १. २. ७)

इति। बभ्रुः पिङ्गलवर्णः। तत्फलं तु—

'अग्नेरेवास्य शरीरं निष्क्रीणाति सोमाद्र-
समुत यदीतासुर्भवति जीवत्येव'।
(तै सं. २. १. २. ७)

इति। चतुर्थानुवाके—

'यदि बिभीयाद्दुश्चर्मा भविष्यामीति
सोमा पौष्णꣳ इयाममालभेत'।
(तै. सं. २- १- ४- ३)

इति। कण्डूत्यादिभिश्चिह्नैर्भविष्यद्रोगं निश्चितवतः तस्माद्भयं सम्भवत्येव। तत्फलं तु—

'न दुश्चर्मा भवति'।
(तै. सं २. १. ४. ३)

---

१. G. omits from जलोदराख्यव्याधिगृहीत —to तस्मिन्नेवानुवाके। - आग्नेयम् both including and substitutes उष्ण- for कृष्ण-. २. B. and D. read महोदरव्याध्यादि- for जलोदराख्यव्याधि-. ३ B. and I. read प्रज्ञातरोग- for अज्ञातरोग- while E. H. I. and J. mit -ग्रस्तः-

इति । षष्ठानुवाके–

'प्राजापत्यं तूपरमालभेत यस्यावज्ञातमिव ज्योगामयेत'।

(तै. सं. २. १. ६.३)

इति । तूपरः शृङ्गहीनः पशुः । तत्फलं तु–

'स एवैनं तस्मात् स्रामान्मुञ्चति' ।

(तै. सं. २. १. ६.५)

इति । स एव प्रजापतिरेव । तस्मात् स्रामादस्पष्टाद्दीर्घरोगात् । नवमानुवाके–

'मैत्रꣳ श्वेतमालभेत वारुणं कृष्णं ज्योगामयावी' ।

(तै. सं. २. १. ९. ३)

इति । तत्फलं तु–

'साक्षादेवैनं वरुणपाशान्मुञ्चति उत
यदीतासुर्भवति जीवत्येव' ।

(तै. सं. २. १. ९. ३)

इति । एवमेते रोगनिवर्तकाः पशवः प्रथमप्रश्नेऽभिहिताः।

तथा द्वितीयप्रश्ने काम्येष्टिप्रकरणे प्रथमानुवाके श्रूयते–

'अग्नये सुरभिमते पुरोडाशमष्टाकपालं
निर्वपेद्यस्य गावो वा पुरुषा वा प्रमीयेरन्
यो वा बिभीयात्'।

(तै. सं. २. २. २. ३–४)

इति। भयेप्रतियोगी तु रोगात्मकः पूतिगन्धोऽवगन्तव्यः। वाक्यशेषे—

'पूतिगन्धस्यापहत्यै'।

(तै. सं. २. २. २. ४)

इति तत्फलसंकीर्तनात्[2]। तृतीयानुवाके—

'अग्नये पवमानाय पुरोडाशमष्टाकपालं निर्वपेदग्नये पावकाग्नये शुचये ज्योगामयावी'।

(तै. सं. २. २. ४. २)

इति। तत्फलं तु—

'यदग्नये पवमानाय निर्वपति प्राणमेवास्मिंस्तेन दधाति। यदग्नये पावकाय वाचमेवास्मिंस्तेन दधाति। यदग्नये शुचये आयुरेवास्मिंस्तेन दधाति। उत यदीतासुर्भवति जीवत्येव'।

(तै. सं. २. २. ४. २–३)

इति। तथा तत्रैव श्रुतम्—

'एतामेव निर्वपेच्चक्षुष्कामः'।

(तै. सं. २. २. ४. ३)

इति। चक्षुष्कामो नेत्ररोगग्रस्तः।

'यदग्नये शुचये चक्षुरेवास्मिंस्तेन दधात्युत यद्यन्धो भवति प्रैव पश्यति'।

तै. सं. २. २. ४. ३–४)

---

१. B and D. read भयप्रतिरोगित्वात् तत्र रोगात्मक, H. भयप्रतिरोगीत्वन्नरोगात्मक, E. and G. भयप्रतिरोगी त्वन्नरोगात्मक. and J. भयप्रतिरोगात्मकः for भयप्रतियोगी तु रोगात्मकः. २ I. reads -कीर्तनात् for -संकीर्तनात्.

इति तत्फलश्रवणात् ।

अनयैव दिशा वाक्यान्तराण्यप्युदाहरणीयानि । ऋग्वेद-यजुर्वेदाश्रितौ जप-होमौ प्रदर्शितौ सामवेदाश्रितावपि सामवेदपर्यालोचनया प्रदर्शनीयौ ।

अर्चनानि तु शैव-वैष्णवाद्यागमादिषु प्रसिद्धानि । अर्चनादिभिरित्यादिशब्देनार्घ्य-ध्यानयोग-प्राणायामादयो दृष्टादृष्टोपाया व्याधिनिवर्तका अवगन्तव्याः । ते च योगशास्त्रादौ प्रसिद्धाः । अस्माभिर्ग्रन्थविस्तरभयान्नात्र लिख्यन्ते ।

नच—उक्तेषु जपादिष्वनुष्ठितेष्वपि क्वचित्फलविसंवाददर्शनात् न विलम्भप्रवृत्तिरिति शङ्कनीयम् । औषधेष्वप्यस्य न्यायस्य समानत्वात् । तत्रापि मा भूद्विलम्भ—इति चेत् । हन्तैवमायुर्वेदो दत्तजलाञ्जलिः स्यात् ।

अथ मन्यसे प्रयुज्यमानेष्वौषधेषु कस्माच्चिद्दोषानिवर्त्यदोषप्रबलत्वाद्वा निवर्तकौषधप्रयोगस्याभ्यासोऽपेक्षितः —इति । तार्हि जपादिष्वपि तुल्यमेतदुत्तरम् ।

'सकृत्कृते कृतः शास्त्रार्थः' ।

इति न्यायस्त्वदृष्टफलेष्वेवावगन्तव्यो न दृष्टफलेषु । अत एवावघातादिष्वावृत्तिः परिकल्प्यते । न खल्वनिष्पन्नेषु तण्डुलेषु सकृन्मुसलप्रहारेणाववातविधेश्चरितार्थतां मीमांसका

---

१. I. reads सामवेदायर्ववेदाश्रितावपि सामविधानादिपर्यालोचनया प्रदर्शनीयौ for सामवेदाश्रितावपि सामवेदपर्यालोचनया प्रदर्शनीयौ. २ E. G. and H. read आगमादिषु for अर्चनादिभि . ३ B. D and E. read सामान्यत्वात् for समानत्वात् ४. J. reads सकृत्कृति- for सकृत्कृते . ५ B and D. add न before मीमांसका..

मन्यन्ते। तत्र यथा तण्डुलनिष्पत्तिपर्यन्तोऽवघाताभ्यासः एवमत्रापि रोगनिवृत्तिपर्यन्तो जपाद्यभ्यासो द्रष्टव्यः।

यत्तु क्वचिज्जपादीनामल्पसङ्ख्याश्रवणं तदल्पदोषविषयतया व्यवस्थापनीयम्। एवं च सति न क्वापि विसंवादः।

अयं च व्याधिप्रतीकारन्यायः सर्वेष्वपि अनिष्टेषु प्रारब्धफलेषु कर्मसु योजनीयः। यदि जपादीनां प्रायश्चित्तत्वमङ्गीकृत्य प्रारब्धकर्मनिवृत्तिरभ्युपेयते यदि वा तदनङ्गीकारेण फलमात्रप्रतिबन्धः सर्वथाऽपि विहिते जपादौ विलम्भेन प्रवृत्तिः सिद्ध्यति।

यदा भोगैकानिवर्त्यत्वशङ्कायुक्तेष्वपि प्रारब्धफलेष्वीदृशप्रतीकारविलम्भः तदाऽनारब्धफलेषु कर्मसु प्रायश्चित्तप्रवृत्तिविलम्भोऽस्तीति किमु वक्तव्यम्? । तस्माद्यथोक्तेषु प्रायश्चित्तेषु निःसन्दिग्धतयैव प्रवर्तितव्यमित्यशेषमतिमङ्गलम्॥

तदेवमयं भगवान् पराशराचार्यः काण्डद्वयेन व्यवहारसूचनसहितमाचारप्रायश्चित्तप्रपञ्चमभिधाय शास्त्रमुपसंहरति—

एतत्पाराशरं शास्त्रं श्लोकानां शतपञ्चकम्।
द्विनवत्या समायुक्तं धर्मशास्त्रस्य सङ्ग्रहः॥

इति। पराशरेण कस्यचिदुपपुराणस्यापि निर्मितत्वात्तस्य च ज्ञानप्रधानत्वात् तद्वयवच्छेत्तुमेतदित्युक्तम्।

'अथातो हिमशैलाग्रे'—

(प. स्मृ. १. १.)

---

१ G. reads -अभ्यासा द्रष्टव्या for -अभ्यासो द्रष्टव्य. २ B and D. do not insert this यदि. ३. B. and D do not insert यदि ४. I. omits सिद्ध्यति ५ B and D. read तदेवमाह for तदेवमयं ६ B D E. G. H and J. read -प्रायश्चित्तद्वयम् for -प्रायश्चित्तप्रपञ्चम्. ७. B. and D read उपपातकस्यापि for उपपुराणस्यापि, but it seems quite wrong.

इत्यारभ्य प्रणीतो द्वादशाध्यायात्मको ग्रन्थसन्दर्भः प्रकृतत्वादेतच्छब्देन परामृश्यते । अस्य शास्त्रस्य कलिधर्मविषये प्रामाण्यातिशयं पूर्वोक्तमनुस्मारयितुं पराशरसम्बन्धोपवर्णनम् । शास्त्रशब्दोऽत्र विधायकं वचनमाचष्टे । शासनाच्छास्त्रमिति तद्व्युत्पत्तेः । ननु—शंसनाच्छास्त्रमित्यपि तद्व्युत्पत्तिरस्ति । तदुक्तं पुराणे—

'शासनाच्छंसनाचैव शास्त्रमित्यभिधीयते' ।

इति । बाढम् । सा व्युत्पत्तिर्मोक्षशास्त्रविषया । तस्य सिद्धेर्ब्रह्मतत्त्वाख्यानरूपत्वात् । अत्र त्वनुष्टेयार्थकथनात्पूर्वोक्तैव । तदेवाभिव्यञ्जयितुं धर्मशास्त्रस्येत्युक्तम् । वचनान्तराणामावापोद्वापनिवृत्तये संख्याभिधानम् । मन्वादिस्मृतिवद्ग्रन्थबाहुल्याभावात् केषांचिद्ग्रन्थानामनुक्तिमाशङ्क्य तद्व्यवच्छेदाय सङ्ग्रह इत्युक्तम् ।

अस्य शास्त्रस्यार्थानुष्ठानप्रधानत्वात् पाठस्य स्वर्गम्प्रति आकिंचित्करत्वमाशङ्क्य वेदाध्ययनवत्स्वर्गसाधनत्वमाह—

यथाऽध्ययनकर्माणि धर्मशास्त्रमिदं तथा ।
अध्येतव्यं प्रयत्नेन नियतं स्वर्गगामिना ॥

---

१ E and J. substitute पराशरशब्दोऽत्र for शास्त्रशब्दोऽत्र; while G. reads शंसनात् for शासनात् २ E reads ब्रह्मसत्त्वाख्यान-, G -ब्रह्माख्यान-, H. -ब्रह्मत्वाख्यान-and J -ब्रह्मरूपत्वाख्यान- all for-ब्रह्मतत्वाख्यान-. ३ I. reads शास्त्रमित्युक्तम् for धर्मशास्त्रस्येत्युक्तम् ४ E. omits ऽभिधानम् । मन्वादिस्मृतिवद् ग्रन्थबाहल्याभावात् केषांचिद्ग्रन्थानामनुक्तिमाशङ्क्य तद्व्य- ५. B. and D. omit अभावात् and read बाहुल्यात् ६ B D. E. and H. substitute तस्य for अस्य. ७. B. and D. substitute अथा— for यथा-.

निगदव्याख्यातमेतत्[1]।

ननु[2]–व्यासेन कलिधर्माणां पृष्टत्वात्[3]

"कलौ पाराशराः स्मृताः"।

(प. स्मृ. १. २४.)

इति पराशरेणोक्तत्वाच्च पराशरोक्ताः सर्वे कलिधर्मा एवेति वक्तव्यम्। किञ्च।

'शेषं मुनिविभाषितम्[4]'।

(प. स्मृ. १. ३४)

इति इतरमुन्युक्तकलिनिषेधानामप्यभ्युपगतिः स्पष्टं लक्ष्यते। अतो मूलोक्ताघसङ्कोचादीनां मूलोन्नीतदूरयात्रादीनामस्मिन् युगे प्रवृत्तावप्रवृत्तौ च विरोधो जागरूकः। नच–बाहुल्यमात्रेण स्मृतेः कलिधर्मविषयत्वं किं न स्यात्?–इति वाच्यम्। विभाजकनिमित्ताभावात्। निषेधवचनानां निमित्तत्वे कृष्यादिकस्यापि अननुष्ठेयत्वापत्तेः। एतद्ग्रन्थोक्तव्यतिरिक्तविषयाणां तेषां निमित्तत्वे अघसंकोचादीनामपि कृष्यादिवदनुष्ठेयत्वापत्तेः। संन्यासाद्याश्रम-कृष्यादिव्यतिरिक्तापद्वृत्तिः सेतुयात्राव्यतिरिक्तदूरयात्रादीनामग्राह्यत्वापत्तेः। आचारस्य तथात्वे अतिप्रसङ्गापत्तेः। स्मृतिवैयर्थ्यापत्तेश्च–इति चेत्। अत्रोच्यते–

---

१. B. D. G. and J. read निगदव्याख्यानमेतत् for निगदव्याख्यातमेतत्. २. From this word to (P 292, L. 23) the end of माधवाचार्यवर्य the intermediate portion does not appear in B. D E. G. H. and J, but occurs in A. and I. It is possible no doubt the com of author. ३. I. reads स्पृष्टत्वात् for पृष्टत्वात्. ४. I. reads पराशरस्मृतिः

कलौ पराशरोक्तं तद्वचनोन्नीतं च सर्वमप्यनुष्ठेयमेव। नानुष्ठेयं किञ्चिदप्यास्ति। किन्त्वनुष्ठाने विशेषो विज्ञायते। समन्वयबलात्। तथाहि—निषेधाश्च युगप्रयुक्तानुपपत्तिमूलकाः। अन्यथा विध्युत्पत्तिवैयर्थ्यात्। अनुपपत्तिश्च दृष्टाऽदृष्टा चेति द्विविधा। तत्र दृष्टानुपपत्तिमूलकानामनुष्ठानमननुष्ठानं चानिन्दितम्। यत्र अनन्यथासिद्धिप्रतिप्रसवविधिरुन्नीयते तत्र दृष्टानुपपत्तिः कल्प्यते।

"दूराध्वोपगतं श्रान्तं"
(प. स्मृ. १. ४१)

"यति हस्ते जलं दद्यात्"
(प. स्मृ. १. ५३)

"वैश्वदेव उपस्थितम्"
(प. स्मृ. १. ४१)

"चातुर्वर्ण्याश्रमागतम्"
(प. स्मृ. २. १)

"एकपिण्डास्तु दायादाः"
(प. स्मृ. ३. ७)

"देशान्तरमृतः कश्चित्"
(प. स्मृ. ३. १०)

"ब्रह्मचारी गृहे येषाम्"
(प. स्मृ. ३. १८)

"सव्रतः सव्रपूतश्च"
(प. स्मृ. ३. २१)

"आहिताग्निश्च यो द्विजः"
(प. स्मृ. ३. २१)

"राज्ञश्च सूतकं नास्ति"
(प. स्मृ. ३. २२)

"यस्य चेच्छति पार्थिवः"
(प. स्मृ. ३. २२)

"सम्प्रणीतः श्मशानेषु"
(प. स्मृ. ८. २२)

"दास-नापित-गोपाल-कुलमित्रा-ऽर्धसीरिणः"
(प. स्मृ. ११. २१)

"यजेत वाऽश्वमेधेन"
(प. स्मृ. १२. ७१)

इत्याद्यन्यथानुपपत्त्या दूरयात्राविधिरुन्नेयः।

"एकाहाच्छुद्ध्यते विप्रः"
(प. स्मृ. ३. ४)

इत्यघसङ्कोचविधिर्यायावरविषयत्वेन वा औपासनोक्तापवादप्रतिप्रसवविषयत्वेन वा अन्यथासिद्धः।

"नष्टे मृते प्रव्रजिते"
(प. स्मृ. ४. २८)

इति पुनरुद्वाहविधिः परिवेदनाद्यक्रमाविवाहविषयत्वेन अन्यथासिद्धः।

"क्षेत्रजश्चैव"

इत्यादि क्षेत्रजादिपुत्रभेदप्रदर्शनं कुण्ड–गोलकप्रदर्शनवत् प्रायश्चित्तार्थत्वेन अन्यथासिद्धम्।

न च–दत्तौरसयोरपि तथा स्यात्–इति वाच्यम्। ऋतुगमनप्रशंसनेन वैपरीत्यनिन्दनेन च औरसस्येव लक्षणप्रणयनेन दत्तस्यापि विध्यभिप्रायविषयत्वप्रतिपादनात् दत्तौरसकथनं न प्रायश्चित्तरूपमिति स्पष्टीकृतम्।

"संसर्गमाचरेद्विप्रः"

(प. स्मृ. )

इत्यादि संसर्गप्रायश्चित्तं लोकविलक्षणयाजनादिविषयत्वेन अन्यथासिद्धम्।

"आसनात् शयनात् यानात्"

(प. स्मृ. १२, ७९)

इति तु पातित्यमात्रापादकत्वेन अन्यथासिद्धम्।

अन्यत्र गोवधादौ अदृष्टानुपपत्तिः कल्प्यते। तेषामनुष्ठानं निन्दितम्। यत्र प्रत्यक्षोऽपूर्वविधिर्दृश्यते कृष्यादौ तस्य अननुष्ठानं निन्दितम्। तदितरविषयत्वेनैव निषेधानां प्रवृत्तत्वात्। पूर्वोक्तानन्यथासिद्धविधिविषयाणामप्येवमेव द्रष्टव्यम्। तेषामपि स्वस्वविषयेषु प्रत्यक्षापूर्वविधित्वात्। एतदभिप्रायेणैव सर्वमपि व्याख्यानं सङ्गच्छत इति सर्वं समञ्जसम्।

अध्यायाचारकाण्डानाभिहितसमयाचारभेदान् द्वितीये
काण्डेऽध्यायाष्टकेऽपि क्वचिदनभिहितान् निष्कृतीनां प्रभेदान्।
अध्याये द्वादशेऽस्मिन्नकथयदनघः शक्तिसूनुर्मुनीन्द्रः
तं शिष्टानुग्रहार्थं सुविवृतमकरोन्माधवाचार्यवर्यः॥ १॥

१. A reads विलक्षण- for लोकविलक्षण-. २ This does not appear in I ३. A reads शिष्या- for शिष्टा-.

अध्यायेऽत्रावशिष्टं समुदितमुभयोः काण्डयोर्द्वादशे स्यात्
प्रायश्चित्तं यदस्मिन्ननुपदमवदत्पातकादौ रहस्ये ।
अन्यत् सौम्यादिकृच्छ्रं सुविहितफलदं कर्मणो यो विपाकः
सर्वं भावोपलक्ष्यं स्मृतिहृदयविदा व्याकृतं माधवेन ॥ २ ॥

इति श्रीमहाराजाधिराजपरमेश्वर-वैदिकमार्गप्रवर्तक-श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरस्य माधवामात्यस्य कृतौ पराशरस्मृतिव्याख्यायां माधवीयायां द्वादशोऽध्यायः समाप्तः।

**समाप्तमिदं प्रायश्चित्तकाण्डम्।**

---

१. B. D. and H. read चावशिष्टं. G. स्वावशिष्ट and G. वा ऽवशिष्ट for ऽत्रावशिष्टं. but it seems incorrect. २ B. D. E. H J. and I read अवदत् for अवदत्. ३. B D. E. G. H. and J. read रहस्यम् for रहस्ये- ४. E. and I. read स्मृतिहृदयमिद for स्मृतिहृदयविदा, while B. D. H. substitute व्याकृते for व्याकृत ५. B. and D. read -राजाधिराज- for -महाराजाधिराज-. ६ B D. E. G. H. and J. read प्रवर्तकस्य for -प्रवर्तक-. ७. B. and D. read only अमात्यस्य for माधवामात्यस्य.

## The names occurring in the Parâśara Śamhitâ.

---

### ADHYÂYA XII

उशना: 12, 53.
पराशरमतम् 12, 75.
पराशरम् 12, 82.
मनु: 12, 38.
रामचन्द्र: 12, 70.
विन्ध्य 12, 75
स्वायम्भुव: 12, 8.

**A list of the names of authors and works, &c., occurring in Mâdhavâchâryâ's Commentary on the Parâśar Sâmhitâ, Adhyâya XII**

---

१ अंगिराः—50, 7. 51, 6 67, 16 74, 2. 76, 8. 88, 5. 178, 4 190, 14.

२ अग्निपुराणम्–221, 13.

३ अत्रिः–167, 6.

४ अभिधानम्–206, 6.

५ आपस्तम्बः–57, 14 65, 15 89, 6 121, 18 144, 9 172, 7 172, 18

६ आश्वमेधिकम्–144, 2

७ उदाहरणम्–273, 16

८ उमामहेश्वरसंवादः–222, 11 227, 11 229, 11 238, 8 240, 8 250, 11 261, 12

९ उशनाः–143, 5

१० ऋग्विधानम्–279, 4

११ कण्वः–48, 15 128, 15 200, 10

१२ कात्यायनः–12, 12

१३ काश्यपः–49, 1 60, 5 247, 9 253, 9.

१४ कूर्मपुराणम्–6, 17 8, 2. 14, 2 17, 7 161, 1.

१५ गर्गः–43, 10.

१६ गरुडपुराणम्–226, 6.232, 7.

१७ गौतमः–56, 4. 56, 9 59, 15 86, 5 114, 12. 129, 1 142, 3 148, 1 174, 2 179, 12 180, 3. 257, 10 265, 1

१८ चतुर्विंशतिमतम्–28, 8 47, 11 74, 8 88, 7 116, 11. 117, 9 132, 4 155, 11. 159, 1 162, 6. 172, 15. 178, 10 196, 11. 197, 9. 199, 15 200, 13

१९ चमत्कारखण्डम् (स्कन्दपुराणम्)–220, 5

२० छन्दोगाः–1, 15

२१ छागलेयः–196, 4

२२ जमदग्निः–208, 5.

२३ जातूकर्ण्यः–80, 2. 109, 13.

२४ जाबालिः–111, 10 112, 17. 183, 5 195, 11

२५ तैत्तिरीयब्राह्मणम्–35, 4

२६ तैत्तिरीयारण्यकम्–48, 7.

२७ तैत्तिरीयसंहिता–53, 5. 282, 1

२८ दक्षः–13, 1. 65, 9.

२९ देवलः–23, 12 61, 1 67, 22 82, 9 147, 4 192, 10 201, 6.
३० नन्दिपुराणम्–242, 11
३१ नागरखण्डम् (स्कन्दपुराणम्)-230, 1
३२ नारदः–12, 8 116, 19 203, 8
३३ नारदपुराणम्–228, 5 267, 10
३४ पतञ्जलिः–205, 7
३५ पद्मपुराणम्–219, 16 240, 15 269, 1
३६ पराशरोपपुराणम्–276, 6
३७ पुराणम् 288, 6
३८ पुलस्त्यः–77, 16 80, 15.
३९ पैठीनसिः–25, 5 62, 11 111, 14 115, 1 132, 7 148, 9 152, 5. 162, 3
४० पौराणिकाः–124, 15
४१ प्रचेताः–114, 4 134, 7
४२ प्रजापतिः–43, 4 49, 9 74, 5
४३ प्रभासखण्डम्–230, 12.
४४ बव्हृचा :–2, 8.
४५ बादरायणः– 3, 8 275, 4.
४६ बृहद्याज्ञवल्क्यः– 79, 6
४७ बृहद्विष्णुः–79, 1
४८ बृहस्पतिः–16, 7 28, 1 73, 10 78, 5 81, 5 84, 2 141, 13 143, 8 153, 8 157, 1
४९ बौधायनः -15, 6 45, 14 133, 14 135, 11 160, 4 163, 10 181, 12
५० ब्रह्मपुराणम्–197, 6 209, 6 210, 14 224, 18 245, 7 266, 1 272, 6
५१ भरद्वाजः–108, 17
५२ भविष्यपुराणम्–66, 7 67 16
५३ भविष्योत्तरम्–210, 6
५४ भारद्वाजगृह्यम्–109, 2
५५ भृगुः– 146, 1 177, 7
५६ मनुः–4, 9 27, 12 34, 2 35, 13 42, 10 49, 5. 54, 15 55, 14 57, 4 60, 16 69, 2 80, 10 82, 5 82, 12 86, 9 87, 6 90, 8 95, 6 96, 4 96, 14 99, 1 103, 13 104, 11 105, 6 107, 4 108, 1 110, 6 111, 17 113, 12. 115, 9 120, 15 123, 9 125, 17 130, 11 136, 17 11 137, 138, 15 140, 12 141, 8 147, 13 154, 10 160, 10 164, 5 167, 7 168, 1. 169, 1 170, 1 170, 13 211, 9 215, 6 223, 11 242, 3 252, 1 252, 12
५७ मध्यमाङ्गिराः–64, 12 72, 7
५८ महाभारतम्–235, 10
५९ मार्कण्डेयः–144, 6 181, 8
६० मार्कण्डेयपुराणम्–241, 11 244, 8 255, 15 265, 6

६१ यमः–3, 16 41, 15 42, 2 59, 1 63, 6 114, 8 116, 14 121, 10 139, 8 140, 4 140, 16 141, 21 147, 8 149, 10 153, 4 156, 1 163, 7 164, 14 166, 12 167, 15 168, 10 180, 3 181, 3 182, 1 183, 14 189, 11 191, 15 195, 16 246, 13 263, 11

६२ याज्ञवल्क्यः–13, 5 44, 5. 48, 3. 54, 10 55, 7 68, 9 70, 5 74, 14 75, 13 81, 14 84, 15 101, 3 104, 6 106, 10 115, 4 123, 15 125, 13 131, 1 150, 8 151, 13 153, 8 162, 17 165, 4 167, 4 167, 10 168, 13 169, 7. 171, 7 179, 6 180, 6 182, 7 183, 8 213, 11 229, 1 255, 5

६३ लिङ्गपुराणम्–14, 6

६४ वराहपुराणम्–268, 5

